UNIVERSAL
LIBRARY
OU_184302
UNIVERSAL
LIBRARY

OSMANIA UNIVERSITY LIBRARY

Call No. S 294.3 Accession No. S1438

Author K94 S क्षेमराज

Title स्वच्छन्द तन्त्र H 1921

This book should be returned on or before the date last marked below.

THE KASHMIR SERIES

OF

TEXTS AND STUDIES.

Kashmir Series of Texts and Studies.
No. XLIV.

THE SVACCHANDA TANTRAM

WITH COMMENTARY

BY

KSHEMARĀJA.

EDITED BY

PANDIT MADHUSUDAN KAUL SHĀSTRĪ, M. A., M. O. L.

VIDYĀVĀRIDHI,

Superintendent Research Department,

JAMMU AND KASHMIR STATE,

SRINAGAR.

Published under the Authority of the Government of

His Highness Mahārājā

Sir HARISINGH BAHĀDUR,

K. C. I. E., K. C. V. O.,

MAHĀRĀJA OF JAMMU AND KASHMIR STATE.

Volume III.

BOMBAY:

PRINTED AT THE 'NIRNAYA-SAGAR' PRESS.

1926.

श्रीसोमानन्दनाथप्रभृतिगुरुवरादिष्टसन्नीतिमार्गो
लब्ध्वा यत्रैव सम्यक्पटिमनि घटनामीश्वराद्वैतवादः ।
कश्मीरेभ्यः प्रसृत्य प्रकटपरिमलो रञ्जयन्सर्वदेश्यान्
देशेऽन्यस्मिन्नदृष्टो घुसृणविसरवत्सर्ववन्द्यत्वमाप ॥ १ ॥

तरत तरसा संसाराब्धिं विधत्त परे पदे
पदमविचलं नित्यालोकप्रमोदसुनिर्भरे ।
विमृशत शिवादिष्टाद्वैतावबोधसुधारसं
प्रसभविलसत्सद्युक्त्यान्तःसमुत्प्लवदायिनम् ॥ २ ॥

ॐ

काश्मीर-संस्कृतग्रन्थावलिः ।

ग्रन्थाङ्कः ४४

श्रीस्वच्छन्दतन्त्रम् ।

श्रीमाहेश्वराचार्यश्रीक्षेमराजकृतोद्द्योताख्यविवरणोपेतम् ।

श्रीभारतधर्ममार्तण्ड-काश्मीरमहाराज-

श्रीप्रतापसिंहवर-प्रतिष्ठापिते

प्रत्नविद्याप्रकाश-(रिसर्च) कार्यालये

तदध्यक्ष-पण्डित-मधुसूदन-कौल-शास्त्रिणा

उद्दिष्टकार्यालयस्थेतरपण्डितसहायेन संगृह्य,

संशोधन-पर्यायाङ्कनादिसंस्करणोत्तरं

पाश्चात्यविद्वत्परिषत्संमताधुनिकसुगमशुद्धरीत्युपन्यासादिसंस्कारैः परिष्कृत्य

मुम्बय्यां

'निर्णयसागर' मुद्रणालये मुद्रापयित्वा प्राकाश्यमुपनीतम् ।

(तृतीयो भागः)



संवत् १९८२. काश्मीर-श्रीनगर खैस्ताब्दः १९२६.

(अस्य ग्रन्थस्य सर्वे प्रकाशन-मुद्रापणाद्यधिकाराः प्रोक्तमहाराजवर्यैः स्वायत्तीकृताः सन्ति)

(All rights reserved).

Printed by Ramchandra Yesu Shedge, at the 'Nirnaya-sagar' Press,
26-28, Kolbhat Lane, Bombay.

Published by Pandit Madhusudan Kaul Shastri, M. A., M. O. L.
for the Research Department,
Jammu and Kashmir State, SRINAGAR.

अथ

श्रीस्वच्छन्दतन्त्रम् ।

श्रीमन्महामाहेश्वराचार्यश्रीक्षेमराजकृतोद्द्योताख्य-
विवरणोपेतम् ।

(पञ्चमः पटलः)

दीक्षादीक्षणनिर्माणनानोपायप्रदर्शनः ।
जयत्यनुग्रहैकान्तविश्रान्तः परमेश्वरः ॥

अथ पटलसंगतिं कुर्वती उक्तकलादीक्षानुवादपूर्वं तत्त्वदीक्षां प्रस्तावयितुं श्रीदेव्युवाच

कलादीक्षा सुरेशान
कथिता परमेश्वर ।
तत्त्वदीक्षां समासेन
कथय स्व! प्रसादतः ॥ १ ॥

सुरेशानो ब्रह्मादीनां स्वामी । परमेश्वरस्तु

परभैरवसत्तानुप्रवेशात् । समासेनेति संक्षेपेण विधिविस्तारस्य कलादीक्षायामुक्तत्वात् ॥ १ ॥

एवमभ्यर्थितः श्रीभैरव उवाच

समासात्कथयिष्यामि
त्वत्प्रियार्थं वरानने ।

पूर्वं प्रश्नेन प्रकृतां तत्त्वदीक्षां नानाभेद-भिन्नाम् ॥

तत्र

षट्त्रिंशत्तत्त्वमुख्यानि
यथा शोध्यानि पार्वति ॥ २ ॥
पृथिव्यादिशिवान्तानि
स्वव्याप्त्यानुगुणैः सह ।
यथा शुद्ध्यन्ति देवेशि
तथा ते कथयाम्यहम् ॥ ३ ॥

तत्त्वदीक्षायां तत्त्वानामन्तर्भावितान्तराध्वापेक्षं प्राधान्यमेव व्याप्तिरध्वान्तराणां तु गुणीभावः । एवमन्यत्र । येन प्रकारेण शोध्यानि शोधनीयानि, यथा च शुद्ध्यन्ति

तथा शोधकशोध्यगतं प्रकारं तव अनुग्रहैक-परायाः कथयामीति प्रतिज्ञा ॥ ३ ॥

तत्र

विद्याराजस्य ये वर्णा
नवसंख्योपलक्षिताः ।
वाचकास्ते च तत्त्वानां
शोध्यत्वेनोपस्थाप्यानाम् ॥

यथा भवन्ति तथा

कथयाम्यनुपूर्वशः ॥ ४ ॥

तत्र

धरित्र्यादिप्रधानान्त-
मूकारो वाचकः स्मृतः ।
पुरुषस्य यकारो वै
रागतत्त्वान्वितस्य च ॥ ५ ॥

स्मृत इति श्रीश्रीकण्ठेन । अतश्च तेनैव वर्णेन प्रणवनवात्मोच्चारपूर्वं तत्तत्तत्त्वं कलोप-स्थापनवदुपस्थाप्य अध्वसंधानादिशुद्धाशुद्ध-

तत्त्वानुसंध्यन्तं सर्वं पूर्ववत् कर्तव्यम् । एवं सर्वत्र । पुरुषस्य स्पृहामयत्वात् रागतत्त्वान्वितस्येत्युक्तम् ॥ ५ ॥

नियामिकां वकारेण
विद्यातत्त्वसमन्विताम् ।
कालं कलां लकारेण
कल्पयेत्तु वरानने ॥ ६ ॥

किंचिद्भेदनात्मनोऽशुद्धविद्यायाः किंचिदंशे नियमानुप्रवेशान्नियत्या सह निर्देशः । कलायास्तु किंचित्कर्तृत्वात्मनः क्रियाविशिष्टायाः कालानुवेधस्यावश्यंभावात् कालेन सह निर्देशः । सहनिर्देशश्चायं वाच्यवाचकभावप्रदर्शनाय । शोधनं तु पृथगेव ॥ ६ ॥

किंच

मायातत्त्वं मकारेण
विद्यातत्त्वं क्षकारतः ।
रेफेण चैश्वरं तत्त्वं
हकारेण सदाशिवः ॥ ७ ॥

प्रणवेन तथा शक्ति-
न्यसितव्या वरानने ।

प्रणवेन बिन्दुना । शक्तिरिति शक्तितत्त्वं परमशिवरूपमेव[1] ॥ ७ ॥

अत एव

व्यापिनीं समनां चोर्ध्वे
तत्रैव तु विशोधयेत् ॥ ८ ॥

तत्रैवेति शिवतत्त्वे प्रणवेनैव ॥ ८ ॥

एतच्च सर्वं पूर्वोक्तेन सर्वेण विधिना

शोधयित्वा क्रमेणैव
मूलमन्त्रेण सुव्रते ।
योज्य आत्मा परे तत्त्वे
उन्मनातीतसर्वगे ॥ ९ ॥
निराभासे परे शान्ते
ईशाने चाव्यये त्वजे ।

शिष्यदेहे पादान्तात् गुल्फान्तं पृथ्वी,

---

१ ख० पु० तत्त्वं परमशिवरूपमिति पाठः ।

गुल्फान्ताभ्यन्तं जलादिप्रधानान्तानि त्रयोविंशतिः, ततस्तालवन्तं पुमादिमायान्तानि सप्त, ततो ब्रह्मबिलोपान्तं विद्यादिसदाशिवान्तं त्रयं, तदुपरि समनान्तं शक्तितत्त्वसहितं शिवतत्त्वम्,—इति तत्त्वानि विन्यस्य, दीक्ष्यस्य तानि सर्वाणि क्रमेण पूर्वोक्तविधिना प्रोक्तनवात्मावयवैः शोधयित्वा, आत्मा 'परे तत्त्वे' परमशिवे मूलमन्त्रेणेति अवयवापेक्षया समग्रेण नवात्मना योज्यः । कीदृशे उन्मनामतीते तदनुप्रवेशानन्तरलभ्ये शक्तिमदात्मनि 'सर्वगे' व्यापके । ईषद्भासनान् निष्क्रान्ते सर्वाभासोत्थापके च, निःशेषभेदोपशमात्परे शान्ते, ईशाने विश्वेश्वरे, अव्यये अजे चेति नित्ये ॥ ९ ॥

तदित्थमेकैकं शोधनीयत्वेन

षट्त्रिंशत्तत्त्वमाख्यातं

पात्रादित्वात् समाहारे स्त्रीप्रत्ययाभावः ॥

अथ

नवतत्त्वं प्रचक्ष्महे ॥ १० ॥

तत्र

प्रकृतिः पुरुषश्चैव
नियतिः काल एव च।
माया विद्या तथेशश्च
सदाशिवशिवौ तथा ॥ ११ ॥

एतानि मुख्यानि नवतत्त्वानि नवभिर्नात्मकैः प्रातिलोम्येन पूर्वोक्तविधिना

शोधयित्वा तु विधिव-
द्व्याप्त्यात्मान[1] नियोजयेत्।

शिष्यस्य प्राधान्येन तु

पञ्चतत्त्वी यदा शोध्या

तदा

वक्त्रमन्त्रास्तु वाचकाः ॥ १२ ॥

तैश्च सद्योजातादिक्रमेण

धरित्र्यादि खपर्यन्तं
शोधयेत्तत्क्रमेण तु।

---

१ क० व्याप्त्यात्मानमिति पाठः।

तत्त्वपञ्चकस्याशेषाध्वशुद्ध्यनुगुणां निवृत्त्यादिकलाव्याप्तिमाह

कलानां यावती व्याप्ति-
स्तत्त्वानां तावदेव हि ॥ १३ ॥

एवं च वदन् कलादीक्षोक्तोऽत्र सर्वो विधिः, केवलं कलोपस्थापनाद्यवसरे सद्योजातादिमन्त्रैर्धरादितत्त्वोपस्थापनादि कार्यम् । अतश्च तत्त्वपञ्चकमेतत् भगवद्क्रममन्त्रस्फारसारतया परभैरवमयमेवेति तद्भेदव्याप्तिरेव परं शुद्धिसाधनमिति शिक्षयति ॥ १३ ॥

अथ

त्रितत्त्वमधुना वक्ष्ये
यथा शोध्यं वरानने ।

आत्मविद्याशिवाख्यं मेयमानमातृरूपम् ॥

अस्य वाचकव्याप्तिमाह

अकार आत्मतत्त्वस्य
वाचकः परिकीर्तितः ॥ १४ ॥

मायान्तं तद्विजानीयात्

अकार इति प्रणवसत्कः । मायान्तमेकत्रिंशता तत्त्वैरपरिवर्जित आत्मा शिवशक्तेर्मेय इति तावत्येवास्य व्याप्तिः ॥

विद्याख्यस्याप्युकारकः ।

सकलावधि तज्ज्ञेयं

विद्या ज्ञानक्रियात्मा शक्तिः शुद्धविद्येश्वरसदाशिवव्याप्तिका । सकलः सदाशिवः ॥

तदुपरि शक्तिव्यापिनीसमनाशक्तिव्यापकस्य

शिवस्य तु मकारकः ॥ १५ ॥

यस्तु तदूर्ध्वगो बिन्दुरुन्मनाव्याप्तिसतत्त्वः

खस्वरः

खं पराकाशं स्वरयति शब्दयति सः पराकाशात्मा ॥

अत एव

खस्वरूपस्य

शिवतत्त्वस्य वाचकः ।

तदित्थमेतदनुसंधाय प्राग्वदध्वोपस्थापनपूर्वम्

शोधयित्वा क्रमेणैव
शिष्यात्मानम्
परे तत्त्वे नियोजयेत् ॥ १६ ॥

स्वस्वरोक्तव्याप्तिसारेण प्रणवेन ॥ १६ ॥

तदित्थमत्र

तत्त्वदीक्षा समाख्याता
चतुर्भेदव्यवस्थिता ।

पूर्वं तु योजनिकाग्रन्थान्ते एकतत्त्वदीक्षापि उक्तेति दर्शितमेव ॥

एवं प्रश्नितां तत्त्वदीक्षामुक्त्वा, अनुजिघृक्षोर्भगवत्या आशयपरितोषायाप्रश्नितामपि पदादिदीक्षां निरूपयिष्यन् भगवानाह

पददीक्षां प्रवक्ष्यामि
यथावदनुपूर्वशः ॥ १७ ॥

वर्णमन्त्रदीक्षाभ्यां तुल्येतिकर्तव्यतां भुवनदीक्षां तदवसर एव संक्षेपेण प्रतिपादयि-

ष्यति, विस्तरेण तु दशमपटले । ततः पद-दीक्षामेव तावदाह ॥ १७ ॥

तत्र

विद्याराजे तु ये वर्णा
नवसंख्योपलक्षिताः ।
पृथग्भेदेन तेषां तु
विन्यासं कथयामि ते ॥ १८ ॥

तत्र

नवनाभं पुरं कृत्वा
नवपद्मोपलक्षितम् ।

कथं

नवहस्तं लिखेद्वेश्म
अष्टपर्वाधिकं बुधः ॥ १९ ॥

वेश्म मण्डलक्षेत्रम् । अष्टभिः पर्वभिरङ्गुलैराधिक्ये सर्वमेतत् क्षेत्रमङ्गुलशतद्वयं चतुर्विंशत्यधिकं भुवनाध्वप्रतिबिम्बरूपं भवति । तस्मिन्सर्वतः सप्तभागकल्पनयैकैकस्य भागस्य

द्वात्रिंशदङ्गुलत्वं जायते,—इति तदर्थमङ्गुलाष्टकाधिक्यदानम् ॥ १९ ॥

अथ

सप्तभागीकृतं तत्तु

कुर्यात् ॥

किं कृत्वा

दक्षिणोत्तरभाजितम् ।
चतुरश्रं विभज्यादौ
मत्स्यैश्चैवात्र चिह्नितम् ॥ २० ॥

भाविनीत्या ब्रह्मस्थानात्पूर्वापरदिशौ अङ्कयित्वा, किंचिदूनेन चतुर्भागेन क्षेत्रमानेन सूत्रेण पूर्वापराङ्कयोर्वामहस्तप्रतिबद्धेन दक्षकरगताग्रभागेन पार्श्वयोर्मत्स्यबन्धाकारं रेखाद्वयमुत्पाद्य, तन्मध्ये सूत्रमास्फाल्य दक्षिणोत्तरभाजितं क्षेत्रं कृत्वा, क्षेत्रार्धमानेन सूत्रेण पार्श्वगतमध्याङ्कप्रतिबद्धेन कोणेषु मत्स्यबन्धचतुष्कमुत्पाद्य, तत्र सूत्रास्फालनेन चतुरश्रं विभज्येत्यत्र पिण्डार्थः ॥ २० ॥

एवं चतुरश्रे क्षेत्रे पूर्वापरायतैः सूत्रैः सप्तधा विभक्ते

कोष्ठकैकोनपञ्चाश-
त्सूत्रेण तु समालिखेत् ।

दक्षिणोत्तरायतैर्मध्यगतैः षड्भिः सूत्रैरेकोनपञ्चाशतं कोष्ठकानुत्थापयेत् ॥

एवं कृत्वा

मध्यमे कोष्ठके सूत्रं
द्वात्रिंशाङ्गुलसंमितम् ॥ २१ ॥

समालिख्य महादेवि
चतुर्भागविभाजिते ।

ब्रह्मस्थानाच्चतुर्भिः समभागैर्भ्रमैः पर्यन्तभाविव्योमरेखावकाशं परिकल्प्य विभक्त इत्यर्थः ॥

तत्र भागचतुष्टयमध्यात्

प्रथमे कर्णिकां कुर्या-
त्केसराणि द्वितीयके ॥ २२ ॥

तृतीये दलसंधींश्च
दलाग्राणि चतुर्थके ।

यत्र दलानि तदग्रैः संधीयन्ते ते दल-संधयः ॥

पूर्वोक्तेषु चतुर्षु भागेषु वृत्तवर्तनविधिमाह

दिक्षु रेखाष्टकं दत्त्वा
प्रतिदिक्षु तथैव च ॥ २३ ॥
भ्रामयेच्चतुरो वृत्तां-
श्चतुरङ्गुलसंमितान् ।

दिक्षु अष्टस्वष्टौ, तन्मध्ये चाष्टौ सूत्राणि दत्त्वा, ब्रह्मस्थानात् पूर्वविभागाङ्केषु चतुरो भ्रमान् कुर्यात् ॥ २३ ॥

अथ

द्वाभ्यां प्रतिदिग्रेखाभ्यां
मध्ये सूत्रं निधाप्य तत् ॥२४॥
सूत्राग्रं[1] तु ततो भ्राम्य-
मर्धचन्द्रविधानतः ।

---

१ क० ख० ग० पु० सूत्राअमिति पाठः ।

प्रतिदलसंधि अर्धचन्द्रद्वयविधानाय पूर्वदिग्रेखायाः पार्श्वरेखाभ्यामुपलक्षिते मध्ये मध्यद्वये वामेन करेण सूत्रं रुद्ध्वा, दक्षिणेन सूत्राग्रं[1] पार्श्वरेखाभ्यां मध्यरेखान्तं भ्रामयेत् । अत्र चैकैकपार्श्वरेखा आयामतो मध्यात् विभक्तव्यायामेन संसक्तदलेला[2] भवति ॥ २४ ॥

अर्धचन्द्रयोरुत्पत्तिहेतुप्रतिदिग्रेखयोर्मध्यद्वये मध्यग्रहणाय केसरसिद्ध्यर्थम्

मध्यसूत्रं च दातव्यं
किञ्जल्कस्थं विपश्चिता ॥ २५ ॥

किंजल्के केसरे तन्निमित्तं तिष्ठति । तेनैकैकार्धचन्द्रमध्यानुसारदलमध्यसूत्रोत्पन्नकिंजल्कस्य पार्श्वयोः किंजल्कद्वयोत्पादनाय अर्धचन्द्रद्वयोत्पत्त्यर्थं मध्यलाभे चादावेव सूत्रद्वयं देयम् । एवं साकल्येन द्वात्रिंशत्सूत्राण्येतानि भवन्ति ॥ २५ ॥

---

१ क० ग० घ० सूत्राश्रमिति पाठः । २ क० पु० दलतेति पाठः ।

एतदुपसंहरन्नन्यत्रापि अतिदिशति

पूर्वपत्रं प्रसाध्यैव-
मितराण्येवमेव हि ।

प्रसाधयेत् ॥

तत्र च

केसराणि च संलिख्य
चतुर्विंशतिसंख्यया ॥ २६ ॥

पत्राग्रतो न्यसेल्लेखां
वर्तुलां तु सुशोभनाम् ।

प्रतिदलं त्रीणि केसराणि । पत्राग्रत इति दलान्युत्पाद्य तद्बहिः सुशोभनां संपूर्णाम् ॥२६॥

किंच

तस्यान्तं चतुरश्रं तु
कर्तव्यं तत्प्रमाणतः ॥ २७ ॥

तस्येति वृत्तरेखान्तस्य पद्मस्य । तत्प्रमाणत इति वर्तुलरेखाप्रमाणरेखम् ॥ २७ ॥

सर्वस्यास्य विधेर्भित्तिभूतमाद्यं विधिं वक्तुमाह

पूर्वं ब्रह्म प्रसाध्यं तु
विषुवत्स्थेन हेलिना ।

ब्रह्म मध्यस्थानम् । हेलिः सूर्यः ॥

तत्रादौ

पूर्वपश्चात्तं[1] सूत्रं
शङ्कुना साधयेत्प्रिये ॥ २८ ॥

द्वादशाङ्गुलमानेन

शङ्कुः कीलकम् ॥ २८ ॥

कथम्

मध्ये शङ्कुं प्ररोप्य तम् ।
पार्श्वेषु भ्रामयेद्रेखां
षोडशाङ्गुलसंमिताम् ॥ २९ ॥

शङ्कुक्षेत्रात् षोडशाङ्गुलं भ्रमं द्वात्रिंशदङ्गुलपद्मार्थं दद्यात् । एतच्च जिघृक्षितक्षेत्रोपलक्षणपरम् ॥ २९ ॥

---

१ क० ग० पु० पश्चात्तु तमिति पाठः ।

तत्र च

पूर्वाह्णे ग्राहयेच्छाया-
मपरस्थां सुचिह्नताम् ।
अपरस्थेन सूर्येण
प्राक्छायां लाञ्छयेत्प्रिये॥३०॥

एवं भ्रमरेखाच्छायापृष्ठे पूर्वापरदिगङ्कनां कृत्वा

ध्रुवेणोत्तरदक्षस्थां
लाञ्छयेत्तु वरानने ।

ध्रुवेण शङ्कुना हेतुभूतेन पूर्वनिर्णीतदिशोः[1] स्थापितमत्स्यद्वयमध्यसूत्रेण उत्तरदक्षस्थां भ्रमरेखां लाञ्छयेत् । यद्वा क्वचिद्रात्रावेव विधातव्ये यागे ध्रुवेणेति चतुर्दशतारकारब्धशरीरेण ध्रुवनाम्ना निश्चलेन तारकेणादौ उत्तरदक्षिणदिक्सिद्धिं कुर्यात्। तत्र चैवमामनन्ति—सुषिरनाडिकामुखेन ध्रौवीं[2] मुखतारामुत्तरदिक्संस्थां लक्ष्यीकृत्य तन्नाडिकानुसारेणोत्तरां

---

१ क० ग० घ० दिशोत्थापितेति पाठः । २ क० ख० ग० पौर्वी मुखतारेति पाठः ।

दिशमङ्कयित्वा ध्रुवनाडितारानुसारेण मध्यं, तत्पुच्छतारानुसारेण च दक्षिणामङ्कयेत्। ततो मध्यरन्ध्रानुसारं[1] पूर्वापरेऽप्यङ्कयेत्[2]। अत एवान्यत्र

'ध्रुववेधेन वोदीचीम्.....।'

इत्युक्तम्। यत्तु तत्र

'प्राचीं वा ध्रुवतारया.....।

इत्युक्तं, तत्र ध्रुवतारासाम्येन मध्यं कल्पयित्वा तदनुसारं प्राचीं गृहीत्वा तदनुसारमितरां व्यवस्थापयेदिति योज्यम्। ध्रुवं ध्रुवस्थानग्रहणचतुरश्रीकरणपूर्वमेकोनपञ्चाशद्भागानां मध्यभागे पूर्वोक्तक्रमेण पद्मं कुर्यादिति।

उपसंहरति

ततः समालिखेत्पद्म-
मष्टपत्रं सकर्णिकम्॥ ३१॥

अथ

दिक्कोष्ठकांश्च संगृह्य
अष्टसंख्योपलक्षितान्।

---

१ क०ख०ग० मत्स्यरन्ध्रेति पाठः। २ क०ख० पूर्वामारोप्याङ्केति पाठः।

शेषा लोप्या वरारोहे
एकान्तरितयोगतः ॥ ३२ ॥

चतुर्दिक्कद्वारार्थं बहिःकोष्ठकपङ्क्तिं त्यक्त्वा मध्यपद्मानुसारं दिक्षु प्रतिदिक्षु चैकैककोष्ठकलोपान्तरितकोष्ठकाष्टकं पद्माष्टकार्थं गृह्णीयात् । एवं च मध्यवीथ्या पद्माष्टकक्षेत्रस्य द्वारवीथ्याश्चैकेनैव ग्रन्थेन स्वीकार उक्तः ॥३२॥

एवं चाष्टसु कोष्ठेषु
पद्माष्टकं ततो दिक्षु
कुर्यात् ॥
अथ
बाह्ये द्वाराणि चालिखेत् ।
कथं
वीथ्यर्धसंमितां देवि
शोभां चैव प्रकल्पयेत् ॥ ३३ ॥
उपशोभां च तन्मानां
कपोलान्तं समालिखेत् ।

तथा कण्ठं च तन्मानं
द्वारमेतत्प्रकीर्तितम् ॥ ३४ ॥

बाह्यवीथ्या मध्ये दैर्घ्ये सूत्रं दत्त्वा, आद्येऽर्धे वीथीं कृत्वा, परार्धं कल्पितवीथिक्षेत्रादूर्ध्वतोऽर्धमानां शोभां द्वारीयकण्ठपार्श्वोत्पद्यमानं विपुलमवयवमुपशोभां च तदधोगतं सूक्ष्मं भागं कल्पयेत्। कपोलो द्वारस्याग्रे विपुलो भागः। कण्ठस्तु कपोलपुरःसरो भागः तं च, तन्मानमिति निरूपितवीथ्यर्धमानं दैर्घ्यात्चैव वैपुल्याच्च कल्पयेत्। कपोलस्यात्र मानं यद्यपि अर्थसिद्धत्वान्नोक्तं तथापि तद्दैर्घ्यात् वीथिमानं वैपुल्यात्तदर्धमानमिति संहितान्तरादवसितम्,—इत्येतद्भागनिष्पत्त्या द्वारं निष्पद्यत इत्यर्थः ॥ ३४ ॥

तदित्थं

द्वाराष्टकविभागेन
नवनाभं पुरं स्मृतम्।

विदिशि द्वारस्याम्नातत्वात् प्रतिदिशं पद्मत्रयान्तरालद्वारद्वयं कुर्यात्। एवं च द्वाराष्टक-

विभक्तं नवनाभं [1]नवनाभिस्थानस्थनवपद्ममेतत्पुरमण्डलम् । अत्र च देवसंमुखं द्वारद्वयमपिहितं कार्यम् । यथोक्तं लक्ष्मीकौलार्णवे

'द्वारत्रयं पिधातव्यं पश्चिमं न पिधापयेत् ।
तच्च पूर्वं विजानीयाद्देव्या देवस्य संमुखम् ॥
पूर्वं तु पश्चिमं ज्ञेयं पश्चिमं पूर्वसंज्ञितम् ।
उत्तरं दक्षिणं ज्ञेयं दक्षिणं चोत्तरं तथा ॥
सामान्यः सर्वमन्त्राणां क्रमोऽयं शिवभाषितः ।
गोपनीयः प्रयत्नेन शिष्याणां दुष्टचेतसाम् ॥'

इति । एतत्तु गुरुपारम्पर्येणायातम् । तद्यथा—

'मूलाद्यक्षिपरप्रतीततनुगद्वाराष्टकोर्ध्वोन्मनो[2]-
घोरादित्रितयत्रयात्मविकचज्योतिर्नवाब्जद्युतिम् ।
मूलादिग्रहतत्त्वपर्वभुवनाभेदप्रथं भैरवं
स्वं वन्दे नवनाभमण्डल[3]रहःसारं नवात्मेश्वरम् ॥'

इति । अस्यायमर्थन्यासोऽत्र

'धाम्ना तु रजसां पातस्सिताद्यश्चागमोदितः ।' (४।३४)

इति पूर्वमुक्तत्वादागमान्तरोक्तविभागोऽ[4]नुसर्तव्यः । स च

---

१ क० ख० ग० घ० पु० नवं नाभिस्थानस्थेति पाठः । २ ख० पु० धोंन्मने घोरेति पाठः । ३ ख० पु० वहःसारमिति पाठः । ४ ख० अनुमन्तव्य इति पाठः ।

'लेख्या चात्र सिता रेखा शालिपिष्टकृता पुरः।
हरिद्रावर्णसंमिश्रा कर्णिका पीतपिञ्जरा॥
सितपीतारुणानां स्यात्केसराणां त्रयं दले।'
'तानि शुक्लानि वा कुर्याद्धरितान्यन्तराणि वा।
कोणा रक्ताः सितं पीठं प्रतिरेखा सिताङ्गुलात्॥'

इति। तथा

'अङ्गुष्ठः शक्तिमान्बिन्दुश्चतस्रोऽङ्गुलयः कलाः।
तदाधारं रजः कृत्वा शक्तिस्पर्शं च बिन्दुना॥
पातयेच्छक्तिगर्भं तत्तेन तच्छक्तिमण्डलम्।'

इति श्रीपरायामस्ति। अथवा

'सितं पद्मं विजानीयात्केसरांस्तु विचिन्तयेत्।
सितान्पीतांस्तथा रक्तान् मूलमध्याग्रतः क्रमात्॥
कर्णिका हेमसंकाशा पुष्करा हरिताः स्मृताः।'

इति। इहान्तर्यागोक्तध्यानानुसारं रजःपातः कार्यः॥

अथ

स्नात्वा तु विधिवद्देवि
प्रविशेद्भवनं.....

द्वारार्चां कृत्वा

.....गुरुः॥ ३५॥

---

१ ख० पु० सितास्तथेति पाठः।

ततः

पूर्वोक्तेन विधानेन
सकलीकरणादिकम् ।

कुर्यात् ॥

ततः संपूजयेद्देवं
भैरवं परमेश्वरम् ॥ ३६ ॥

केन

प्रणवेन

नवात्मसत्कबिन्दूपलक्षितसमग्रोर्ध्वव्याप्ति-सतत्त्वेनेत्यर्थः ॥

किं कृत्वा इत्याह

आसनं दत्त्वा
शिवान्तं वरवर्णिनि ।

प्रणवेनेति काकाक्षिवदिहापि योज्यं, तेन पूर्वोक्तानन्ताद्यनन्तमध्यानन्तान्तव्याप्तिना प्रणवेनासनं तेनैवोन्मनान्तव्याप्तिना तून्मनाभिन्नपरमशिववादिना भैरवं पूजयेदित्यत्रार्थः। वरमुत्कृष्टं परं तत्त्वं वर्णयति परामृशति तच्छीला वरवर्णिनी ॥

क्व किं कथं पूजयेदित्याह

मध्ये संपूजयेद्देवं
स्वच्छन्दं परमेश्वरम् ॥ ३७ ॥
पूर्वोक्तेन विधानेन
अङ्गषट्कसमन्वितम्।

मध्य इति पद्मकर्णिकायाम्। विधानमावाहनादिसुरार्घपर्यन्तं सर्वम्। अङ्गान्यपि अत्र प्रणवेनैव स्वनामजात्यन्तेन नवात्मनावयवभेदेन मन्त्रान्तरावकाशयोगात् एवं पद्मान्तरेष्वपि वक्ष्यमाणकपालीशादिभैरवतदङ्गपूजा मन्तव्या ॥ ३७ ॥

तदेवं मध्यपद्मे कर्णिकायां वर्णतद्वाच्यदेवतान्यासावुक्तौ, तत्पत्रेष्वप्याह

पत्राष्टके न्यसेद्वर्णान्
पूर्वादीशांस्ततः क्रमात् ॥ ३८ ॥

तत्र

सदाशिवं हकारेणे-
त्येवमादि वरानने।

प्रकृत्यन्तं विजानीया-
न्मध्ये पीठेशकल्पना ॥ ३९ ॥

पीठेशं स्वच्छन्दनाथं मध्यकर्णिकायां शिवतत्त्वाधिष्ठायकं विन्यस्य, सृष्टिक्रमेण नवात्मसंबन्धिहरक्षमलवयऊकारैः पूर्वादीशान्तदलाष्टके कपालीश शिखिवाहन-क्रोधराज-विकराल-मन्मथ-मेघनाद-सोमराज-विद्याराजान् सदाशिवेश्वरविद्यामायाकलानियतिपुरुषप्रकृतितत्त्वाधिष्ठायिनो विन्यस्यार्चयेदित्यर्थः ॥३९॥

मध्यपद्मे विधिमुक्त्वा पूर्वादिपद्मेषु संक्षेपेण निरूपयति

दिक्पद्मकर्णिकासंस्था-
नष्टौ देवान्प्रपूजयेत् ।

मध्यपद्मे पूर्वादिदलेषु यैरेव हकारादिभिर्वर्णैर्ये कपालीशादयो भैरवास्तानेव तैरेव वर्णैः पूर्वादिदिक्पद्मकर्णिकासु पूजयेत् ॥ ३९ ॥

पूर्वादिपद्मेषु स्वच्छन्दनाथस्य स्थानमाह

तत्स्थाने भैरवः पूज्यः

प्रणवेणैव पूर्वोक्तेन। पूर्वपद्मस्य मध्ये हकारेण कपालीशः, प्रणवेन तु पूर्वदले स्वच्छन्दः। आग्नेयपद्मस्य मध्ये रेफेण शिखिवाहनः, शिखिवाहनस्थाने आग्नेयपत्रे प्रणवेन स्वच्छन्दनाथः। एवमन्यत्। एवं चैकैकभैरवस्थाने पर्यायेण स्वच्छन्दनाथस्य विन्यस्तत्वात् तद्भेदव्याप्तिसारता सर्वभैरवाणां तदधिष्ठेयानां च सर्वतत्त्वानां शिवतत्त्वव्याप्तिमयतैव दर्शिता,—इति परमाद्वयमयतया महारहस्यसारता अस्यानुष्ठानस्य प्रकटिता, अतश्च 'सर्वतः [२]सर्वेभ्य' इति रूपविशेषेण मन्त्रपदार्थः स्फुटीभूतो जात इत्यलम्॥

पूर्वादिदलानां कपालीशादिस्वपीठेश्वरदलव्यतिरिक्तेषु दलेषु मध्यपद्मदलोक्त एव न्यासादिविधिरित्याह

शेषा वर्णैर्यथाक्रमम्॥ ४०॥

एष च वर्णन्यासः पूर्वमेवास्माभिः प्रस्तारेण दर्शितः। अत्र च पृथक्पृथक् पद्मस्थित्या

---

१ ख० ग० घ० भैरवेनैवेति पाठः। २ ग० पु० सर्वतः शर्वेभ्य इति पाठः।

नव, सामस्त्येन चैक इति दश देवगृहा जाताः, भगवतो विद्याराजस्य बिन्दुसतत्त्वत्वात् तदवयवानामपि पूजाकाले बिन्दुयोगोऽवश्यंभावी, एकैकोऽपि च वर्णः प्रदर्शितक्रमव्याख्या संपूर्णविद्याराजस्फार एव । यद्वक्ष्यति

'यतः सर्वगतो देवः सर्वेष्वन्तर्गतः स्मृतः ।
तत्सिद्धिमुक्तिदातासौ न वर्णाः परमार्थतः ॥'(८।२५)

इति ॥

एवं सृष्टिक्रमेण न्याससमुक्त्वा संहारक्रमेण दीक्षामाह

शोधयेच्च प्रकृत्यादि-
शिवान्तं सुरसुन्दरि ।

प्रकृतिर्वाच्यरूपा आदिः शिवश्चान्ते यस्य पदजातस्य तच्छोधयेत् ॥

कथम्

ईशानदिश आरभ्य
मध्यपीठं विशोधयेत् ॥ ४१ ॥

ईशानदिक्पद्मगतेशानदिक्पत्रात् पूर्वोत्तरादिक्रमेण प्रणवाद्यूकारान्तं पदनवकं प्रण-

वविद्याराजोच्चारपूर्वकमुच्चार्य, प्रकृतितत्त्वस्य अन्तर्णीतक्षित्यादिगुणतत्त्वान्ततत्त्वजातस्य पूर्ववदन्तर्भूतेतराध्वप्रपञ्चस्य चात्रैवान्तर्भावं भावयित्वा, 'पदनवकाय नमः' इत्यन्तेन मन्त्रेणोपस्थानादि पूर्वोक्तं सर्वं विधिं कुर्यात् । एवमनेन क्रमेण पदानि तावद्विशोधयेत् यावच्छिवतत्त्वव्यापकं मध्यपद्मगतमूकारादिप्रणवान्तं पदनवकम् । यस्तु 'प्रकृतितत्त्वरूपादिपदनवकाय नमः' इति केनचित्क्रमो दर्शितः, स न युक्तः कलादीक्षोक्तपदक्रमस्य नवात्मवर्णगतप्रातिलोम्यक्रमोच्चारस्य च प्रसिद्धस्यावृत्त्यामापत्तेः[1] पूर्वस्य संहारक्रमस्य चोपेक्षणात् । अत्र पददीक्षायां नवतत्त्वदीक्षावन्नाभ्यन्ताद्यनाश्रितान्ते स्थाननवके पद्मनवकगतवर्णैकाशीतेर्न्यासः कार्यः ॥ ४१ ॥

एवं पदाध्वानं शोधयित्वा

योजयेत्तु परे तत्त्वे
शिवे परमकारणे ।

---

१ ख० पु० मावृत्त्यासेति पाठः ।

वर्णादिदीक्षामपि अतिदेशेनातिदिशति

एवं वर्णास्तथा मन्त्रा-
न्भुवनानि विशोधयेत् ॥ ४२ ॥

किमवधीत्याह

कालाग्न्यादि शिवान्तं तु

कथं वर्णमन्त्रभुवनदीक्षाः कुर्यादित्याह

कलावधि समाश्रयेत् ।

कलादीक्षोक्तप्रघट्टकपञ्चकानुसारेण वर्णादीन् प्रत्येकं विभज्येत्यर्थः । अत्र कलादीक्षावन्मन्त्रा अधिक्रियन्ते । इह च वर्णानां

'शब्दराशिसमुत्थस्य.....।' (स्पन्द ४।१५)

इति नीत्या बन्धकत्वं, पदमन्त्राणां तु तत्तद्भिन्नाभिन्नतत्त्ववाचकत्वेन । यथा च मन्त्राणां शोध्यत्वेऽपि शोधकत्वं तन्निर्णीतमेवेति तदेवेह स्मर्तव्यम् । तदेवमिह त्रिपञ्चनवषट्त्रिंशद्भेदेन चतुष्प्रकारा तत्त्वदीक्षा पदमन्त्रवर्णभुवनदीक्षाश्चोक्ताः । तत्र पञ्चदीक्षायां 'कलानां

यावती व्याप्तिः' इत्यतिदेशात् वर्णमन्त्रभुवन-दीक्षासु च 'कलाविधिसमाश्रयात्' इत्युक्तत्वात् कलावदध्वपञ्चकान्तर्भावश्चिन्त्यः ।

पददीक्षायां तु नवधा विभक्तायाः प्रथमे प्राकृते प्रणवाद्यूकारान्ते पदानां नवके निवृत्ति-प्रतिष्ठे कले, पृथिव्यादीनि प्रधानान्तानि पञ्च-विंशतितत्त्वानि, भुवनानां कालाग्न्यादियोगाष्ट-कान्तं शतं चतुष्षष्ट्यधिकं, क्षादिटान्ताश्च-तुर्विंशतिर्वर्णाः, सद्योजातवामदेवहृदयशिरः-शिखाः पञ्च मन्त्राश्चान्तर्भूताः ॥ १ ॥

पौरुषे ऊकारादियकारान्ते नवके विद्या कला, पुरुषरागौ तत्त्वे, तुष्टिसिद्धी भुवने, अणि-मादिगुरुशिष्यपङ्क्तित्रयनाडीविग्रहाष्टकदेहपा-शागन्तुगणेशविद्येशपाशभुवनानि दश सुहृष्टा-दिरुद्रदशकस्य कल्याण्यादेर्गुरुशिष्यदशकस्य भुवनमिति चतुर्दश भुवनानि, ञझौ वर्णौ, मन्त्रावघोरकवचौ ॥ २ ॥

ऊकारादिवकारान्ते नैयते नवके कलामन्त्रौ

---

१ ख० ग० पु० गुरुशिष्यदशकस्य भुवनमित्येवंविधः पाठः ।

प्राग्वत् । एवमुत्तरत्रापि नियतिविद्ये तत्त्वे, वामदेवाद्यष्टकभुवनं वामादिनवकभुवनं च, जछौ वर्णौ ॥ ३ ॥

ऊकारादिलकारान्ते कालीये नवके काल-कले तत्त्वे, शुद्धादिदशकभुवनं महादेवादि-भुवनत्रयं च, [1]चडौ वर्णौ ॥ ४ ॥

ऊकारादिमकारान्ते मायीये नवके माया तत्त्वं, गोपत्याद्यनन्तान्तानि सप्त भुवनानि, घ-वर्णः ॥ ५ ॥

ऊकारादिक्षकारान्ते विद्यापदनवके विद्या-तत्त्वं, त्रि[2]गुणादिविद्याराज्ञीभुवनमेकं, शान्ता कला, तत्पुरुषास्त्रे मन्त्रौ, ग-वर्णः ॥ ६ ॥

ऊकारादिरेफान्ते ऐश्वरे नवके कलामन्त्रौ प्राग्वत्, ऐश्वरं तत्त्वं, ईश्वरभुवनादिज्ञान-क्रियाभुवनान्तं भुवनपञ्चदशकं, ख-वर्णः ॥७॥

ऊकारादिहकारान्ते सादाशिवे नवके सादा-शिवं तत्त्वं, सादाशिवमेव सु[3]शिवाद्यनन्तभुवन-व्यापकमेकं भुवनं, क-वर्णः ॥ ८ ॥

---

१ ख० ग० पु० चलाविति पाठः । २ ख० ग० पु० त्रिगुण्यादीति पाठः । ३ क० ख० ग० पु० सशिवाद्येति पाठः ।

ऊकारादिप्रणवान्ते शैवे नवके शान्त्यतीता कला, शक्तितत्त्वाभिन्नं शिवतत्त्वं, शान्त्यतीताभुवनादिकानि शिवभुवनान्तानि षोडश भुवनानि, नेत्राभिन्नमूर्तिः ईशानमन्त्रः, विसर्गाद्या हकारान्ताः षोडश वर्णाः ॥ ९ ॥

पददीक्षावत् नवतत्त्वदीक्षा । तत्र पदस्थाने प्रकृत्यादितत्त्वानि उपस्थाप्यानि, तत्त्वस्थाने तु पदान्यन्तर्भाव्यानि इति विशेषः ।

त्रितत्त्वदीक्षायां तु आत्मतत्त्वे क्षित्यादिमायान्तानि एकत्रिंशत्तत्त्वानि, निवृत्तिः प्रतिष्ठा विद्या कलाः, कालाग्न्याद्यनन्तान्तं भुवनानां शतमेकनवत्यधिकं, प्रकृतिकोष्ठकेशादिग्गतप्रणवात्प्रभृति पूर्वपद्मगतयाम्यक्षकारान्तं पदान्येकोनसप्ततिः, सद्योजातवामदेवाघोरहृदयशिरःशिखाकवचाः सप्त मन्त्राः, क्षादिघान्ता एकत्रिंशद्वर्णाः ॥ १ ॥

विद्यातत्त्वे शान्ता कला, विद्येश्वरसदाशिवास्तत्त्वानि, विद्याराज्ञ्यादिसदाशिवभुवनान्तानि सप्तदश भुवनानि, पदानि पूर्वपद्मात्

र-ओं-ह इति त्रीणि, मध्यपद्मादूकाराद्या हकारान्ता अष्टौ इत्येकादश, तत्पुरुषास्त्रे मन्त्रौ, ग-ख-क-वर्णाः ॥ २ ॥

शिवतत्त्वे शक्तिशिवौ तत्त्वे, पदं प्रणवः, भुवनादि प्राग्वत् ॥ ३ ॥

षट्त्रिंशत्तत्त्वदीक्षायां तु पृथिव्यां निवृत्तिः कला, अष्टोत्तरशतं भुवनानां, प्रकृतिपद्मान्नव पद्मानि प्रकृत्यन्तं तेषामेव नियुक्तत्वात्, स-द्योहृदये मन्त्रौ, क्ष-वर्णः ॥ १ ॥

जले प्रतिष्ठा कला, वामदेवशिरःशिखास्त्रयो मन्त्राः, पदानि पूर्वोक्तानि नव। एतानि मन्त्रकलापदानि प्रकृत्यन्तं यावत्। एवमेव ह-वर्णः, भुवनानि लकुलीशादीन्यमरान्तान्यष्टौ ॥ २ ॥

३ तेजसि स-वर्णः, भैरवादीनि हरिश्चन्द्रान्तान्यष्टौ भुवनानि।

४ वायौ ष-वर्णः, भीमादिगयान्तानि अष्टौ भुवनानि।

५ खे श-वर्णः, स्थाणवादिवस्त्रापदान्तानि भुवनान्यष्टौ।

६ गन्धे व-वर्णः, शार्वं भुवनम्।
७ रसे ल-वर्णः, भुवनं भवस्य।
८ रूपे र-वर्णः, भुवनं पशुपतेः।
९ स्पर्शे य-वर्णः, ईशानभुवनम्।
१० शब्दे म-वर्णः, भीमभुवनम्।
११ उपस्थे भ-वर्णः, कश्यपभुवनम्।
१२ पायौ ब-वर्णः, मित्रस्य भुवनम्।
१३ पादे फ-वर्णः, विष्णोर्भुवनम्।
१४ पाणौ प-वर्णः, इन्द्रस्य भुवनम्।
१५ वाचि न-वर्णः, अग्नेर्भुवनम्।
१६ घ्राणे ध-वर्णः, पृथ्व्या भुवनम्।
१७ जिह्वायां द-वर्णः, वरुणस्य भुवनम्।
१८ चक्षुषि थ-वर्णः, रवेर्भुवनम्।
१९ त्वचि त-वर्णः, वायोर्भुवनम्।
२० श्रोत्रे ण-वर्णः, दिशां भुवनम्।
२१ मनसि ढ-वर्णः, चन्द्रस्य भुवनम्।
२२ अहंकृतौ ड-वर्णः, स्थलेश्वरादिछगलाण्डान्तानि भुवनान्यष्टौ।
२३ बुद्धौ ठ-वर्णः, देवयोनिक्रोधतेजोयोगाष्टकानि चत्वारि भुवनानि।

२४ अन्तर्भूतगुणतत्त्वे प्रधाने ट-वर्णः, गुरुपङ्क्तित्रयादाद्यानां शिवशक्तियोक्तृणां त्रीणि भुवनानि क्रोधेश्वराष्टकभुवनं प्रकृतिभुवनं चेति पञ्च भुवनानि। एतावत्पर्यन्तं कलामन्त्रपदानि प्राग्वत् ।

२५ पुंसि विद्या कला, अघोरकवचौ मन्त्रौ, मायान्ते षट्के कलामन्त्रौ एवमेव, ऊकारादियकारान्तमुत्तरदिक्पद्मगतं पदनवकं, ञ-वर्णः, तुष्टिसिद्धिगुरुशिष्यपङ्क्तित्रयनाडीविग्रहाष्टकदेहपाशागन्तुगाणेशवैद्येशपाशभुवनानि द्वादश।

२६ नियतौ वायव्यपद्मगतमूकारादिवकारान्तं पदनवकं, झ-वर्णः, वामदेवाद्यष्टकभुवनम् ।

२७ कालतत्त्वे ऊकारादिलान्तं वारुणपद्मगतं पदनवकं, ज-वर्णः, शुद्धादिशंभुराडन्तशिवदशकभुवनानि ।

२८ रागे पौरुषमेव पदनवकं, छ-वर्णः, सुहृष्टादिरुद्रदशकस्य भुवनं, कल्याणादेश्च गुरुशिष्यदशकस्य भुवनम् ।

२९ अशुद्धविद्यायां नैयतमेव पदनवकं, च-वर्णः, वामादिमनोन्मनान्तं भुवननवकम् ।

३० कलायां पदनवकं कालीयमेव, ङ-वर्णः, महादेवमहातेजोमहाज्योतिषां भुवनत्रयम् ।

३१ मायायां निवृत्तिपद्मादूकारादिमान्तं पदनवकं, घ-वर्णः, गोपत्याद्यनन्तान्तानि सप्त भुवनानि ।

३२ शुद्धविद्यायां याम्यपद्मादूकारादिक्षान्तं पदनवकं, शिष्टं पददीक्षावत् ।

३३ ईश्वरतत्त्वे आग्नेयपद्मादूकारादिरेफान्तं पदनवकं, शिष्टं पददीक्षावत् ।

३४ सदाशिवतत्त्वे प्राक्पद्मादूकारादिहान्तं पदनवकं, शिष्टं पददीक्षावत् ।

३५ शक्त्यभिन्ने शिवतत्त्वे मध्यपद्मादूकारादिप्रणवान्तं पदनवकं, शिष्टं पददीक्षावत् ।

अध्वव्याप्तिरियंग्रन्थे सूचिता[1] न स्फुटीकृता ।
सम्यग्दीक्षाविधिष्वत्र धीः सुधीभिर्निधीयताम् ॥

---

१ ग० पु० सूचिताप्यस्फुटीकृतेति पाठः ।

एवमीदृगेकतमप्रकारकृतदीक्षं निर्बीजदीक्षादीक्षितवर्जं शिष्यम्

समयाञ्छावयेत्पश्चा-
त्तन्त्रान्नायोत्थितान् प्रिये ॥४३॥

तन्त्ररूपादित आम्नायादुत्थितानित्यनेन स्रोतोभेदेन समयानां भिन्नाभिन्नरूपतैव इति सूचयति ॥ ४३ ॥

तानाह

न निन्देद्भैरवं देवं
शास्त्रं वान्यसमुद्भवम् ।

लौकिकीं भेददर्शनवासनां च हित्वा तत्समुद्भवानि अन्यान्यपि तत्तदाचाराण्यपि भैरवशास्त्राणि तदुक्तं तत्तदुपासोपास्यं च तं तं देवविशेषं परभैरववद्वन्द्यतयैव पश्येदित्यर्थः ॥

किंच

सांख्यं योगं पाञ्चरात्रं
वेदांश्चैव न निन्दयेत् ॥ ४४ ॥

तद्दर्शनस्थांस्तदनुपपत्तिदर्शनेन प्रयोजकव्यापारेण न तन्निन्दायां प्रयुञ्जीतेत्यर्थः ॥४४॥

अत्र हेतुः

यतः शिवोद्भवाः सर्वे
ह्यपवर्गफलप्रदाः ।

तत्तत्स्वोचितमुक्तिकारिणः तावन्मात्रविश्रान्तानां वाक्यैकवाक्यतया परिपूर्णव्याप्तिविदां सद्योमुक्तिदा अपि

'अदृष्टविग्रहाच्छान्तात्..... ।'(८।२७)

इति भाविनीत्या नानारूपाच्छिद्यात् सर्वशास्त्राणां उत्पन्नत्वेन तदभिन्नव्याप्तिकत्वात् । अनेनैवाशयेन

यतः शिवोद्भवं सर्वं शिवधामफलप्रदम् ।

इति पाठं पुराणपुस्तकदृष्टमिह केचित् पठन्ति । पूर्णव्याप्त्यवेद्यभिप्रायेण तु

'सर्वान्भ्रमयते माया ह्यमोक्षे मोक्षलिप्सया ।' (१०।११३९)

इत्यादि वक्ष्यति ॥ ४४ ॥

किंच

स्मार्तं धर्मं न निन्देत्तु
आचारपथदर्शकम् ॥ ४५ ॥

तदाचाररतानां न बुद्धिभेदं कुर्यादित्यर्थः ॥

ब्रह्मादिदेवता याश्च
मातरश्चुम्बको गिरिः ।
वीराश्चैव भगिन्यश्च
गावो भूतगणास्तथा ॥ ४६ ॥

ब्रह्मादीन्युल्लङ्घनीयान्यपि कारणानि, मातरो लौकिकाचारतो ब्राह्म्याद्याः, चुम्बति वक्त्रपारम्पर्येण शिष्यं प्रबोधयति रहस्यार्थे यः स गुरुः, गिरिरिव गिरिः मन्त्राराधनादावविचलः साधकः, वीरा रहस्यचर्यानिष्ठाः, भगिन्यो मातृभक्ता योगिन्यो, गावः पशुशास्त्रप्रतिपादितपवित्रभावाः, भूतानि पिशाचापस्मारादीनि, गणाः प्रमथाः। एतान्सर्वान्न निन्देदिति संबन्धः ॥ ४६ ॥

किंच

देवद्रव्यं न हिंस्यात्तु
सिद्धान्ते यद्व्यवस्थितम् ।

सिद्धान्ते निश्चये यद्व्यवस्थितं तद्देवार्थमेवेदं द्रव्यमिति तन्न हिंस्यात् ॥

किंच

गुरोरन्नं न भुञ्जीत
अदत्तं परमेश्वरि ॥ ४७ ॥

गुरुणा यन्न प्रसादीकृतं तत्तदीयमन्नमपि नाश्नीयात् ॥ ४७ ॥

मद्यं मांसं तथा मत्स्या-
नन्यानि च वरानने ।
साचारांश्च निराचारां-
ल्लिङ्गिनो न जुगुप्सयेत् ॥४८॥

अन्यानीति वीरद्रव्याणि, निराचारानिति तद्रूपेण निह्नुततत्स्वरूपाणां सिद्धानामपि भावात् न जुगुप्सीत ॥ ४८ ॥

चरुकं प्राशयेन्नित्यं
स्वेष्टदेवतायै दत्तम् ॥
गुरून्संपूजयेत् सदा ।
अन्यथा नित्यार्चाधिकाराभावात् ॥

उपस्करान्महादेवि
पादेन तु न संस्पृशेत् ॥ ४९॥

उपस्करान् दृषदुलूखलमुसलादीनि गृहोपकरणादीनि, तेषां मतङ्गशास्त्रेषु नवयागविधौ देवतासंकेतस्थानत्वेनाम्नातत्वात् ॥४९॥

संहितां चिन्तयेन्नित्यं

संहितां शैवं शास्त्रम् ॥

भक्तानां[1] श्रावयेत्सदा ।

गुरुस्तदनुज्ञातोऽन्योऽपिवा, अतः प्राधान्येनायं गुरोरेव समयः ॥

आह्निकं न विलुम्पेत्तु
संध्याकर्म वरानने ॥ ५० ॥

आह्निकं पूजादिनित्यकर्म, संध्यां संध्याकालसंपाद्यां मन्त्रोपासाम् ॥ ५० ॥

अदीक्षितानां पुरतो
नोच्चरेच्छास्त्रपद्धतिम् ।

शास्त्रपद्धतिं पारमेशशास्त्रप्रक्रियाम् ॥५०॥

---

१ ख० पु० भक्त्या तामाश्रयेदिति पाठः ।

साधकविषयमाह

त्रिकालं पूजयेद्देवं
जपध्यानरतः सदा ॥ ५१ ॥

प्रातर्मध्याह्ने सायं च ॥ ५१ ॥

तदेतान्यथायोगं पुत्रकादिः

समयान्पालयेन्नित्य-
मुभयार्थफलेप्सया ।

उभयार्थमैहिकमामुष्मिकं च फलं भोगो मोक्षश्च ॥ ५१ ॥

तदित्थं समयश्रवणान्तां क्रियादीक्षा-मुक्त्वा, ज्ञानदीक्षां निरूपयितुमाह

अतो विज्ञानदीक्षां तु
प्रवक्ष्याम्यनुपूर्वशः ॥ ५२ ॥
अध्यात्मगतिचारेण
केवलेन विशोधिकाम् ।

अनुपूर्वशो वक्ष्यमाणोद्घातक्रमेण। अध्यात्ममात्मनि गत्या ज्ञानेन यश्चारः सौषुम्न-मार्गारोहः तेन। केवलेन होत्रादिहीनेन ॥

तत्र

शिष्यात्मानं गृहीत्वा त-
मात्मप्राणे नियोजयेत् ॥ ५३ ॥

अभिमानं तथोच्चार्य
कुर्याद्वै पूर्ववत्तदा ।

अभिमानम्

'अहमेव परो हंसः..... ।'(४।३९५)

इत्युक्तरूपम् ॥ ५३ ॥

एतत्सर्वं पूर्वोक्तमनूद्य, विशेषमाह

उद्घातैश्च ततोऽध्वानं
शिष्यस्य तु विशोधयेत् ॥५४॥

ततः समुच्चरंस्तत्त्वं
पृथिव्याद्यं तु सुव्रते ।

तत्त्वं निष्कलस्वरूपं पूर्वोक्तमुद्राबन्धयुक्त्या सम्यगुच्चरन् पृथिव्याद्यमध्वानं भावनया वि-न्यस्तं विशोधयेत् ॥ ५४ ॥

कथमित्याह

भिन्नाभिन्नस्वरूपेण
एकैकं तु यथाक्रमम् ॥ ५५ ॥
सस्वरं ह्यक्षरोच्चारं
देवताभिः समन्वितम् ।

मन्त्रकलाव्याप्त्या भिन्नेनाविकल्पविमर्शैक्याच्च अभिन्नेन स्वरूपेणोपलक्षितं, तत एव देवताभिर्ब्राह्मयाद्याभिः सम्यगभेदव्याप्त्यान्वितम्, एकैकमकारोकारमकारादिरूपमक्षरं, सस्वरमित्यान्तरोच्चारवत्पश्यन्तीविमर्शप्रधानम्, अत एव चाक्षरोच्चारमविचलितमन्त्रध्वनिरूपं कुर्वन्निति शेषः ॥ ५५ ॥

तदत्र

'आब्रह्मरन्ध्रं भ्रूमध्यात्सन्ति पञ्च धरादयः ।
ग्रन्थयः कारणैः सार्धं तान्भित्त्वा प्राप्यते शिवः ।'

इत्याम्नायान्तरोक्तस्थित्या भ्रूमध्यादिपदावस्थितसुसूक्ष्मपृथिव्यादिग्रन्थिपञ्चकभेदमुद्घातयुक्त्या आदिशति देवः

बिन्दुना शक्तिसंयोगा-
दुद्भातः प्रथमः स्मृतः ॥ ५६ ॥

देवतात्रयनिर्मुक्तः

पूर्ववच्छिष्यचैतन्यं स्वप्राणे लीनं कृत्वा, पूर्वोक्तकरणबन्धपुरःसरं हृदयान्मध्यशक्ति-प्रसरयुक्त्याकृतकविमर्शसारं मन्त्रमुच्चरन्, मात्रविमर्शप्रधानायास्तस्याः शक्तेर्बिन्दुना संयोगादिति भ्रूमध्ये वज्रलाञ्छितपीतवर्णचतुरश्रपार्थिवमण्डलमध्यध्यातबिन्दुतेजसा सम्यगिति ऊर्ध्वोच्चारक्रमेण योगात् तदनुभवात् प्रथमोऽयमुद्भातो ब्रह्मविष्णुरुद्राख्यदेवतात्रयेण निर्मुक्तः ईश्वराख्यमन्त्रदेवतासमापत्त्यात्मा पञ्चगुणपृथ्वीतत्त्वगतगन्धाख्यमुख्यगुणसंशोधनरूप इत्यर्थः ॥

रसाख्यगुणशुद्ध्यर्थं द्वितीयमाह

चतुर्थान्तसमन्वितः ।
उद्भातः स तु देवेशि
द्वितीयः परिकीर्तितः ॥ ५७ ॥

चतुर्थस्य बिन्दुस्थानस्यान्तोऽर्धचन्द्रः तेन प्राग्वत्सम्यगन्वितः तदनुभवावेशरूप इत्यर्थः॥

रूपगुणशुद्ध्यर्थं तृतीयमाह

हंसाक्षरसमुच्चारः
सुदीर्घो बिन्दुसंयुतः।
अर्धचन्द्रान्निरोधिन्या-
मुद्घातस्तु तृतीयकः॥ ५८॥

हंसपथस्य हंसरूपस्य चाक्षरस्य निष्कलमन्त्रस्य सम्यगिति पूर्वोक्तयुक्त्या उच्चारः, सुदीर्घो

'ह्रस्वं दीर्घं प्लुतं सूक्ष्मम्.....।'(६।४)

इति भाविनीत्या मकारान्ते प्लुतः, ततोऽपि प्रथमोद्घातावधिना बिन्दुना सूक्ष्मरूपेण सम्यग्युतस्तद्विश्रान्तः, तथार्धचन्द्रात् द्वितीयोद्घातविश्रान्त्यवधेर्निरोधिकास्थानान्तं प्रसरंस्तृतीय इति पार्थिवरूपगुणशुद्धिकृदित्यर्थः॥ ५८॥

स्पर्शगुणशुद्ध्यर्थमाह

भिन्नोद्घातो यदा देवि
नादान्तस्तु तदा भवेत् ।
उद्घातः स तु देवेशि
चतुर्थः परिकीर्तितः ॥ ५९ ॥

भिन्ना उद्घाता इति प्रोक्तानि त्रीण्युद्घात-स्थानानि येन मन्त्रोच्चारेण स पुनर्यदा नादान्तो नादानुभवविश्रान्तो भवति, तदा स चतुर्थगुणशुद्ध्यर्थ उद्घात उक्तः । तदाशब्दो भवेच्छब्दानन्तरं योज्यते ॥ ५९ ॥

शब्दगुणशुद्ध्यर्थं पञ्चममाह

स एव चाक्षरोच्चारो
व्यापिन्यन्ते व्यवस्थितः ।
उद्घातः स तु देवेशि
पञ्चमः परिकीर्तितः ॥ ६० ॥

स चैवेति नैष्कलः । व्यापिन्यन्ते इति तद्विश्रान्तिरूढः । पञ्चम इति पञ्चमस्य शब्द-गुणस्य शुद्ध्यर्थम् ॥ ६० ॥

तदित्थम्

पञ्चोद्घातांस्ततो दत्त्वा
पृथिवीं शोधयेद्बुधः।

तत इति यतः पञ्चगुणा पृथ्वी, बुध इति ज्ञानी, अत्र पञ्चस्वपि उद्घातेषु बिन्दुस्थाने पार्थिवीं धारणां प्रत्येकं धृत्वा, उद्घातानुसारं बिन्द्वर्धचन्द्रनिरोधिनाद्व्यापिन्यन्तेषु विश्रान्तीः कुर्वन्, शिष्यात्मनो गन्धादिशब्दान्ते गुणपञ्चके भोग्यभोक्तृभावं शोधयेत्॥

इत्थं च व्यापिन्यन्ताश्रयणेऽपि सूक्ष्मव्याप्त्या पार्थिवतत्त्वभोगस्थानं बिन्दुधामैव[1] शुद्धं भवतीत्याह

अकारोकारमकारान्त-
मेवं शुद्ध्यति नान्यथा॥ ६१॥

अकारोकारमकाराणामन्तं बिन्दुस्थानम्, एवमिति व्यापिन्यन्तानुप्रवेशात्मकोद्घातपञ्चकात् शब्दान्तगुणपञ्चकसंशुद्धियुक्त्या पृथ्वी-

---

१ ख० पु० बिन्दुनामैवेति पाठः।

तत्त्वशोधनादित्यर्थः । नान्यथेति हुतिदीक्षायामेव तत्त्वशुद्धिर्भवतीति भेदवादिवन्नास्यां ज्ञानदीक्षायां संशयितव्यं हुतिदीक्षायामपि ज्ञानस्यैव प्राधान्यादिति निर्णीतत्वात् । उक्तं च श्रीमतङ्गपारमेश्वरेऽपि

'यस्य ज्ञानान्न संप्राप्तिः क्रिया तस्य विधीयते ।'

इति ॥ ६१ ॥

तदित्थम्

शुद्धेऽथ पार्थिवे तत्त्वे
चिन्तितव्यं तु योगिभिः ।
जलीभूतं तदेवैत-
दात्मना सह योगतः ॥ ६२ ॥

अथशब्दः क्रमं सूचयति,—स च शुद्धतत्त्वाच्छिष्यचैतन्यस्योद्धरणं, ततस्तत्स्थीकरणं, तत आत्मप्राणे योजनं मन्त्रप्राणशिष्यात्मस्वात्मनां सामरस्यभावनमित्यादिरूपः । तदेवेति पार्थिवं तत्त्वं, जलीभूतमित्युक्त्या शुद्धाशुद्धतत्त्वानुसंधानमुक्तम्, योगिभिर्योगत इत्यनेनायोगिनोऽत्र नाधिकारो जातुचिदिति

दर्शितम्। एतदात्मना सहेति शिष्यात्मानमपि जलतत्त्वभोगाय तदेकात्मतामिव प्राप्तं चिन्तयेत्। अत्र चावसरे अर्धचन्द्रस्थाने पद्मलाञ्छितसितवर्णार्धचन्द्रमण्डलमध्यगतजलबिन्दुरूपां जलतत्त्वधारणां बध्नीयादित्याम्नायः॥

अथ पार्थिवे तत्त्वे शिष्यात्मनि च यथोक्तभावनया

जलीभूते पुनर्मन्त्री
तदेव चतुरुच्चरेत्।
बिन्द्वन्तं धारणायुक्तं

तदेवेति निष्कलस्वरूपं, मन्त्रीति लब्धसामरस्यः, बिन्द्वन्तमर्धचन्द्रस्थानं, धारणा व्याख्याता। चतुरिति पूर्वोक्तयुक्त्यार्धचन्द्रनिरोधिनादव्यापिनीपदेषु क्रमेण विश्रान्तिरूपांश्चतुरुद्धातान् दद्यादित्यर्थः। पुनरुच्चरेदिति पाठे चतुष्टयसंख्यार्थाद्योज्या॥ ६३॥

तदित्थं जलतत्त्वं संशोध्य, पूर्वोक्तं सामरस्यान्तं क्रमं श्रित्वा, तज्जलतत्त्वात्

शिष्यादात्मनि चिन्तयेत्॥६३॥

अतश्च

शोधिते तोयसंघाते
तेजोभूतं विचिन्तयेत् ।

अर्थात्तदेव तोयं शिष्यात्मना सहेत्यादि प्राग्वत् ॥

अत्र च निरोधिकास्थाने शक्तिलाञ्छित-रक्तवर्णत्रिकोणमण्डलादिरूपां तेजस्तत्त्वधारणां बद्ध्वा निरोधिनादव्यापिनीस्थानेषु मात्र-विश्रान्तिरूपाः

तेजोद्धातास्त्रयस्तेषु
निरोध्यन्तमवस्थिताः ॥ ६४ ॥

तजोद्धाता इत्यैशः पाठः । निरोध्यन्तं कृत्वा तत्र तेजोधारणां बद्ध्वा इत्यर्थः ॥ ६४ ॥

तदेवं त्रिभिरुद्धातैः त्रिगुणे तेजसि पूर्व-वदन्तर्भूतेतराध्वपञ्चके शुद्धे

नास्ति तेजस्ततो वायु-
रुद्धातद्वयशोधितः ।

पूर्ववत्तत्स्थात्मस्थत्वादि कृत्वा, तेजः शान्तं विभाव्य, नादस्थाने षट्कोणबिन्दुलाञ्छित-नीलवर्णमण्डलादिरूपां वायुधारणां बद्ध्वा, नादव्यापिनीस्थानयोर्मान्त्रविश्रान्त्यात्मनोद्धा-तद्वयेन वायुतत्त्वं शिष्यात्मनो भोगस्थानं शोधयेत् ॥

अथ

आकाशे लीयमानं त-
मुद्धातेन तु चिन्तयेत् ॥ ६५॥

तं वायुम् ॥ ६५ ॥

एतद्व्यनक्ति

नष्टे वायौ ततः शून्य-
मुद्धातैकेन योजयेत् ।

नष्ट इति आकाशशेषीभूतत्वात् शिष्या-त्मनो बन्धकत्वाच्चलिते, तत इति सुसूक्ष्मत-ममाकाशतत्त्वमन्तर्भूतेतराध्वपञ्चकमुद्धातैकेने-ति आकाशस्यैकगुणत्वात् ॥

यच्चैतत्सुसूक्ष्मतमं शून्यम्
व्यापिनी सा तु विज्ञेया
पञ्चमान्ते व्यवस्थिता ॥ ६६ ॥

पञ्चमे व्योमतत्त्वात्मन्यन्ते व्यवस्थिता, तेनात्रान्तःशून्यसुसूक्ष्मशब्दशक्तिलाञ्छितपरिवर्तुलमण्डलाकारां व्योमधारणां बद्ध्वा, मन्त्रोच्चारणाभिज्ञो गुरुः शिष्यात्मना सहात्रैव विश्राम्यन् परतेजोमयतामनुसंदध्यात् ॥ ६६ ॥

एवं चात्र ज्ञानदीक्षामाहात्म्येन चरितार्थतया पुनर्भोगप्रदत्वाभावेन अबन्धकत्वात्सर्वैव भोग्यभूः शिष्यस्य शोधिता भवति, यतः चिदानन्देच्छाज्ञानक्रियाख्यशक्तिपञ्चकसामरस्यसतत्त्वः श्रीस्वच्छन्दभट्टारकः चिदादिशक्तिप्रधानशिवशक्तिसदाशिवेश्वरविद्याख्यतत्त्वपञ्चकात्मतामुट्टङ्कितामपि व्यापिन्यादिबिन्दुन्तग्रन्थिपञ्चकस्वरूपगोपनात्मकमहामायाशक्त्याच्छादयन्, मायादिक्षित्यन्तां क्रमात्क्रममधिकाधिकसंकोचां तत्त्वत्रिंशतं षड्भिः पञ्चकप्रघट्टकै-

---

१ क० पु० शब्दलाञ्छितेति पाठः ।

रन्योन्यं शक्तिव्यक्त्यात्मकव्याप्यव्यापकभाव-भाग्भिरासूत्रितवान् संकुचितप्रमातृभूमिकाया-मिति। तदनुग्रहप्राप्ततत्स्वरूपेण योगिना गुरुणा शिष्यात्मनैकीभूय यथोक्तोद्धातव्याप्तियुक्त्या शिष्यचैतन्यस्य समग्रां भोगभूमिं विलाप्य, ज्ञानदीक्षया चिदादिशक्तिपञ्चात्मकत्वमेवा-पादयितव्यम्। अत एव पञ्चत्रिंशत्तत्त्वव्या-प्तिसारसुसूक्ष्मपृथिव्यादीनि इत्थं संशोध्यापि तत्संस्कारमयं समनापदमपि शोधयितुमाह

समनायां ततो ह्यात्मा

सुसूक्ष्मतमतत्त्वप्रपञ्चमननमात्ररूपायां स-मनाशक्तौ गुरुणा शिष्यात्मा तावन्मात्रभेद-संस्कारनिवृत्त्यर्थं योज्य इत्यर्थः॥

एवं च

तत्त्वव्यापी स उच्यते।

अशेषतत्त्वप्रथमासूत्रणरूपं यत्समनाख्यं तत्त्वं तद्व्यापक इत्यर्थः॥

इयति च संस्कारपर्यन्ते तत्त्वजाते संशुद्धे शुद्धात्मतामाप्नोतीत्याह

आत्मव्यापी ततश्चोर्ध्वे

भवतीति शेषः ॥

एवमासादितपरशुद्धात्मस्वरूपोऽपि शिष्यात्मा ततोऽपि परां चिदादिशक्त्यभेदसारां परभैरवरूपतां समनन्तरवक्ष्यमाणयोजनिकाक्रमेणैतीत्याह

सर्वव्यापी ततः पुनः ॥ ६७ ॥

भवतीति शेषः ॥ ६७ ॥

अत्र योजनिकामासूत्रयितुमेकोद्धातरूपां युक्तिमाह

तत्त्वान्तसंस्थितो ह्यात्मा[1]
उद्धातैकेन योगवित् ।
योजयेत्परमे तत्त्वे
उन्मनातीतसर्वगे ॥ ६८ ॥

तत्त्वानामन्तः समनाया ऊर्ध्वं पदम् । उन्म-

---

१ ख० ग० पु० संस्थिते ह्यात्मेति पाठः ।

नातीत इति तदनुभवानुप्रवेशेन शक्तिमत्स्वरूपासादनम् ॥ ६८ ॥

योजयेदित्युक्तिं स्फुटयति

योजनां तु परे तत्त्वे
शृणु देवि वदाम्यहम् ।

अनयोक्त्यास्यार्थस्यावधानगम्यत्वं[1] दर्शयति

मन्त्रमुच्चारयेद्देवि
ह्रस्वं दीर्घं प्लुतं परम् ॥ ६९ ॥
परापरविभागेन
यावत्तत्त्वं परं गतम् ।

ह्रस्वं दीर्घं प्लुतं सूक्ष्ममतिसूक्ष्ममिति समनन्तरमेव पञ्चप्रणवाधिकारे अकारोकारमकारबिन्दुनादमात्राणां[2] प्रत्येकं प्रणवैकदेशभूतानामपि

'प्रदेशोऽपि ब्रह्मणः सार्वरूप्यमनतिक्रान्तः ।'

इति स्थित्या प्रणवत्वमिति वक्ष्यति, ततो ह्रस्वं मन्त्रमुच्चारयेदित्यादि सामानाधिकरण्यं

---

१ क० पु० धाने गम्यत्वमिति व्यस्तः पाठः । २ क० पु० नादमन्त्राणामिति पाठः ।

युक्तमेव । परापरविभागेनेति सूक्ष्मातिसूक्ष्म-भेदेनेत्यर्थः । परमुन्मनातीतं गतं प्राप्तम् ॥

तदत्र

त्रिदेवं बिन्दुसंयुक्त-
मर्धचन्द्रं निरोधिकाम् ॥ ७० ॥
नादं च शक्तिसंयुक्तं
व्यापिनीसमनोन्मनाः ।

जानीयादिति शेषः । त्रयाणां ब्रह्मादीनां देवानां समाहारो यत्र अकारोकारमकारात्मनि कलात्रये तत्तथा ॥ ७० ॥

किंच

उन्मना च परश्चैव
सर्वव्यापी शिवोऽव्ययः ॥७१॥

ज्ञातव्य इति शेषः । यथा चात्र ज्ञानं यादृशं च तत्सर्वं पूर्वमेव वितत्य निर्णीतम् ॥

तदित्थम्

ज्ञात्वा सर्वमशेषेण
विधिमेषां यथाक्रमम् ।

तदा तु योजयेन्मन्त्री
अन्यथा नैव योजयेत् ॥ ७२ ॥

सर्वमिति पूर्वोक्तचारप्रमाणादिपरिष्कृतमेषां मात्रप्रमेयानां विधिं सम्यगुच्चारणमशेषेण निश्चयनिरूढ्यनुभवैः अत एव मन्त्री सम्यङ्मात्रसतत्त्ववित् ॥ ७२ ॥

तमेव विधिं स्फुटयति

बिन्दुस्थं त्रितयं शब्दे

मन्त्रप्रमेयानां यन्मकारान्तं त्रितयं तद्बिन्दुस्थं विद्वदनुभवात्मतामापादितं सत् शब्दे नादात्मनि कुर्यात् तन्मयत्वमापादयेत् ॥

यस्मात्

चतुर्थो बिन्दुरेव हि ।

तस्मात् तद्विश्रान्तिपुरःसरमेव नादविश्रान्तं मकारान्तं त्रयं कुर्यात् ॥

तदेतत्त्रयम्

ब्रह्मा विष्णुस्तथा रुद्रः
वाच्यभेदात् ॥

एतच्च

त्रिमात्रं वर्ण उच्यते ॥ ७३ ॥

मात्रात्रयमेतदुच्चारणक्रियात्मकतया, वर्ण इत्यक्षररूपतया स्थूलमित्यर्थः ॥ ७३ ॥

चतुर्थस्तु

ईश्वरो बिन्दुदेवस्तु

तत्परामर्शमय इत्यर्थः ॥

तदित्थं मन्त्रोच्चारं यः करोति

कण्ठे शब्दः प्रवर्तते ।

तस्य हृदयादुच्चरन्नादकलात्मकमन्त्रसतत्त्वरूपः शब्दः कण्ठे प्रकर्षेण वर्तते ततः प्रभृति पञ्चप्रणवाधिकारवक्ष्यमाणनीत्या उच्चार्यतामासादयतीत्यर्थः ॥

स च

तत्र शब्दः क्रियान्तस्थः

उच्चारणक्रियान्तर्गतः पश्यन्त्यात्मकशब्दरूपो नतु मध्यावैखरीव्यङ्ग्य इत्यर्थः ॥

अत एवासौ

क्रियाशक्तिरिति स्मृता ॥७४॥

तदित्थमुच्चारणप्रयत्नगतः

स शब्दस्तालुके देवि
ईरितः संप्रवर्तते ।

तस्य

ततोऽपि

किंचिद्गतः शब्दो
नासिकान्ते प्रवर्तते ॥ ७५ ॥

नासिकान्तो भ्रूमध्यम् । तदेतावत्पर्यन्ता मात्री क्रियाशक्तिव्याप्तिः ॥ ७५ ॥

अथ

ज्ञानशक्तिस्तु विज्ञेया
यत्नतः परमेश्वरि ।
मूर्धस्थानगतः शब्दो
ललाटान्तमवस्थितः ॥ ७६ ॥

यदा स एव शब्दो योगिनः पूर्वोक्तात्

नासापुटादिप्रयोगरूपाद्यत्नान्मूर्धस्थानतोऽर्ध-चन्द्रादिस्थानान्युक्तोद्घातयुक्त्यारोहँल्ललाटा-न्तमवस्थितो भवति, तदा सूक्ष्मरूपतोप-संहारादनुभवप्रकर्षमापन्नो ज्ञानरूपतामेती-त्यर्थः ॥

तदित्थं बिन्द्वादिरूपतामासाद्याकारोकार-मकारात्मा

वर्णः शब्दगतः

शब्दं नादात्मतां गतः तद्रूपतामाप्तः ॥

तथाभूतश्च

तेषा-

मुद्घातः स तु कीर्तितः ।

तेषामिति बिन्द्वन्तानां, स एव नादकला-नुभवात्मा शब्दः पश्चादिभेदेन भिन्न उद्घातः पूर्वमुक्तो नत्वन्यः कश्चित् ॥

एवमियतीं भूमिं मात्रीमाश्रित्यापि

तत्रस्था विनिवर्तन्ते

ये ऊर्ध्वां शक्त्यादिसोपानमालिकामनारुह्य तत्रैव संतुष्यन्ति, ते

शिवज्ञानविवर्जिताः ॥ ७७ ॥

नादतुष्टाः परमानन्दमयशिवज्ञप्तिसाधकतमां मात्रीमिच्छाशक्तिमेव नाविशन्ति कुतस्तु शिवम्,—अत उत्तरोत्तरपदारोहे यत्नः कार्य इत्यर्थः ॥ ७७ ॥

अथात्रैव बिन्द्वादिपदेषु सूक्ष्मतमानुभवगम्यं भाविनमेवान्तरं प्रविभागं दर्शयितुमाह

पञ्चधावस्थितो बिन्दु-
र्धचन्द्रो निरोधिका ।

भुवनाध्वनि बिन्द्वावरणस्य निरूपणावसरे वक्ष्यति

'निवृत्तिश्च प्रतिष्ठा च विद्या शान्तिस्तथैव च ।
परिवारः स्मृतस्तस्य शान्त्यतीतस्य सुव्रते ॥
तस्य वामदिशो भागे शान्त्यतीता व्यवस्थिता।'(१०।१२१६)
इति । तथा

'ज्योत्स्ना ज्योत्स्नावती कान्तिः सुप्रभा विमला शिवा ।
अर्धचन्द्रे स्मृता ह्येता निरोध्यंशे तु सुव्रते ॥
रुन्धनी रोधनी रौद्री ज्ञानबोधा तमोपहा।'(१०।१२१९)

इति । एवमेषां पञ्चधावस्थितत्वम् ॥

अथ

तस्यातीतो भवेन्नादः

तस्येति निरोध्यनुभवपर्यन्तव्याप्तिकबिन्दुदेवस्य, तं बिन्दुदेवमतीतः सन् स वर्णो नादो भवति नादामर्शरूपतामेति, तमिति वक्तव्ये तस्येत्युक्तिः बिन्दोरेवेयं नादरूपतापत्तिरेवमुत्तरत्रापि पूर्वपूर्वावस्थैव उत्तरोत्तरं प्रकर्षमेतीत्याशयेन षष्ठी योज्या ॥

एतदनुभवे युक्तिमाह

अवच्छिन्नस्त्वसौ भवेत् ॥७८॥

ईषत्प्रसारिते वक्त्रे

पूर्वोक्तदिव्यकरणबन्धेनावच्छिन्नतामेतीत्यर्थः ॥

एष च

देवदेवः सदाशिवः ।

देवस्य द्योतनसतत्त्वस्य बिन्दोरपि, देवः सातिशयदीप्तः प्रभुश्च ॥

एष च नादरूपः

चतुर्विधो भवेच्छब्दो

यः सुवेगवहः स्मृतः ॥ ७९ ॥

नादावरणे वक्ष्यति

'इन्दिका दीपिका चैव रोधिका मोचिका तथा ।'(१०।१२२३)

इति । एताभिः शक्तिभिरस्य चतुर्विधत्वम् ॥

ननु च

'ऊर्ध्वगा तु समाख्याता कला त्वासां तु पञ्चमी ।'

(१०।१२२४)

इति भविष्यति, तत्कथमस्य चातुर्विध्यं; सत्यं तस्यास्तु न शब्दव्याप्तिरित्याह

पञ्चमो न वहेच्छब्दः

यः पञ्चमः प्रकारो नासौ शब्दरूपतया वहतीत्यर्थः ॥

कथं तर्हि भवतीत्याह

ऊर्ध्वगामिन्यसौ स्मृता ।

नादोर्ध्वगतेच्छाऽव्याप्त्यवस्थितो[1] यः शक्तेः संस्पर्शस्तदभिन्नत एव नादान्तोऽव्यक्तध्वनिरिति चोच्यते इत्यर्थः ॥

---

१ ख० ग० पु० व्याप्त्यवस्थितायाः शक्तेः संस्पर्शात्तदभिन्नत इति पाठः ।

अथ

तस्यातीता भवेच्छक्तिः

तमपि नादयतीत्यर्थः ॥

साच

पञ्चधा तु व्यवस्थिता ॥ ८० ॥

तद्वक्ष्यति

'ऊर्ध्वे तु संस्थिता शक्तिः सुषुप्तभुजगाकृतिः ।'

इत्युपक्रम्य

'सूक्ष्मा चैव सुसूक्ष्मा च तथा चैवामृतामिता ।
व्यापिनी ..... ॥' (१०।१२३९)

इति ॥ ८० ॥

अत्र शब्दव्याप्तेः क्षीणत्वात् कीदृगनुभव इत्याह

स्पर्शस्तत्र भवेद्देवि

ह्लादात्मेति शेषः ॥

किंच

आत्मवित्तत्र पूर्ववत् ।

तत्र शक्तिपदे य आत्मवित् शक्त्यनुभवतुष्टः स पूर्ववदिति शिवपदं प्राप्नोतीति यावत्। एवमुत्तरत्रापि योज्यम्॥

अथातः

व्यापिनी परतश्चैव
पञ्चधा तु व्यवस्थिता॥ ८१॥

सोऽपि स्पृशन्नूर्ध्वपदमारुरुक्षुर्योगिनो व्याप्तिमयान् व्यापिनीरूपो भवति। तत्र च

'व्यापिनी व्योमरूपा चानन्तानाथाप्यनाश्रिता।'
(१०।१२५०)

इति वक्ष्यमाणसूक्ष्मतमशक्तिपञ्चकानुभवोऽस्ति॥ ८१॥

अत्र च

वालाग्रमाश्रितं स्पर्शं
कदाचिद्वेत्ति वा नवा।

कदाचिदिति तत्पदारोहावसरे त्वशेषस्पर्शं वेत्ति, नवेति तदारोहप्रकर्षे व्याप्तिमात्रमेवानुभवति नतु पृथक्स्पर्शमित्यर्थः॥

तदित्थम्

व्यापिनी सा समुद्दिष्टा
न ज्ञानं परमेश्वरि ॥ ८२ ॥

यदेतत्स्पर्शं वेत्ति नवेत्युक्तं सा व्यापिनीत्युपसंहृतं न ज्ञानमिति, नैषा ज्ञानशक्तिरपि तु इच्छाशक्तिरित्यर्थः ॥ ८२ ॥

अथ

तस्यापि समनातीता

तदपि व्यापिनीज्ञानमतिक्रम्य स्थितेत्यर्थः ॥

'समनं क्रमविज्ञानमुन्मनं युगपत्.....।'

इत्युक्त्वादुन्मनानुभवं प्रविविक्षुः

मनस्तत्र न कारयेत् ।

न तत्रैव तुष्येदित्यर्थः । तदियतीयमिच्छाशक्तिव्याप्तिर्मात्रीत्यवसेयम् ॥

समनायां भावाभावात्मनो विश्वस्य भेदस्यासूत्रणात् हेयत्वमस्ति इति तामतिक्रम्य

उन्मनापदमारोहन्

मध्ये केवलात्मतामनुभवतीत्याह

शुद्धात्मा तु ततो भवेत् ॥८३॥

तदित्थं शुद्धचैतन्यस्वरूपसामरस्यापन्नं

शिष्यात्मानं गुरुवर
उन्मन्यन्ते नियोजयेत्।

उन्मन्यामन्ते चेति समासः, स्वातन्त्र्यशक्तिसामरस्यात्मनि स्वतन्त्रभट्टारकसंवेदने विश्रमयेत् तत्समावेशाभिज्ञ इत्यर्थः॥

एवं च

तत्र युक्तः परे शान्ते
महाशान्तिमवाप्नुयात्॥ ८४ ॥

युक्त एकत्वं प्राप्तः। समस्तस्य भेदकलङ्कस्य गलनात् परं शान्तत्वम्॥

तदित्थम्

गुरुपारम्परायातः
संप्रदायः प्रकाशितः।

परम्परैव पारम्परं, गुरूणां शक्तिसदाशिवश्रीकण्ठादीनां पारम्परेणायातो रहस्यानुभव-

संचारक्रमेण मया विदितः, सम्यक् दीक्षणादिपूर्वं शक्तिपातभाजां प्रदीयते इति संप्रदायः, प्रकाशितः तवापि संक्रमणयुक्तिपूर्वं मया कथित इत्यर्थः । तदेवं गुरुतो लब्धोऽपि संप्रदायो यथारूढिमापन्नो गुर्वन्तरैः शिष्याणां संपाद्यते ॥

तत्र

योजने तु परे तत्त्वे
उपायः कथितस्तव ॥ ८५ ॥

'ज्ञात्वा चारप्रमाणं तु प्राणसंचारमेव तु ।' (२३१) इत्यादिना चतुर्थपटल एवेत्यर्थः ॥ ८५ ॥

तदित्थं सर्वोत्तममिमं संप्रदायम्

एवं ज्ञात्वा वरारोहे
सर्वकर्माणि कारयेत् ।

सर्वासु व्यवहारदशासु परिमाणमाहात्म्य[1] एव तिष्ठेदिति यावत् । आचार्यसाधकादींश्च स्वोचितेषु कर्मसु एतज्ज्ञानपूर्वकमेव प्रयुञ्जीतेत्यर्थः । वरारोह इति प्राग्वत् ॥

---

१ ख० ग० पु० परिणाममाहात्म्य एवेति पाठः ।

एवं तत्त्वदीक्षाप्रसङ्गोक्तेयं ज्ञानदीक्षा अन्याध्वदीक्षास्वपि कर्तव्या इति भङ्ग्या शिक्षां ददाति

तत्त्वाध्वानं कलाध्वानं
भुवनाध्वानमेव च ॥ ८६ ॥
वर्णमन्त्रपदाध्वानं
कृत्वैवं शुध्यति प्रिये ।

यथान्तर्भावितापराध्वपञ्चकं तत्त्वाध्वानमेवं कृत्वा इत्युद्घातपूर्वं परे तत्त्वे योजयित्वा शुद्ध्यति परभैरवतामाप्नोति गुरुः शिष्यात्मना सह तथान्यमपि अध्वानमेवमेव कृत्वा शुद्ध्यतीत्यर्थः ॥

उपसंहरति

एषा वै धारणादीक्षा

विज्ञानदीक्षामित्युपक्रम्यापि प्रोक्तधारणाक्रमेण क्रियमाणत्वात् धारणादीक्षा—इत्युपसंहारेऽपि न दोषः ॥

नैषा सर्वेण गुरुणा कार्येत्यभिदधद्भावि-

पटलमपि अवतितारयिषुः पाटलिकीं संगतिं करोति

कर्तव्या योगिनात्र तु ॥ ८७ ॥
मन्त्रसिद्धेन वा देवि

योगिना परसमावेशाभिज्ञेन, यदि वा अत्र तन्त्रे समनन्तरपटलवक्ष्यमाणसाधनक्रमेण यो मन्त्रसिद्धस्तेन कर्तव्या द्वयोरपि अत्र सामर्थ्याविशेषात् तदन्यस्य त्वनधिकारात् ॥

इत्थमियम्

कृता वै सुकृता भवेत् ।
सम्यङ्निवृत्तिमासादयत्येव ॥

तदेवं चतुर्थपटले कलादीक्षोक्ता अस्मदर्शितयुक्त्या एकतत्त्वदीक्षा च, इह तु त्रिपञ्चनवषट्त्रिंशद्भेदाश्चतस्रस्तत्त्वदीक्षाः, पददीक्षा च नवतत्त्वदीक्षावत्, वर्णमन्त्रभुवनदीक्षाश्च तिस्रः कलादीक्षावत्, दशमे च विततता भुवनदीक्षा भविष्यतीत्येता एकादश अध्ववैचित्र्येण दीक्षाः । ज्ञानदीक्षा चोद्घातयुक्त्या द्वादशी इति । एताः सबीजनिर्बीजसद्योनिर्वाण-

भेदात् पुत्रकविषये षट्त्रिंशद्भवन्ति । आचार्ये तु सबीजैव द्वादशभेदा । साधके शिवधर्मि-लोकधर्मिभेदात् द्विविधे पूर्ववच्चतुर्विंशति-भेदा । समयिनि तु अध्वन्यासस्यानुक्तत्वात् ज्ञानक्रियाभ्यां हृदादिग्रन्थिभेदनतो द्विवि-धा,—इति चतुःसप्ततिरिह संक्षेपतो दीक्षा-भेदाः । तत्रापि सकलनिष्कलाघोरेश्वर्याद्यनु-ष्ठानभेदात् लोकधर्मिसाधकस्य चावान्तरवैचि-त्र्यात् भौतिकनैष्ठिकाचार्यभेदाच्च बहुप्रकारा भवन्ति । तदत्र दीक्षायामेव प्रत्यवतिष्ठन्ते सौगताः—इह दीक्षया किमात्मनः संस्कारः क्रियते बुद्धेर्वा ? किमात्मग्रहादीनां मलानां, किंवा कर्मणाम् ? आत्मनः आयातशक्ति-पातस्य तदितरस्य वा ? शक्तिपातोऽक्षीण-मलस्य अन्यस्य वा ? कश्चात्मनः संस्कारः कर्मनिवृत्तिः सुखदुःखसंविन्निवृत्तिः प्रकृत्यादि-विवेकदर्शनं स्वस्वरूपज्ञानमद्वैतदृष्टिर्वा ? बु-द्धेरपि कः संस्कारः किमिन्द्रियप्रेरणासामर्थ्यं, रागादिहान्याधानम्, उन्मूलनं वा? मलानामपि किं तदैव कार्यप्रसवासामर्थ्यं, मरणापेक्षं वा

संस्कारः ? एवं च कर्मणाम् ? स च किमागमैकप्रमाणको युक्तिसिद्धोऽपिवा ? । तत्र शक्तिपातादात्मग्रहादिमलक्षयः, मलक्षयाच्च शक्तिपात इत्यन्योन्याश्रयः । अक्षीणमलस्य शक्तिपाते सर्वस्यासौ स्यात्, मलक्षयोऽन्यतः कुतश्चित् यदि तत एव तर्ह्यात्मनः संस्कारो भविष्यतीति किं शक्तिपातहेतुकेन दीक्षाविधानेन ? आत्मनश्च नित्यैकस्वभावस्य कर्मतद्भोगनिवृत्त्यनिवृत्त्योरविशिष्टस्य कः संस्कारः ? वैशिष्ट्ये नित्यताहानिः । कर्मभोगयोः व्यतिरिक्तयोर्नाशे तस्य किं वृत्तम् ? तत्समवायोऽस्य निवृत्त इति चेत् सोऽपि कर्मादिवत् स्वात्मन्येव—इति आत्मनो न भोक्तृत्वकर्तृत्वे नापि तदुपशमात्मा मुक्तिः स्यात् । प्रकृत्यादिविवेकस्वरूपदर्शनपक्षौ प्रागतत्स्वभावतयास्य भेदमानयतः । आत्मदर्शनमात्मीयादिदर्शनस्य तन्मूलानां रागादीनां च हेतुरिति ततोऽस्य बन्ध एव । अद्वैतदृष्टौ अपरस्य कस्यापि अभावात् क्रियाभोगा[बोधा]नुपपत्तौ कर्तृत्वज्ञातृत्वतत्त्वैश्वर्यप्रविलोपो मुक्तात्मनां स्यात् । बुद्धेरक्ष-

प्रेरणासामर्थ्याधाने दीक्षितस्य करणवैकल्यं स्यात् । रागादिदोषाश्च सवासनाका दीक्षितस्य न निवर्तन्ते । बुद्धेरुन्मूलने दीक्षानन्तरं देहपातप्राप्तिः । मलानां तदैवासामर्थ्यसाधने प्रवृत्तिस्तुट्येत् । मरणापेक्षमसामर्थ्याधानमिति पलायनमार्गः । मृत्यवसरे च दीक्षितस्यात्मादिग्रहः प्राग्वदेवोपलभ्यते । एवं कर्मस्वपि वाच्यम्, आरब्धकार्यकर्मसंशोधने दीक्षाया न सामर्थ्यमिति चेत् अन्यत्रापि क आश्वासः । आगमप्रमाणकमेतदिति चेत् आगमस्य तदर्थं कः प्रतिबन्धः? मन्त्रप्रतिबन्धात् यथा बीजमङ्कुरं न सूते, तद्वत् कर्मबीजान्यपि न संसारं सुवते इति । बीजादिसंसिद्धयुक्त्या बीजादिवत् दीक्षितस्य तैलाभ्यङ्गदाहादयोऽपि असामर्थ्याधानहेतवः क्रियन्ताम् । अमूर्तत्वात् कर्मणामभ्यङ्गादयो न सन्तीति तानि दीक्षैव क्षपयति, तथाच धटदीक्षादीक्षितस्य लाघवमपि [1]उपलभ्यते इति चेत् नामूर्तस्य पापा-

---

१ क० ग० पु० उपलक्ष्यते इति पाठः ।

देर्गुरुत्वाभावात् । तस्मात् क्षणिकत्वादिभावना-पूर्विका नैरात्म्यदृष्टिरेव मोक्ष इति ।

अत्रोच्यते—इहात्मसंस्कार एव दीक्षा । तथाहि अयमात्मा संकोचाभासतत्त्वापूर्णम्मन्यतात्मनेहाभिलाषशब्दोक्तेनाणवेन मलेन, शुभाशुभवासनात्मना विविधजन्मायुर्भोगदेन कार्मेण, तत्प्रभवेन च कञ्चुकपुर्यष्टकस्थूलभूतात्मनानाजातिकत्रिविधदेहतदाश्रयविचित्रभुवनभोक्तव्यार्थसार्थप्रतीतिभाजा मायाख्येन मलेन च वलितः । यतः सर्वस्यैव संकुचितोऽभिष्वङ्गादिमयोऽन्तरुल्लेखशताकीर्णः कृशगौरादिरूपोऽमुत्रेदं जानामीत्यादिप्रतीतिसिद्ध एवायमर्थः । तदीदृशस्यास्यानन्तजन्मसहस्राभ्यस्तेदृगवसानस्यापि आकस्मिकगुरुयियासाभक्त्यादिवशोन्नीतशक्तिपातानुसारनिर्वर्त्यमानया दीक्षया

'दीयते ज्ञानसद्भावः क्षीयते पशुवासना ।
दानक्षपणसंयुक्ता दीक्षा तेनेह कीर्तिता ॥'

इत्यान्नायनिरूपितस्थित्या आणवादिपाशप्रश-

मनश्शिवत्वाभिव्यक्तियोग्यतात्मा[1] संस्कारः क्रियते । पाशानां च प्रशमनमचिन्त्यमन्त्रशक्तिवशात् बीजानामिव पुनःप्ररोहाधानासामर्थ्यम् ।

यत्तु

'नालं बीजादिसंसिद्धौ विधिः पुंसामजन्मने ।
तैलाभ्यङ्गाग्निदाहादावपि मुक्तिप्रसङ्गतः ॥'

इत्युक्तं तैः, तत्तेषामेव उपहास्यतामाविष्करोति—यतः स्थावरजङ्गमकृत्रिमाद्यात्मनो विषस्य स्वकार्यकरणशक्तिप्रशमनं बीजवद्यन्मन्त्रैः क्रियते तत्रापि एतद्वक्तुं प्राप्तम् । अथ तैलाभ्यङ्गादेः बीज एव शक्तिनिरोधकृत्त्वं न तु विशेषकृत्त्वं, मन्त्राणां तु तत्रापीत्युच्यते, तर्हि अचिन्त्यप्रभावत्वात् तेषां पाशप्रशमनेऽपि सामर्थ्यं किं न सह्यते ।

अथ दोषाः सबीजसंताना दीक्षितेऽपि अनिवारिता दृश्यन्ते इति किमस्य मन्त्रैः कृतमित्युच्यते । तदत्रापि उच्यते प्रोक्तपाशशक्तिप्रतिबन्धनं मन्त्रैः क्रियते अस्य न तु

---

१ क० पु० योग्यतात्मनः संस्कार इति पाठः ।

रागद्वेषादिप्रशमनम् । यथाहि विरूपस्य वैरूप्यमनिवर्त्यापि लोकोत्तररमणीवशीकरणं मन्त्रैः क्रियते, तद्वद्देहारम्भिकर्माशोधनात् वर्तमानदेहे रागाद्यनिवृत्तावपि भाविप्ररोहप्रतिरोधनं पाशानां कुर्वतां मन्त्राणां किमायातम् । तीव्रतमशक्तिपातपूतानां च दीक्षानन्तरं रागद्वेषादिप्रशमः शतशोऽपि दृश्यते । सद्योनिर्वाणदीक्षायां च त्रैकालिकपाशशोधनात् तदैव देहादिविगलनं शिवत्वाभिव्यक्तिश्च भवत्येव । शिवत्वाभिव्यक्तावत्र किं प्रमाणमिति चेत्, मन्त्रप्रभावसंपादिततात्कालिकदेहदर्शनप्रशमनोद्भूतमनुमानं यथा च [1]शान्त्याप्यायवशीकारदाहोच्चाटनशोषणमारणादि मन्त्रसामर्थ्याद्भवत्येव तथा दीक्षाफलमपि भवत्येव इति चेतसि निवेश्यताम् । तत्कालमेव दीक्षातः शिवत्वाभिव्यक्तिः किं न भवतीति चेत्, प्रकृष्टज्ञानशालिभिः क्रियमाणायां सहस्रशो भवन्ती[2] असावपि दृश्यते एव ।

---

१ ख० पु० मन्त्राध्यायेति, ग० पु० शान्त्याध्यायेति पाठः । २ क० पु० भवत्यसाविति पाठः ।

अथोच्यते नित्यस्यात्मनो दीक्षातः संस्कारोत्पत्तौ संस्कृतत्वासंस्कृतत्वभेदात् भेदः स्यादिति चेत्, न । तत्तत्प्रतिभासभेदेऽपि अस्याकृतकाहंविमर्शैक्येन एकत्वसिद्धिः दूरासन्नादौ देवकुलादेरिव तद्विमर्शैक्यात् । विमर्शनवशादेव च सर्वव्यवस्था इति प्रत्यभिज्ञायां निर्णीतम् । एतेन भोक्तृत्वकर्तृत्वाद्यपि अस्य समर्थितमेव तत्तद्विषयभेदेऽपि आत्माव्यतिरेकेणास्य स्फुरणात् ।

यत्तु उक्तमात्मदर्शनं न मुक्तिरपितु बन्ध इति तच्छरीरप्राणपुर्यष्टकशून्येष्वनात्मस्वेवमेव । यत्तु सत्यरूपे चिदात्मन्यहंविमर्शपरमार्थतया स्वीकृताशेषज्ञानक्रियापरमार्थे तत्रा[1]त्मदर्शनं सैव सत्यतो मुक्तिः । न च केवलमनात्मन्यात्मदर्शनं मिथ्याज्ञानरूपो बन्धो, यावदात्मनि अपि पूर्णप्रकाशाहंविमर्शपरमार्थाशेषविश्वमये विश्वत्रापि च चिदात्मैक्यपरमार्थे यदनात्मतया ज्ञानं तदपि बन्ध एवेति

---

१ ख० ग० पु० तत्र तथेति पाठः ।

सर्वथा विगलितसंकोचचिदेकघनविश्वैकात्म्यमयशिवत्वाभिव्यक्तिरेव मुक्तिः। तत्र चाभेदसारं सर्वं ज्ञात्वा समाप्तमेवेति तत्प्राप्त्यर्थमेव दीक्षाप्रवृत्तिः। तदेवमुक्तनीत्या मलानां भेदेन प्रतिपादितत्वात् पृथक् न तत्संस्कारपक्षः कश्चित्—इत्यात्मन एवोक्तरूपः संस्कारो दीक्षया क्रियते। अद्वयमेवास्य स्वरूपमिति स्वरूपदर्शनाद्वयदर्शनपक्षयोर्नास्ति भेदः। सद्योनिर्वाणदीक्षायां तु अस्य कर्मसुखादिसंविन्निवृत्तिरपि क्रियते इति प्रतिपादितम्। असद्योनिर्वाणदीक्षासु देहारम्भिकर्मशुद्धिर्भगवदाज्ञातो न क्रियते नतु असामर्थ्यात्। अतोऽत्रापि यदुक्तं

'गतिप्रतीत्योः कारणान्याश्रयस्तान्यदृष्टतोऽदृष्टनाशान्न गतिर्दीक्षितस्य ॥'

इति तदपि अदूषणमेव। प्रकृत्यादिविवेकदृष्टिबुद्धिसंस्कारपक्षौ अनभ्युपगमपराहतौ। ततो यदुक्तं

'धारणप्रेरणक्षोभनिरोधाश्च तेनावशाः?।
न स्युस्तेषामसामर्थ्ये तस्या दीक्षाद्यनन्तरम् ॥'

इति तददूषणमेव।

यदुक्तं पापस्य गुरुत्वाभावात् प्रत्ययवती तुलादीक्षा नोपपद्यते इति; तदविदिताभिप्रायतया न सम्यक्, यतस्तमोमयपापावृतिहेतुकं देहे गुरुत्वं तुलादीक्षया घटशुद्धिवत् कारणनिवृत्तिद्वारेण निवर्त्यते । तथाच स्मृतिकारः

'अधर्मात्तमसो देहे गुरुत्वं यत्क्षयोऽस्य तु ।
धर्मतो लघुतोत्पादाद्घटतः संप्रतीयते ॥'

इति । तथैवैतत् । यत्पुनरुक्तमनायातशक्तिपातस्य दीक्ष्यत्वाभावात् शक्तिपातवत एव दीक्षा, शक्तिपातो मलक्षयात् स च शक्तिपातादितीतरेतराश्रयः, अक्षीणमलस्य शक्तिपाते सर्वस्यासौ स्यात्, अथ मलक्षयस्य शक्तिपातादन्यो हेतुः कश्चित् स एव तर्हि शक्तिपाते हेतुरस्तु किं मलक्षयेणेति । सत्यमेतत् किंतु निरर्गलपारमेशविचित्रशक्तिपातवतो दीक्ष्यत्वमस्माभिरिष्यते नतु मलपरिपाकादियुक्तस्येति न कश्चिदुक्तचोद्यावस्करसंस्पर्श इत्युपपन्नमेव दीक्षयात्मसंस्करणम् । अपिच सकलव्यवहार-

---

१ क० पु० तु कलादीक्षेति पाठः । २ क० पु० संप्रनायते इति पाठः ।

प्राणितभूतसर्वाभ्युपगमाविगीतप्रसिद्धिसिद्ध-सर्वज्ञमहेश्वरप्रणीतत्वप्रतीतप्रामाण्ये प्रेक्षा-पूर्वकार्याचार्यपरम्परानुष्ठीयमानानुष्ठानप्रकटि-ततत्तत्सर्वनिर्वाणाद्याप्यायनादिनानाफललब्ध-संवादे पारमेश्वरे शास्त्रे यद्यथाभिधीयते तत्तथैव । ततश्च यदुक्तम्

'आगमस्य तथाभावनिबन्धनमपश्यताम् ।
मुक्तिरागममार्गेण वदनपरितोषकृत् ॥'

इति, तदसदेव । यत्पुनः

'तस्मादनादिसंतानतुल्यजातीयबीजिकाम् ।
उत्खातमूलां कुरुत सत्त्वदृष्टिं मुमुक्षवः ॥'

इत्युक्त्या आत्मदृष्टेरहन्ताविकल्पवासनामूल-त्वमुक्तं; तत्प्रतारणमात्रमेव, यतः शिरोनिर्देशप्र-ख्याकृतकाहंविमर्शमयत्वमात्मन्यङ्गुलिनिर्देश-प्रख्यासांकेतिकेदंविमृश्यत्वमिव विषयेषु स्वसं-वेदनेन प्रतीयते एव, अन्यथा प्रथमसंकेतग्रह-णमेव न कस्यापि घटेत ।

नन्वहंप्रतीतेर्विकल्पवासनामूलत्वमुक्तं तत् कथं, यतो यो विकल्पो ज्ञानसंतानमहन्तया-

भिमन्यते स किं स्वात्मनो भेदेन तं तथाध्यवस्यति स्वात्माभेदेन वा । भेदपक्षे इदमिति ज्ञानसंतानस्याध्यवसायः स्यान्नतु अहमिति । अभेदपक्षे तु विकल्पस्य स्वात्मापि विकल्पः प्रोक्तो, नच तद्युक्तं स्वात्मन्यविकल्पकत्वाद्विकल्पानाम् । अथ विकल्पः स्वात्मनो ज्ञानान्तरैः सह भेदं नाध्यवस्यति नत्वभेदमध्यवस्यतीत्युच्यते, तर्हि अध्यवसाये प्रतिषेधः पतित इत्यनध्यवसायव्यापार एष स्यात् । अथात्मनो ज्ञानान्तरैः सह भेदमनध्यवस्यन्नवान्तराणि अभेदेनाध्यवस्यति; तर्हि येनात्मना सह येषां ज्ञानानां भेदो नाध्यवसितः, तेषामभेदाध्यवसाये तस्यात्मनोऽपि अभेदाध्यवसायः प्राप्तः आत्मवद्वा तेषामपि अप्राप्तः, अन्यथात्मना सह कस्तेषां भेदः । न अध्यवसायो, भेदाध्यवसाय एव हि अयमित्थं स्यात् । किंच अनुभवसंस्कारोत्थमात्मनो रूपवैचित्र्यमनुभवतापि विकल्पेन निवृत्तपूर्वाणि अनुभवान्तराणि

---

१ ख० पु० संस्कारोद्भवमादिति पाठः ।

अवसातुं शक्यन्ते तत्रास्य नारिकेलद्वीपनिवासितुल्यत्वात् । नचास्य प्रकाशातिरिक्तोऽध्यवसायसमारोपाभिमाननिश्चयादिपदवाच्याभिप्रायेणाभेदवाच्यः कश्चिदन्यो व्यापारो व्यवस्थापकः परदर्शने संगच्छत इत्यास्तामतिगहनमेतत्प्रत्यभिज्ञायां विततमस्तीह तु प्रतन्यमानं सुकुमारहृदयानायासयेत्। तत्स्थितमेतत् तत्तदाभासभेदेऽपि अकृतकाहंविमर्शसिद्धैक्यपरमार्थोऽयमात्मा इति ।

ननु च श्रीमत्खेटपालाचार्येण मलपरिपाकहेतुकः शक्तिपातोऽभ्युपगतः स्वतन्त्रशक्तिपातपक्षश्च दूषितः, तत्कथं स्वतन्त्रशक्तिपातपक्षाश्रयणेनैतत्प्रतिसमाहितम् ।

अत्रोच्यते अत्रार्थे यदि विविदिषास्ति तदेतदपि निर्णीयते । श्रूयताम्

'अथानादिर्मलः पुंसां पशुत्वं परिकीर्तितम् ।
तुषकम्बुकवज्ज्ञेयं मायाजमङ्कुरस्य तु ॥'

इति श्रीस्वायंभुवसूत्रे मल इति पुंसामिति चोक्तिपर्यालोचनया एकोऽप्यसौ बहुशक्तिकः,

---

१ ख० ग० तत्तदसदाभासभेदेति पाठः ।

अन्यथा बह्वावारकत्वमस्य न घटते, एकमुक्तौ च सर्वे मुच्येरन्, कर्मभिश्च सह परिणमति अमिश्रस्य परिणामायोगात्। परिणमंश्च कालविशेषात् कंचित्प्रति कथंचित् तीव्रमध्यादिभेदात् यदा परिपच्यते तदा पुंसां कर्मपरिपाकमिवापेक्ष्य शक्तिपातं करोति महेश्वरः, यावच्च मलस्य परिपाको न जातः तावत् तत्पुंबन्धकत्वेनैव तं परिणमयति, यदा तु कृतकार्यत्वादात्मनि पक्वं पश्यति स्वशक्तिपातान्मलशक्तिं निरुणद्धि असौ। यथा च स्वतन्त्रशक्तिपातवादिपक्षे प्रतिपुरुषं किंचिदेव कर्म कदाचिदेव देवः परिपाच्य भोगयोग्यं करोति न तु सर्वान्प्रति सर्वं युगपत्, तत्त्वानि च नियतकार्यकारणभावभाञ्जि दर्शयति, मायाप्रकृत्यादि च स्वापप्रबोधयोरौचित्येन परिणमयतीति नास्य सर्वत्राविशेषेण कर्तृत्वं, तथा मलपरिपाकपक्षेऽपीति कर्मणो मलस्य च विचित्रं परिपाकमपेक्ष्य निग्रहानुग्रहौ पुंसां करोति परमेश्वरः नत्वेवमेव तस्याप्रेक्षापूर्वका-

रित्वप्रसङ्गादिति तावच्छ्रीमत्खेटपालाचार्यमतम् । यदाह भोगकारिकासु

'अनाद्यनादिसंबद्धो मलः साधारणोऽक्षयः ।
प्रतिपुंनियतस्वस्वकालव्यापृतशक्तिकः ॥'

इति । तथा

'मुक्त्वा निरोधिकाः शक्तीर्नान्यो धर्मोऽस्य विद्यते ।
कर्माशयसमेतस्य हेतुत्वं च भवार्णवे ॥'

इति । तदत्र यदि स्वातन्त्र्यान्मलो बन्धकः शिवमुक्ताणून् प्रत्यपि स्यात् । अथ शिवेच्छा (तः) तच्छिवस्य वीतरागद्वेषत्वात् मुक्ताणून् प्रत्यपि मलशक्तिप्रेरकत्वं स्यात् । तेषां स्वस्वरूपाभिव्यक्तेर्न तथा इति चेत्, नेतरेषामपि स्वस्वरूपस्य तथात्वात् । अनादिमलनिरोधान्न तथात्वमित्ययुक्तं तन्निरोधस्यैव विचारयितुं प्रक्रान्तत्वात् । यदि चानादिर्निरोधः, कृतं शिवशक्त्यधिष्ठानेन । तदपि अनादि चेत् किमुभाभ्यां, मलशक्तिकृतनिरोधस्यानादित्वमात्रेणैव सुलभेनोत्तरेण नियतपुंविषयत्वमुच्यताम् । एवमस्तु इति चेन्न शिवस्य सर्वत्राधिष्ठातृत्वं स्यात्, ततश्च

---

१ क० पु० संबन्ध इति पाठः । २ क० पु० शक्त्यनिरोधस्याधिष्ठानेति पाठः ।

'मलसंसर्गात्तद्वत्तेषामकृतो हि शिववशीकारः।
पत्युस्त्वेते रोध्या..... ॥'
(त० त्र० नि० का० ९)

इति किमर्थमुक्तम्। अत एव शिवस्य मलशक्त्यधिष्ठातृत्वमपीष्यते इति चेत्सत्यं, इष्यते नतु सिद्ध्यति द्वयोरनादित्वेनान्वय-व्यतिरेकाभावात् प्रयोजनमात्रवशेन च भाव-व्यवस्थानुपपत्तेः। अस्तु, नैवं तथापि यान् प्रति निरोधाय शिवो मलं प्रयुङ्क्ते ते शि-वतुल्यत्वात् बहुत्वाच्च प्रत्युत शिवमेव प्रति तं प्रयुञ्जीरन् भूयसामेकापेक्षया सामर्थ्यातिशयात्। किंच मलशक्तिर्यदि संनिधिमात्रेण निरोधिका तच्छिवमुक्ताणून् प्रत्यपि स्यात्। अथ ज्ञातृत्वकर्तृत्वात्मकस्वरूपावारकत्वेन, तर्हि आत्मनां विकारिता प्राप्ता स्वरूपनाशो वा तेषां तदतिरिक्तस्य धर्मिरूपस्य वैशेषिक इव शैवेऽनभ्युपगमात्। नच मूर्तेन मलेनात्मना-ममूर्तचित्स्वरूपाणामावरणं घटते। चक्षुः-सूर्यादिरश्मीनां तु भौतिकत्वात् पटलादि-भिस्तद्युज्यते एव। यदपि मद्यविषादेर्जीवं प्रत्यावारकत्वं तत्सिद्धसंकोचं प्राणादिमयं

प्रति न शुद्धचिदात्मानम्। मलसंकोच एव तु अयं प्राथमिको विचार्यो वर्तते इति स कथं शुद्धचिदात्मन आवारकः स्यात्। प्रत्युत वरा-(रणा)यायातो मलोऽस्य वेद्यः स्यादिति सर्वः सर्वज्ञो भवेत्। मलश्च यद्यव्यापकस्तदस्य व्यापकात्मावारकता न स्यात्। व्यापकत्वे तु शिवमुक्ताणूनपि आवृणुयात्तेषां जीवानां च सर्वदेशाक्रान्त्यात्मनो व्यापकत्वस्याविशेषात्तस्य च प्रत्यंशं व्यापकेन मलेनाच्छादनात्। आत्ममलयोश्च न संयोगः संबन्धस्तस्य व्याप्यवृत्तित्वात् तयोश्च व्यापकत्वात्, न समवायो नित्यद्रव्ययोस्तदयोगात्[1]। अत एव न कार्यकारणभावः। नापि तादात्म्यं भिन्नत्वात्। आवार्यावारकतापि घटपटादौ न संयोगात् व्यतिरिक्ता भवितुमर्हति। किंच मलस्य नित्यत्वं व्यापकत्वमेकत्वमनेकशक्तित्वं शिवस्वभावात्मदृक्क्रियानिरोधनेनैतन्निरोधपरिपचने च स्वातन्त्र्यं, शिवस्य च मुक्तशिवेभ्योऽणुभ्यश्च भिन्नत्वमत एवातद्व्यापकत्वमाविश्व-

---

१ क० पु० तथायोगादिति पाठः।

शक्तित्वं च कर्ममलपरिपाकादिमुखप्रेक्षितया च पारतन्त्र्यमित्यादि भेदवदिकृतं शिवमलयोः विपर्यस्तस्वरूपप्रतिपादनमतिसुभाषितम्। यच्च मलस्य परिणामित्वमुच्यते तैस्तदमिश्रस्यास्य कथं स्यात्। कर्मभिः सहितस्य भविष्यतीति चेन्न तानि मलस्यान्तर्विशन्तीति कास्य तैः सह मिश्रता। यद्यपि

'मायाविकारयोगे कर्मयुतः कारणं मलो भविनाम्।'

(त० त्र० नि० का० ११)

इत्युक्तं भवद्भिः, तथापि विज्ञानकेवलिनां मलस्य कर्मसाहित्याभावात् परिणामायोगे मुक्त्यभावः स्यात्। मन्त्रमन्त्रेश्वरादीनां च योऽयमधिकारबन्धो, नासौ सहजमलकृतस्तस्य मायोर्ध्वेऽभावादिति तदर्थं[1] मलान्तरमभ्युपगन्तव्यम्। तेषां माहेश्या महामायाशक्त्यैव तावतांशेन बन्धत्वं नतु व्यतिरिक्तेनान्येन मलेनेति चेत्, अणूनामपि मायाशक्त्या संकुचितत्वाभासनं बन्धनमस्तु, किमनुपपन्नव्यतिरिक्त-

---

१ क० पु० तदित्थमिति पाठः।

मलाभ्युपगमेन । अननुबन्धे मन्त्रादीनामपि तादृशो व्यतिरिक्तो मलोऽभ्युपगम्यताम् ।

किंच अयं मलोऽध्वनि न क्वापि अनुप्रविष्ट इति कथमस्य षडध्वदीक्षायामन्तर्भाव्य शुद्धिः क्रियते । कर्मवत्पुंस्तत्त्वान्तर्भावोऽस्येति चेत्—न, कर्त्रात्मनः पुंसः कर्माणि संस्कारात्मतयान्तर्भवन्तीति युक्तं कर्तृनिष्ठत्वात् क्रियाणां, मलस्य तु व्यतिरिक्तस्य कथं तदन्तर्भावः।

किंच नावारकेण पटादिना घटादेः स्वरूपं विशिष्यते अपितु तद्विषये ज्ञातुर्ज्ञानं विहन्यते, तथा शिवमुक्ताणूनामेव स मलः स्यात् तेषां मलेन पुंविषयज्ञानावरणादिति मलस्यावारकत्वं तावदयुक्तम् । यश्च[1] मलस्य परिपाकोऽभिधीयते स किं तस्य[2] तच्छक्तेर्वा विनाशः उत निरोधप्रतिबन्धः । आद्ये पक्षे एकत्र तत्परिपाके सर्वे शुद्धाः स्युः, तच्छक्तेरनेकत्वाभ्युपगमेऽपि सदृशत्वाच्छक्तिमद्व्य-

---

१ क० पु० यस्य मलस्येति पाठः । २ क० पु० तस्य शक्तेयेदीति पाठः ।

तिरेकाच्चैष एव प्रसंगः। फलभेदादारोपितभेदो हि पदार्थात्मैव शक्तिरिति सूरयः। न च अनादेर्वस्तुभूतस्य मलशक्तिनिरोधस्य नाशो युक्तः, प्रागभावस्य त्ववस्तुत्वात् स भवतु नाम। शक्तिनिरोधप्रतिबन्धोऽपि विषवह्निशक्तिप्रतिबन्धवत् सर्वानेव प्रति स्यात्। तद्वदेव च प्रतिबन्धकनिवृत्तौ तन्निरोधः पुनरुन्मज्जेत्। परिपाकश्चास्य यद्यहेतुकः, प्रथममेव स्यात्, यदि कालहेतुकः तत्कस्तदवधिः सर्वेषां च मलानादित्वस्य तुल्यत्वात्। वृक्षफलानामिवतौ मलशक्तीनां सममेव वा सामनन्तर्येण वा परिपाकः स्यात् नात्यन्तदूरकालव्यवधानेन। अथ

'पुंबलरोधं कुर्वन्पश्यति हि[1] स शक्तिसाफल्यम्।
दृष्ट्वा च तन्निवृत्त्यै योग्यं युङ्क्ते नृमुक्तये[2] करणम्॥'
(त० त्र० नि० का० २१)

इत्युक्तनीत्या मलः स्वकार्यं कृत्वा पच्यते, तत् पुन्निरोधानन्तरमेव पच्येत। अथ यदर्थं पुन्निरोधः तस्मिन् कलादिक्षित्यन्ततत्त्वोदये

---

१ ख०.पु० हिमशक्तीति पाठः। २ ख० ग० पु० न्यमुक्तये इति पाठः।

भोगे भुक्ते सति पच्यते, तदत्र भोगो यदि सामान्येन, तदेकत्र शरीरे कलादिक्षित्यन्तमये तत्कार्यस्य भोगस्य संपन्नत्वात् तदनन्तरमेव मलपरिपाकः स्यात्। अथ विशेषेण, तन्न कदाचिदपि, भाविकलात्मनो विशेषस्य कर्मजभोगवैचित्र्यस्य तदुत्थत्वात्। अथेश्वरेच्छातो मलस्य परिपाकः, तदीयेच्छा यद्यनियन्त्रिता अत्र हेतुः सर्वाणूनां स्यादित्युक्तमेव। अथ भोगपर्यायतः कदाचिद्विरुद्धे समबले कर्मणी परिपक्वे अपि विरोधादुदासाते, कर्मान्तराणि चापरिपक्वत्वाद्भोगाय नोन्मुखीभवन्ति,—इति तं कालमपेक्ष्य भगवान्मलं रुणद्धि, स च कालो दुःखसुखरहितः स्वयमुपलभ्येतापि कैश्चिदिति पक्षः। तदत्रापि ब्रूमहे—कर्मणां क्रमानुष्ठितानां क्रमिकफलानां कथं तावद्युगपत्फलदानौन्मुख्यम्, कथं वा तन्निरोधावसरे ततोऽन्यत् कर्म फलं न दद्यात्। तस्य स्वकाल एव फलदानोन्मुखत्वं नतु तत्काल इति चेत्, तयोरपि तर्हि न तदेककालं युक्तम्।

ईश्वरेच्छात एवेति चेत्, सा यदि स्वतन्त्रा, तद्युगपत्सर्वस्य सर्वकर्मपरिपाकात् तद्भोगं दत्त्वा मुक्तिं वितरतु, कर्मानपेक्षया वा सर्वस्य मलं रुणद्धु । अथास्वतन्त्रा, तदत्रापि तस्य हेत्वन्तरं वक्तव्यम् । यस्य च तुल्यबले कर्मणी भोगोन्मुखे रुद्धे तस्य तत्कालं देहपातः स्यात् । अथ न जात्यायुष्प्रदयोः कर्मणो-र्निरोधोऽपितु भोगप्रदयोरेव । ननु जात्या-युष्प्रदकर्मानिरोधेऽपि यदीशो मलं रुन्धे, तद्भोगप्रदात् किमिति बिभेति यत्तन्निरोधम-वश्यमपेक्षते । यदि च रुद्धशक्तिकर्मदशाया-मेव मलं रुन्ध्यात् तत्स प्रलयावस्थायां सर्वेषां तथा कुर्यात् । तत्रापि च तेषां तादृग्भोग-प्रदकर्मसङ्गोऽस्तीति चेत्, विरुद्धकर्मद्वयसङ्गे तादृग्भोगदं कर्मास्तीति किं वक्तुं न शक्यते । किंच विज्ञानाकलानां कार्ममलशून्यानामीश्वरो युगपन्मलं रुन्ध्यादिति अष्टौ बोधितवानिति शास्त्रेषु संख्यानियमानुपपत्तिः । अथ सत्यपि

---

१ क० ग० रुद्रशक्तीति पाठः ।

कर्मसाम्ये परिपक्वमेव मलमीशेच्छा रुणद्धीति कैरणव्याख्यातृमतमाश्रीयते, तर्हि उक्तदूषणावृत्तिरनुपपन्नव्यर्थकर्मसाम्याभ्युपगमदोषश्चापतति । एतेन तदपि प्रत्युक्तं यदाहुः केचित्

'वैराग्यं भोगवैरस्यं धर्मः कोऽपि विवेकिता ।
सत्सङ्गः परमेशानपूजाद्यभ्यासनित्यता ॥
आपत्प्राप्तिस्तन्निरीक्षा देहे किंचिच्च लक्षणम् ।
शास्त्रसेवा भोगसङ्गपूर्णता ज्ञानमैश्वरम् ॥
इत्यादिहेतुके चेच्छा मलं रुन्धे हठादिति ।'

यत एतदुदयेऽपि यदीशेच्छैव कारणं तदन्योन्याश्रयः । कारणान्तरं च वक्तुमशक्यं तस्यापि नियमायोगात् । न चैते सर्वे हेतवः ईशेच्छाया आयातशक्तिपातानां तथारूपत्वादृष्टेः, नापि एकैकस्येशेच्छाहेतुत्वं वैराग्यादेः शतशो व्यभिचारदर्शनात्, परमेशपूजाज्ञानादेश्च मलपरिपाकपूर्वकत्वात् नत्वीशेच्छाप्रचोदकत्वं युक्तम् । यत्पुनरन्यदुक्तं पुंसां मुक्तेः क्रमिकत्वं दृष्ट्वा ईशेच्छाया अपि मलपरिपाकहेतुत्वं क्रमिकमनुमीयते—यथा भोगस्य क्र-

मात्तद्धेतुकर्मपरिपाकहेतुत्वं क्रमिकमिति, तदसन्मुक्तेः क्रमो मलपरिपाकक्रमात्, सोऽपि ईशशक्तिकृतपरिपचनक्रमादिति। सत्यं ईशशक्तेस्तु मलपरिपाचनक्रमे हेतुर्न लभ्यते, स्वातन्त्र्ये तु अलं मलपरिपाकापेक्षया। तस्मान्न कथंचिदपि भेदवादिभिर्मलपृथक्त्वं तच्छक्तिनिरोधतत्परिणामतत्परिपाकशक्तिपातादयः प्रतिपादयितुं शक्यन्ते,—इति यथोक्तमेव साधु। यद्यपि चतुर्थपटले

'.....अभिलाषो मलोऽत्र तु।' (स्व० ४।१०५)

इत्यत्र मलस्वरूपविचारस्यावसरोऽभूत्, तथापीह एकप्रघट्टकेन पश्चात्तद्विचारितं, माभूत्तत्र दीक्षातन्त्रनिभालनोद्यतानां सुकुमारहृदयानां व्यामोह इति। किंच भेदवादे जीवानामानन्त्येऽपि पुनरन्येषामुदयाभावत ईश्वरेणेयत्तया परिच्छेद्यमानत्वाच्च नैयत्यं संसारस्य चानादित्वमतो यदि प्रतियुगमेकैकोऽणुर्मुच्यते, तदुच्छेद एव संसारस्य प्रसक्तः। अथ जीवानां तादृगानन्त्यमस्ति

यदीशेनापि न परिच्छिद्यते, तर्हि ईशस्यासर्वज्ञता स्यात्। तदुक्तं शारीरके मुनिना

'अन्तवत्त्वमसर्वज्ञता वा।' (२।२।४१)

इति। आस्तामेतत्। यत्तु तैः स्वतन्त्रशक्तिपातवादिपक्षे चोदितमीश्वरस्य निर्निमित्ते निग्रहादिकारित्वे अप्रेक्षापूर्वकारित्वं युगपत्सर्वतत्त्वस्रष्टृता सर्वं प्रति च युगपत्सर्वकर्मफलप्रदता जीवानां च मुक्तौ स्वरूपनाशः पुनर्भवाविर्भावश्च स्यादागमेषु च मलस्य वस्तुत्वाभिधानानुपपत्तिरिति, तदेषामपर्यालोचिततन्मतसतत्त्वमभिधानं—यतः तन्मते पारमेशचित्प्रकाशव्यतिरेकेण न किंचिदपि उपपन्नमिति स एव स्वातन्त्र्यात् शिवादिक्षित्यन्तानन्तविश्वात्मना स्वरूपमवबिभासयिषुस्तथा तथा भातीति न कश्चिदनुग्रहनिग्रहादिभाजनं जनोऽशुद्धिपरीतो वा अस्ति। अथच निगृहीतानुगृहीततत्तत्प्रमातॄंस्तत्तत्प्रमेयजातं च स्वभित्तौ दर्पणनगरवत् स एवोट्टङ्कयन् पञ्चकृत्यकारितां निर्भासयन्नपि न मनागपि अतिरिच्यते, अति-

रिच्यते वा दर्पणवदेवेति स एव परं प्रेक्षापूर्वकारी यश्चित्रचमत्कारमयत्वात् यथा च विश्वमाभासयति तथा तन्मध्ये नियतपौर्वापर्यक्रममपि यत्र यत्र प्रथयति तत्र तत्र कार्यकारणभावनैयत्यात्मना कर्मफलादिवैचित्र्येण निमीलितरूपतया तदुपसंहारेण चोन्मीलितरूपतयेति तावत्यंशे बद्धमुक्तरूपतया वस्तुतस्तु स एव तावद्विश्वात्मना स्फुरतीति न कश्चिदन्यो बद्धो मुक्तो वास्ति । न चैवं स्वरूपापत्त्यात्मनि मोक्षे स्वरूपनाशोऽस्ति । संकोचनाशस्त्विष्ट एव । न च प्राप्तशिवाभेदस्य सर्वसर्वात्मतया सर्वत्र सर्वदा स्फुरतः पुनर्भवोऽस्ति । परमशिवस्यैव सतत्त्वस्य शिवादिसकलान्तेनापि महता स्वस्वरूपेण सरतस्तावतांशेन तत्तद्रूपतोच्यताम् । तत्त्वतस्तु परिपूर्णविश्वस्फारः परमेश्वर एवासौ । अतश्च पुनर्भवप्रसङ्गः स्यादिति यदुक्तं तदयुक्तमेवेति

'अनाद्यशुद्धिशून्यत्वात् प्राप्नोति न भवान्तरम् ।'

इत्यादौ आगमोक्तौ न काचिद्विमतिः ।

---

१ क० पु० सर्वत इति पाठः ।

नचास्येयद्विमर्शात्मतास्तौ परिणतिब्रह्मवादि-पक्षोक्तदूषणावकाशः कश्चिद्द्विश्वात्मकस्वस्वरूप-विजृम्भामयत्वेन विवर्तपरिणामपक्षयोरनभ्युपगमात् । तदित्थम्

संकोचविकासवता तदुभययुक्तेन तद्विमुक्तेन ।
सर्वात्मना च सततं स्वच्छन्दश्चिद्घनः स्फुरति ॥ १ ॥
यद्यत्स्फुरति च तत्तद्वस्तु धरण्यादि तद्वदेवं च ।
पौर्वापर्यनियत्या तत्त्वानां क्रमिकतापि युक्तैव ॥ २ ॥
संकुचितजीवरूपं तत्तत्कर्माभिमानतत्फलभुक् ।
भासयति क्रमशोऽसौ दीक्षादावक्रमेणापि ॥ ३ ॥
इत्थं संकोचात्माप्यभिलाषो लौलिकेति गदितो यः ।
सोऽपि तथात्वस्फुरणाद्वस्त्वेव मलोऽस्तु शास्त्रेषु ॥ ४ ॥
दीक्षायोगज्ञानैर्ध्वंसेऽपि मलस्य नात्मनाशोऽस्ति ।
स्वच्छस्वच्छन्दात्मकचिद्घनताव्यक्तिरेव यन्मोक्षः ॥५॥
जलमिव जले विनिहितं पयसि पयो यद्वदर्पितं तद्वत् ।
यान्त्येकत्वं दीक्ष्या दीक्षाक्रमेण[1] दीक्षिता इति हि ॥६॥
रौरवशास्त्रेऽप्युक्तं प्रायस्तं वृथैव वृत्तिकृता ।
येनार्थव्याख्याभिस्तस्मिन्देवस्तथा तथा प्रथितः ॥ ७ ॥
तदलं भेदविकल्पैरनर्गलेशानशक्तिपातोत्था ।
स्वच्छन्दशिवैक्यमयी मुक्तिर्दीक्षादितो घटते ॥ ८ ॥

---

१ घ० पु० दीक्षामन्त्रेणेति पाठः ।

इत्थं दीक्षोपायो यो यो यैर्यैर्यथा यथा विहितः ।
सोऽपीत्थमेव सर्वः समर्थ्यतां शक्तिपातेद्धैः ॥ ९ ॥
युक्त्यस्त्रैर्धार्मकीर्ते दलितमिह मतं दूषणोद्गारि सम्यग्
विध्वस्तं खेटपालैः कथितमपि मलं भेदसंधानदक्षम् ।
प्रोक्तं दीक्षासतत्त्वं प्रविगलितमलप्रोन्मिषच्चिन्मयैक्य-
स्वच्छस्वच्छन्दधामप्रथनवशभवत्सर्वसर्वात्मरूपम् ॥ १०॥

ति भद्रम् ॥



इति श्रीमत्स्वच्छन्दोद्द्योते

श्रीक्षेमराजविरचिते तत्त्वादिदीक्षाप्रकाशनं नाम
पञ्चमः पटलः ॥ ५ ॥



श्रीमत्प्रतापभूभर्तुराज्ञया प्रीतये सताम् ।
मधुसूदनकौलेन सम्पाद्यायं प्रकाशितः ॥



अथ

श्रीस्वच्छन्दतन्त्रम् ।

श्रीमन्महामाहेश्वराचार्यश्रीक्षेमराजकृतोद्द्योताख्य-
विवरणोपेतम् ।

(षष्ठः पटलः)

ह्रस्वाकारविरिञ्चिजागरधरित्र्याद्या हि ये पञ्चकाः
शक्त्याद्याश्च तथैव शङ्करनुतेः पूर्णावमर्शात्मनः ।
ये प्राप्तप्रणवाभिधाः कुशलवल्लेशेऽपि विश्वप्रथा-
स्तं पञ्चप्रणवं स्मरामि सततं स्वच्छन्दधामाप्तये ॥

प्रश्नग्रन्थे कालस्य साधनानां च स्वरूपं निर्णेतुमवशिष्टम् । तत्र समनन्तरपटलेन कालो निर्णेष्यते, स च बाहुल्येन सिद्ध्यङ्गं, सिद्धयो मन्त्रसाधनपूर्विकाः,—इति साधनानां स्वरूपनिर्णयाय पञ्चमपटलान्ते 'मन्त्रसिद्धेन वा' इति यदासूत्रितं तद्विभक्तुमाह

समयाचारयुक्तस्य
साधकस्य वरानने ।

जायते विविधा सिद्धिः

समयाः पूर्वोक्ताः । आचारो वक्ष्यमाणो मन्त्राराधनप्रकारः । वरमुत्कृष्टं शाक्तस्फारमयमाननं भोगापवर्गप्रदपरपदप्रवेशो यस्याः ॥

आचारं क्रमेण स्फुटयति

गिरिगह्वरमाश्रिते ॥ १ ॥

सुशुद्धे भूप्रदेशे तु
सर्वशल्यविवर्जिते ।
प्रच्छन्ने विजने रम्ये
भैरवं तत्र पूजयेत् ॥ २ ॥

सर्वशल्यविवर्जितत्वमहिकण्टकपरुषवातोपद्रवप्रस्त्रवादिहीनत्वम् । प्रच्छन्नेऽदृश्ये । पूजयेदिति कामनोचितेन संभारेण ॥ १ ॥

अथ

जपित्वाक्षरलक्षं तु
बहुरूपस्य सुव्रते ।

पञ्चप्रणवसंयोगा-
ज्जपतः सिद्ध्यति ध्रुवम् ॥ ३ ॥

बहुरूपस्य पूर्वनिर्णीतपरमार्थस्य अक्षराणां द्वात्रिंशतः परिमाणेन, लक्षमिति द्वात्रिंशल्लक्षाणि, पूर्वसेवार्थं जपित्वा, ध्रुवं निश्चितं, सिद्ध्यति यथेष्टां सिद्धिमेति साधकः । कथं जपित्वेत्याह पञ्चप्रणवसंयोगाज्जपतः । प्रकर्षेण नूयते स्तूयते अभेदपरमार्थतया विमृश्यते अशेषविश्वनिर्भरं पारमेश्वरं स्वरूपं येन स प्रणवो निष्कलनाथः, तदभिन्नव्यापिकः ओंकारोऽपि । तस्य च मृगमदकुलकैकदेशलेशवद्विश्लेष्यमाणाकारादिकलाः, तद्वाच्या ब्रह्मादिदेवताः, तदधिष्ठातॄणि धराप्रकृतिमायादितत्त्वानि, वर्णोच्चारकला ह्रस्वादिरूपाः, तदुच्चारयित्रवस्थाश्च जाग्रदाद्याः प्रत्येकं पञ्चसंख्याः, स्थूलाः शक्तिव्यापिन्यादिकलास्तद्वाच्यतदुच्चारणकलादिरूपाश्च सूक्ष्मदशाः,

'प्रदेशोऽपि ब्रह्मणः सार्वरूप्यमनतिक्रान्तश्चाविकल्प्यश्च'

इति स्थित्या परिपूर्णचमत्कारपूर्णत्वात्प्रणव-

शब्दवाच्याः । अत एवैतन्मन्त्रशरीरनिविष्टत्वादेतेऽकारादयो ब्रह्मविष्णुरुद्रशक्तिशिवप्रणवाभिधेयपिण्डबीजविशेषा भिन्नस्फारा इति कृत्वा, एते पूर्वोक्ताः सर्व एव पञ्च प्रणवा विद्यन्ते यत्र स पञ्चप्रणवो निष्कलस्तदभिन्नव्याप्तिरोङ्कारश्च । तस्मिन् पञ्चप्रणवे सम्यग्योगादुच्चारोन्मीलितहंसपदानुलग्नतात्मकत्वात् पूर्वनिर्णीतनिष्कलव्याप्त्यभिन्नसतत्त्वसकलमन्त्ररहस्यार्थभावनारूपश्च यो जपस्तस्माज्जपतो न त्वक्षरपाठमात्रादित्यर्थः ॥ ३ ॥

न केवलमित्थंजपात्सिद्ध्यति यावत्

मुच्यते नतु संदेहो
भेदनात्प्रणवस्य तु ।

पञ्चप्रणवसंयोगाज्जपत इति यदुक्तं तद्वक्ष्यमाणवर्णकलादिविश्लेषेण व्याप्तिरूपं भेदनं विना न भवति । भेदनं परतत्त्वावेशप्रदमिति मुक्तेर्निःसंशयत्वमुक्तम् ॥

---

१ ख० ग० घ० पु० तदुच्चारेति पाठः ।

तत्र मन्त्रोच्चाराङ्गभूतकालकलाज्ञानपूर्वकालातीतपदप्रवेशार्थं[1] तावद्भेदनमादिशति देवः

ह्रस्वं दीर्घं प्लुतं सूक्ष्म-
मतिसूक्ष्मं परं शिवम् ॥ ४ ॥

प्रणवं पञ्चधा ज्ञात्वा
भित्त्वा मोक्षो न संशयः ।

प्रणवमकारोकारमकारबिन्दुनादकलोच्चारेषु क्रमेण ह्रस्वाद्यतिसूक्ष्मान्तोच्चारणकालकलाप्रपञ्चरूपं भित्त्वा तत्तद्दशानुभवानुप्रवेशक्रमेणाध्यास्य परं भावमुन्मनापदासादनेन ज्ञात्वा मोक्षमाप्नोत्येवेत्यर्थः। अत्रच ह्रस्वादिनादान्ताः परस्परानुषक्ततयोच्चार्याः सूक्ष्मातिसूक्ष्मयोर्बिन्दुनादयोरुपरि अर्धचन्द्रादिनादनादान्तादिदशास्तारतम्यभाजोऽप्यनुसर्तव्याः । यथोक्तं प्राक्

सूक्ष्मसूक्ष्मतरैर्भावैरेवमेवं त्यजेत्प्रिये । (४।२६७)

इति । ह्रस्वादीनां यथा प्रणवत्वं तथा निर्णी-

---

१ ख० घ० पु० प्रवेशनार्थं

तम्,—इति सामानाधिकरण्यं युक्तमेव। न संशय इत्युक्त्या स्वानुभवसिद्धतामस्य दर्शयति ॥४॥

तदित्थं ह्रस्वादिकालकलाक्रमेण वक्ष्यमाणवाचकादिक्रमेण चैकोऽप्ययं महामन्त्रात्मा

प्रणवः पञ्चधावस्थः

पूर्वं

'प्रदेशोपि ब्रह्मणः सार्वरूप्यमनतिक्रान्तः'

इति स्थित्या ह्रस्वादयः पञ्च प्रणवा इत्यभिहितमधुना त्वेक एव महाविमर्शात्मा मन्त्र इत्थं पञ्चधावतिष्ठत इत्येवमभिहितम्,—इत्युक्तिभेदमात्रमेतत् निर्णीतदृशा वस्तुतत्त्वैक्यात् ॥

किमित्थं पञ्चधावस्थितिमात्रात्मैवायम् ? नेत्याह

हंसेन सह संयुतः ॥ ५ ॥

पूर्वं

'.....हंसोच्चारस्त्वथोच्यते ।

---

१ ख० ग० घ० तत्तस्यैक्यात् ।

हकारस्तु स्मृतः प्राणः सुप्रवृत्तो हलाकृतिः' ॥ (४।२५७) इति ग्रन्थेन हंसोऽनाहतध्वनिरिति निर्णीतम्। अतस्तेन स्वप्रवृत्तत्वादेवाकृतकमध्यमप्राणस्फुरत्तारूपेण समनन्तरवक्ष्यमाणनीत्याशेषविश्ववाङ्मयस्फारमयेन सह संयुतः तद्विमर्शविश्रान्तिपरमार्थोऽयमत्र त्यो महामन्त्ररूपः प्रणवः ॥ ५ ॥

तथाच

यत्किञ्चिद्वाङ्मयं लोके
शिवज्ञाने प्रतिष्ठितम्।
शिवज्ञानं च तत्रस्थं

यत्किञ्चित् षडध्वनो मध्याल्लोकेऽस्ति तत्सर्वं शिवज्ञानं च शिवो ज्ञायतेऽनेनेति शिवज्ञानं शिवज्ञाने ज्ञानस्फारमये पारमेशोक्तव्याप्तिसारे प्रणवे, प्रोक्तवक्ष्यमाणदृशा प्रतिष्ठितमभेदेनान्तःस्थितं यतस्तद्वाङ्मयं परावाक्प्रसररूपम्। यथोक्तं श्रीसारस्वते स्तोत्रे

'त्रयीं तिस्रो वृत्तीस्त्रिभुवनमथो त्रीनपि सरा-
नकाराद्यैर्वर्णैस्त्रिभिरभिदधत्तीर्णविकृति ।
तुरीयं ते धाम ध्वनिभिरनुरुन्धानमणुभिः
समस्तव्यस्तं त्वां शरणद गृणात्योमिति पदम्॥'(म०स्तो० २७)

इति । प्रणव इति वक्तव्ये शिवज्ञान इत्युक्तेरयं भावः—यत् वेदगारुडवैष्णवादिषु रूपसाम्येऽपि प्रणवस्य पारमेश्वरे प्रोक्तवक्ष्यमाणज्ञानव्याप्तिसारताकृत उत्कर्षः । अत एव एतद्व्याप्तिज्ञानानुसारेण सर्वत्राप्यसौ पूर्णस्फारमयत्वेन परसिद्धिप्रदः । यथोक्तं

'यतः शिवोद्भवं सर्वं शिवधामफलप्रदम् ।' (स्व०५।४५)

इति । तत्तत्परिमितव्याप्त्यनुसारेण तु स एव मितसिद्धिप्रदः । यदभिप्रायेण वक्ष्यति

'भ्रमयत्येव तान्माया ह्यमोक्षे मोक्षलिप्सया ।' (१०।११३९)

इति । आस्तां तावदेतदिह । यच्चैतदेवंविधप्रणवात्मकं शिवज्ञानं तदपि । तत्रेति निरूपितसतत्त्वे हंसे, तिष्ठति ॥

तदित्थमस्मिन्निष्कलनाथे पञ्चप्रणवे नित्योच्चरन्नादावमर्शरूपः

हंसः प्रणवसंयुतः ॥ ६ ॥

प्रणवे प्रोक्तसतत्त्वे सम्यग्युतः प्राणरूपतया स्थितः, अत एवाशेषविश्वक्रोडीकारिहंससम्बन्धादेव शास्त्रान्तरोक्तब्रह्मविष्णुरुद्रशक्तिशिवप्रणवाभेदव्याप्तिरयं महामन्त्र इत्युक्तमेव । अतश्च यदुक्तं

'पञ्चप्रणवसंयोगाज्जपतः सिध्यति ध्रुवम्'

इति । तत्रानाहतविश्रान्तिसतत्त्वो निष्कलोच्चारप्रगुणीकृतमध्यधामसंलीनतया जपः कार्यः,—इति परमार्थः पर्यवसितः ॥ ६ ॥

अथ प्रणवसंयोगं विना कीदृगयम् ? इत्याशङ्क्याह

विना प्रणवसंयोगा-
ज्जीव एको व्यवस्थितः ।

जीवो विश्वस्य प्राणभूतो हलाकृतिरेव यथोक्तं

'हकारस्तु स्मृतः प्राणः सुप्रवृत्तो हलाकृतिः' (४।२५७)

इति । अत्र प्राण इत्यकारादिकलात्मकप्रणवसंयोगं विना । एक इति अद्वितीयः । सर्वमन्त्रवीर्यान्तर्व्यवस्थित इत्यविचलद्रूपतयानुच्चार्यः,

अथचाऽयवस्थितो न केनचित्प्रतिनियतेन रूपेण स्थितोऽनियन्त्रितस्फार इत्यर्थः। जीवशब्देन व्यवहरन्नयमेव महास्फुरत्तारूप आत्मा मन्तव्य इति ध्वनति। कश्चित्तु मन्त्रस्वरूपनिरूपणपरे ग्रन्थेऽस्मिन्मुख्यं च शब्दार्थमुत्सृज्य हंसशब्देन हंसपथः प्राणशब्देन च स एव, यदि वा प्रणवप्राणयोरैक्यात्प्राणयोगं विना जीवः पुरुषः, एक इत्यनभिव्यक्तज्ञानक्रियास्वभावः, इति व्याचष्टे। तद्युक्तमयुक्तं वेति सचेतसो जानन्ति॥

यतोऽयं प्रणवसंयोगं विना स्वरूपमात्रावस्थितो जीवस्ततः

यथाप्रकृति संयुक्तो
न च तिष्ठति चैकतः॥ ७॥
तथा षष्ठेन संभिन्नो
देहे जीवः प्रवर्तते।

जीवो हंसः प्रकृत्यनतिक्रमेण स्वभावानुल्लङ्घनेन संयुक्तः स्वभावानुल्लङ्घनेन चास्य

इति उक्तनीत्या अकारसंगत एव भवतीत्यकारेण संयुक्तोऽसौ। एकत इत्येकस्मिन्नद्वितीये सामान्यस्पन्दात्मनि रूपे न तिष्ठति अपितु किञ्चित्स्पन्दाधिक्यमिव भजते यथा, तथा षष्ठेन ऊकारेण संभिन्नो मिश्रितो देहे प्रवर्तते सर्वेण स्वाभाविकेन प्राणवाहेन वहँल्लक्ष्यते एव। तथाशब्दापेक्षया यथाशब्दोऽप्यत्राध्याहार्यः॥

पूर्वोक्तकरणबन्धानुसारिणा

चोदितस्तु यदा तेन
तदाचोर्ध्वं प्रवर्तते॥ ८॥

तेनेति षष्ठेन ऊकारेणार्थाद्विन्द्वादियुक्तेन। तदाचेति तदैवेत्यर्थः। ऊर्ध्वमिति तालवादिस्थानम्। एतच्चोदनां विना त्वस्याकारयुक्तस्यापि नोर्ध्वप्रवृत्तिर्भवतीत्यर्थः॥ ८॥

तदित्थं

प्रत्यक्षमपि तत्तत्त्वं
महामायाविमोहिताः।

कथितं नाभिजानन्ति
विना शास्त्रेण चोदनाम् ॥ ९ ॥

तदेतन्नादावमर्शसारं मन्त्रतत्त्वं, सर्वस्य प्रमातृरूपं सदोच्चरद्रूपत्वात्स्वप्रकाशमपि, तथा शास्त्रेणेत्यागमवाक्यैः कथितमपि, महामायया सदांशिवेशादीनपि मोहयन्त्या अपूर्णताख्यातिपरमार्थया विशेषेण चिद्रूपत्वादात्मस्वरूपे विश्वत्रानन्त्यात्मतावभासनपुरःसरमनात्मनि देहादावात्मतामवभासयन्त्या मोहिताः सङ्कुचत्तां ग्राहिताः । चोदनामिति महामायातिरस्कारिपरमेशानुग्रहकारिशक्त्युद्बोधनं विना न अभीति आभिमुख्येनाश्वासरूढ्या जानन्ति । अतः सर्वथैतत्तत्त्वपरिज्ञानमेव परमोपादेयमिति तात्पर्यम् । उक्तं च ज्ञानगर्भे

'तवाम्ब परमाक्षरी भवति रूपमेतद्धहि-
र्विंशत्प्रणवरूपतां समुपयाति हृत्कोटरे ।
अवेद्यमकृतात्मभिर्जननि बिन्दुनादात्म य
द्विदन्ति तदहेलया त्वदनुसंस्मृतेर्योगिनः ॥'

इति ॥ ९ ॥

तज्ज्ञप्त्यर्थमाह

षष्ठश्चोर्ध्ववहो ज्ञेयः
स्वभावमुखसंस्थितः ।

षष्ठ ऊकारः, 'चोदितस्तु यदा तेन' इत्यत्र य ऊर्ध्ववह ऊर्ध्वप्रवर्तक उक्तः, स्वभावो विश्वानुप्राणको मध्यमार्गः स एव मुखं शिवपदप्राप्त्युपायस्तत्र सम्यक्पूर्वोक्तकरणबन्धक्रमेणोच्चरन् ज्ञातव्यः ॥

अतश्च

अप्रकाशः स्वदेहस्थो
गुणभूतः प्रवर्तते ॥ १० ॥

योऽयं स्वप्रवृत्तत्वात्प्रकाशयितुमशक्यो रहस्यरूपश्चानाहतनाथः, स्वे आत्मीये उपचितरूपे मध्यधामात्मनि देहे तिष्ठति नित्यावस्थितः स, गुणप्रकारं भूतः प्राप्तस्तेन युक्तः सन् प्रवर्तते ऊर्ध्वमारोहतीत्यर्थः ॥ १० ॥

अन्यथा

निर्गुणस्तु यदा देव
एकाकी कालवर्जितः ।

विज्ञातव्यं न किञ्चित्स्या-
त्केवलो निष्कलस्तु सः ॥११॥

स्वतन्त्रचित्स्फारमयत्वाद्देवः, तदतिरिक्तस्याभावादेकाकी, नित्यत्वात्कालवर्जितः, ईदृग्योऽनाहतनाथो नच तद्विज्ञातव्यं किंचित् नासौ केनापि प्रकारेण ज्ञेयो भवति ज्ञात्रेकरूपत्वादत एव केवल इत्यद्वितीयः । कलाभ्योऽकारादिवर्णेभ्यो ह्रस्वादिकालकलाभ्यो मेयत्वरूपपरिच्छेदेभ्यश्च निष्क्रान्तः, ताश्च कला यस्मान्निष्क्रान्ताः स एव चिद्घनपरमार्थ इति यावत् । एतत्सारत्वादेव च चतुष्कलनाथोऽपि निष्कल इत्युच्यते ॥ ११ ॥

अतश्च

तस्य रूपं शरीरं च
नास्ति वर्णः क्रिया तथा ।

रूपं शुद्धस्फटिकाभत्वादि । शरीरं पञ्चवक्त्रादि वाच्यगतम् । वर्णः अकारादिर्वाचकरूपः । क्रिया उच्चारादिरूपा । कश्चित्तु वर्णो ब्राह्मणादिः, क्रिया तदुचिता चेष्टेति ॥

तदित्थं ज्ञेयपक्षादुत्तीर्णः

स कथं गृह्यते सूक्ष्म
अग्राह्यो नित्यमव्ययः ॥ १२ ॥

सूक्ष्मो विश्वकारणम्। अग्राह्य इन्द्रियागोचरः। अव्ययोऽपरिणतिधर्मा ॥ १२ ॥

यतोऽयमीदृक्

एतस्मात्कारणाद्देवि
षष्ठं बीजं नियोजितम्।

अस्य परमेशेन मन्त्रराजरूपताप्राप्त्या। पुंसामनुग्रहायेति शेषः ॥

तन्नियोजनाच्च

पञ्चपञ्चकसंयुक्तो
देहे सकलनिष्कलः ॥ १३ ॥

ह्रस्वादिरूपमुच्चारणकालकलानां पञ्चकमेकम्, अकारोकारमकारबिन्दुनादाख्यवाचककलानां द्वितीयम्, तद्वाच्यब्रह्मविष्णुरुद्रेशसदाशिवानां तृतीयम्, तदधिष्ठेयधराप्रकृतिमायेश्वरसदाशिवतत्त्वादीनां चतुर्थम्, वर्णो-

च्चारयित्रवस्थानां जागरस्वप्नसुषुप्ततुर्यतुर्यातीतानां पञ्चममिति पञ्चभिरुक्तवक्ष्यमाणैः पञ्चकैः परापररूपतया स्थितैर्यदा देहे हृत्कण्ठादिक्षेत्रे संयुक्तस्तदानाहतभट्टारको निष्कलोऽपि विचित्रेदृक्कलायोगात्सकलनिष्कल उच्यते इत्यर्थः ॥ १३ ॥

तेनैतदुच्चारणेऽपि निष्कलतत्त्वविश्रान्तावेवावधातव्यमित्याह

ग्रहणं तु यदा तस्य
योगी योगविचिन्तकः ।
योगेनावाहितस्यापि
भावमात्रं तु भावयेत् ॥ १४ ॥

अत्र श्लोक इच्छतीत्यध्याहार्यम् । तेनोक्तरूपपञ्चपञ्चकव्याप्तिरूपं योगं यो विकल्पपूर्वकाविकल्पविमर्शात्मकं चिन्तयति स योगी यदा तस्य ग्रहणमुच्चारणमिच्छति तदा, योगेन पूर्वोक्तदिव्यकरणबन्धाद्यात्मना, आ समन्ताद्वाहितस्य मध्यधाम्नाभीष्टं

पदं प्रापितस्यापि, भावमात्रमिति

'सत्तामात्रं परं शान्तम्' (४।२९३)

इति योजनिकाग्रन्थनिर्णीतमनाहतध्वनिपरमार्थपूर्णस्फुरत्तां भावयेदुक्तव्याप्तिकमन्त्रोच्चिचारयिषाविमर्शपुरःसरं तद्ग्रहणेनैव मन्त्रभूमिमारुह्य, तदपरकोटौ विश्राम्यन्मन्त्रवीर्यमनुशीलयेदित्यर्थः । तदुक्तं शिवसूत्रेषु

'विद्याशरीरसत्ता मन्त्ररहस्यम् ।' (२।३)

इति, तथा

'महाह्रदानुसन्धानान्मन्त्रवीर्यानुप्रवेशः' (१।२२)

इति । महाह्रदस्य विद्याशरीरस्य परसंवित्स्फारस्य सत्ता स्फुरत्ता मन्त्राणां रहस्यं वीर्यं, तत्र चानुप्रवेशो महाह्रदस्य मध्यमार्गस्यानुगततया मन्त्रव्याप्त्यनुसरणपूर्वकतदुच्चिचारयिषाविमर्शानुप्रवेशात्मनः सन्धानान्मन्त्रविश्रान्त्यारोहादित्यर्थः ॥ १४ ॥

एवं मन्त्रवीर्यानुप्रवेशयुक्तिमुक्त्वा साधकोचितं तदनुप्रवेशक्रममाह

यदा करोति सृष्टिं च
ऊर्ध्वे बिन्दुः प्रवर्तते ।

आराधको यदा सिद्धिकामो भवति, तदा-स्योक्तयुक्त्यैव कृतोर्ध्वपदविश्रान्तेराराधकसंविदनुसारेणोन्मिषितशाक्तबलो मन्त्रः ऊर्ध्वे सर्वाध्वमूर्धनि समस्तभावाभावरूपशिवादिकालाग्न्यन्तजगदासूत्रणात्मकाविभागप्रकाशरूपः प्रवर्तते, ततः प्रभृति सृष्टिक्रमेण हृदन्तमस्यापूरयति अभिलषितपदापूरणेनेत्यर्थः ॥

मुमुक्षोस्तु न प्रोक्तसतत्त्वबिन्द्ववष्टम्भप्राधान्येन मन्त्रोच्चारणम्, अपितु

बिन्दूपरि च यच्छान्तः
शिवः परमकारणम् ॥ १५ ॥

तत्र बिन्दुर्लयं याति

परमकारणत्वेन परमशिवाद्वैशिष्ट्यमुक्तं स्यादिति ॥ १५ ॥

यस्मादेवं, तस्मात्

तत्स्थानं दुर्लभं सुरैः ।

सुरैर्देवैः सर्वेन्द्रियैश्च, मननमात्रप्रधानसूक्ष्ममनोव्यापारं विषयसामरस्यपदातिक्रा-

न्तत्वात्। स्थानमिति तिष्ठत्यस्मिन्नभेदेन विश्वमिति व्युत्पत्त्या ॥

एवंविधमप्येतत्

षष्ठस्वरसमायोगा-
दभ्यासादचिराल्लभेत् ॥ १६ ॥

समवधानोद्यत इत्यनुषङ्गः। षष्ठः स्वरो बिन्द्वाद्युपलक्षणपर इत्युक्तमेव ॥ १६ ॥

अत एव

षष्ठश्च पञ्चमश्चैव
तस्य देवि गुणाः स्मृताः।

तस्येति महाविमर्शात्मनः परतत्त्वस्य, षष्ठ ऊकारः, पञ्चमस्तु तदन्तर्भूत एव उकारः, तावेवाध ऊर्ध्वं बहिःशक्त्यात्मकावस्येति पूर्वोक्तमेयार्थं चशब्दादेवकाराच्च प्रोक्तरूपा नियता मकारबिन्द्वादिप्रमेयपरिपाटी गुणा ऊर्ध्वाधःप्रसरणहेतवो धर्माः शक्तिरूपा इत्यर्थः। स्मृता इति अविच्छिन्नेन शिवादिश्रीकण्ठान्तेन गुरुपारम्पर्येणेत्यर्थः। कश्चित्तु चकारमेव-

शब्दं च अचेतित्वा गुणा इति बहुवचनं जपावृत्त्यपेक्षयेति व्याख्यातवान् ॥

यस्मादेवं ततः

सगुणः सकलो ज्ञेयो
निर्गुणो निष्कलः शिवः ॥१७॥

इत्थमुक्तनीत्या निष्कलनाथोऽपि सकलः सम्पन्नः । यस्तु पूर्वं

'हकारस्तु स्मृतः प्राणः सुप्रवृत्तः' (४।२५७)

इत्यनाहतनाथो निर्दिष्टः, स एव निर्गुणत्वात्तत्त्वतो निष्कलः ॥ १७ ॥

अत एव

सकलो ग्रहसंयुक्तो
निष्कलो भावमाश्रितः ।

ग्रह उच्चारः । भावः सुप्रवृत्ता महास्फुरत्तात्मा स्फुरत्ता ॥

यतश्च पूर्वोक्तदृशा तात्त्विकनिष्कलामर्शसार एवायं सकलनिष्कलशब्देन पूर्वं व्यवहृतश्चतुष्कलनाथः, ततोऽस्मिन्

सकले जप्यमाने तु
जप्तो भवति निष्कलः॥ १८॥

यद्येवम्, अयमेव चतुष्कलभट्टारकरूपः सूक्ष्मः सकलपारमार्थिकनिष्कलतत्त्वविश्रान्त्यर्थं जपाद्युपासाभिराश्रीयतां, किमिति द्वात्रिंशदक्षरात्मा स्थूलः सकलः

'जपित्वाक्षरलक्षं तु बहुरूपस्य' (६।३)

इत्याद्युक्त्योपास्य उक्त इत्याशङ्क्याह

सुरासुराणां देवेन
यजनोपायहेतुना।
रूपं तु सकलं तस्य
द्विधावस्थं प्रकाशितम्॥ १९॥

आदिवाक्यनिर्णीतस्वरूपेण देवेन चिदानन्दपरमार्थेन स्वच्छन्दभट्टारकेण। सुराणामिति ज्ञानमार्गाश्वस्तहृदयानां, असुराणां च ज्ञानायोग्यत्वेनाज्ञानमार्गाश्वस्तानां मोक्षाद्यर्थं यागोपायत्वेन। तस्येति स्वस्वरूपस्यानाहतात्मनो रूपं द्विधावस्थम्। सकलमिति चतुष्कलबहु-

रूपात्मकं तत्तदनुग्राह्यानुग्रहोचितं[1] प्रकाशितम्। एतदुक्तं भवति—एकमेवेदं पारमेश्वरं तत्त्वं स्थितमनुग्राह्यानुग्रहानुसारं स्फुरितं, न त्वत्र वास्तवः कोऽपि भेद इति। यथोक्तं

'पुंसामनुग्रहार्थाय परोऽप्यपरतां गतः'

इति। अत एव योग्यजनाभिप्रायेण केवलचतुष्कलनाथभट्टारकाश्रयः साधनविधिरग्रे भविष्यति। यस्तु तात्त्विको निष्कलनाथो नासौ जातुचिद्ध्येयजप्यादिरूपो भवति तस्याशेषविश्वात्मपरमातृस्फुरत्तैकघनत्वादित्युक्तम्। यत्तु द्विधावस्थं सकलमिति सकलनिष्कलं देवानां दैत्यानां च प्रकाशितमिति व्याख्याय दैत्यानां तामसत्वादनुचितमेतत्प्रकाशनम्, आयातशक्तित्वेनासुराणामिति पूर्वजात्युदीरणं विरुद्धमिति केनचिच्छङ्कित्वा पूर्वावस्थामात्रकथनमेतदिति परिहृतं, तद्युक्तमयुक्तं वेति सचेतसः प्रमाणमित्यलं पूर्वैः सह पदे पदे निर्बन्धनेन॥ १९॥

---

१ ग० पु० तत्तत्पदानुग्राह्यानुग्रहोचितमिति पाठः।

तदेतस्य मूलमन्त्रस्य

प्रथमं प्राकृतं रूपं
विकृतं च द्वितीयकम्।

प्रथममिति विश्वोच्चारभित्तिभूतत्वात्प्रधानं प्रकृतेः स्वभावादायातं स्वयमुच्चरद्रूपम्। विकृतं तु तत्प्रथमप्रसररूपमकारात्मकं नतु विपर्ययेण व्याख्येयम्

'स्वयमुच्चरते हंसः' (७।५८)

इति

'.....तस्माद्वर्णास्तु प्राणतः।
उत्पद्यन्ते लयं यान्ति.....॥' (४।२४८)

इति

'शास्त्रं शब्दात्मकं सर्वं शब्दो हंसः प्रकीर्तितः' (४।३४१)

इत्यादिवाक्यव्याघातापत्तेः॥

तदित्थमेकत्रापि मन्त्रे युगपत्

प्रकृतिर्विकृतिश्चैव
उभे षष्ठेन संयुते॥ २०॥

दर्शितमेवैतद्यथा मन्त्रे हलाकृतेः प्रकृतिभूतस्य शिरोरेखारूपा विकृतिशब्दवाच्या

अकारकलास्तीति युगपदेव प्रकृतिविकृती षष्ठकलायुक्ते ॥ २० ॥

अत एव

ये पदार्थाः पुरा प्रोक्ता-
स्तत्रासावुच्छ्वसन्मुहुः ।
प्रवर्तते च एतेन
पुनस्तेन निवर्तते ॥ २१ ॥

यः समनन्तरमेव

'निर्गुणस्तु यदा देवः' (६।११)

इत्युक्त्या निष्कलनाथ उक्तोऽसौ, उच्छ्वसन्नित्याकारोकारकलासम्भेदेनोर्ध्वं प्रसरन्, तत्रेति पूर्वोक्तेषून्मनान्तेषु पदार्थेषु, तेनैव पूर्वोक्तेन क्रमेण प्रवर्तते द्वादशान्तमारोहति । पुनश्च तेनेति प्रातिलोम्येन निवर्तते हृदयान्ते वर्णव्यक्तिमेति अनाहतध्वनिमेवाविशति । मुहुरिति जपावसरे भूयो भूय इत्यर्थः ॥ २१ ॥

तदित्थमयं पदार्थेष्वारोहावरोहौ कुर्वन्

प्रणवः पञ्चधावस्थः

पञ्चधात्वमस्य वाचककलाक्रमेण वाच्यक्रमेण च प्रथयति

त्रिवर्णश्च त्रिदैवतः ।
बिन्दुनादसमायुक्तः
प्रणवः परिपठ्यते ॥ २२ ॥

बिन्दुनादसंभेदं विना वर्णसङ्घट्टनामात्ररूपता भवति, नतु प्रकर्षेण नूयतेऽनेन परं तत्त्वमित्येदृक्प्रणवत्वमित्यर्थः । एवं चाकारोकारमकारबिन्दुनादभेदात्प्राग्वद्वाचकरूपाः पञ्च प्रणवाः, ब्रह्मविष्णुरुद्राः वक्ष्यमाणेश्वरसदाशिवसहिता वाच्यरूपाः पञ्च च ॥ २२ ॥

तदाह

अकारश्च उकारश्च
मकारश्च तृतीयकः ।
वर्णत्रयमिदं प्रोक्तं
ब्रह्माद्या देवतास्त्रयः ॥ २३ ॥
बिन्दुनादसमायोगा-
दीश्वरश्च सदाशिवः ।

एते वै प्रणवाः पञ्च

ब्रह्माद्या ये त्रयो देवता इति सम्बन्धः। वाच्यवाचकरूपा इत्यर्थात् ॥

ते चैते

हंसः प्राणयुतः सदा ॥ २४ ॥

'हकारस्तु स्मृतः प्राणः' (४।२५७)

इति यः पूर्वं हंसप्राणोऽनाहतध्वनिरुक्तस्तेन सदा युतस्तदनुलग्नस्तां महाविमर्शाभित्तिं विना कस्याप्यस्फुरणादित्यर्थः ॥ २४ ॥

अत एवात्र

परमात्मा शिवो हंस-
स्त्वपरेण समन्वितः ।

यो हंसः स्वयमुच्चरद्रूपो वाचकवृत्त्या, वाच्यवृत्त्या तु परमात्मा सर्वेषां ब्रह्मादीनामनुप्राणकः, परनिर्वाणात्मकश्रेयःप्रदत्वाच्छिवो वाच्यवाचकयोरत्राविभागेन प्रकाशानन्दघनत्वेन स्फुरणात्, सोऽयमीदृशो हंसः अपरेणेति प्रोक्तरूपवाच्यवाचकरूपेण प्रणवपञ्चकेन समन्वितः

संबद्धः। अत्र चाकारादिरूपेषु प्रणवेषु ह्रस्वाद्युच्चारकलाः जाग्रदादयोऽवस्थाभेदाः, पृथिवीप्रकृतिमायेश्वरसदाशिवान्तानि च ब्रह्माद्यधिष्ठितानि तत्त्वानि इति पञ्चकान्तराण्येतानि अन्तर्भूतानि निर्णीतदृशा प्रणवरूपाण्यनुसर्तव्यानि ॥

न केवलमित्थमपररूपाः पञ्च प्रणवा मन्त्रेऽस्मिन्स्थिता इति, यावत्

परतः प्रणवान् पञ्च
पुनरेव वदाम्यहम् ॥ २५ ॥

अन्यतन्त्रसिद्धान्तवैलक्षण्येनेत्यर्थः ॥ २५ ॥

तानाह

शक्तिश्च व्यापिनी चैव
समनात्मा च निष्कलः।
उन्मना च तथा देवि
प्रणवाः पञ्च कीर्तिताः ॥ २६ ॥

अत्रापि वाचककलानां, वाच्यानां तद्धर्मीकृतसुसूक्ष्मतमोच्चारकलोच्चारयित्रवस्थाशक्ति-

तत्त्वाद्यावरणानां च पूर्वोक्तयुक्त्या प्रणवत्वम् ॥ २६ ॥

तदेतावतो विश्वस्य भित्तिभूतः

परतः परमो हंसः
सर्वं व्याप्य व्यवस्थितः ।

यो निर्णीतचरः परमो हंसः, स परतः प्रकृष्टतया परापरभेदभिन्नं प्रणवपञ्चकं, तद्द्वारेण च विश्वं व्याप्य स्थित इति स एव परमोपादेयः । तदभेदविमर्शमयत्वेन निष्कलभट्टारकोऽपि ॥

तदत्र

एते वै प्रणवाः पञ्च
परापरविभागशः ॥ २७ ॥
परापरेण हंसेन
नित्यमेव प्रणामिताः ।

हंसो हलाकृतिः स्वशक्त्याद्यकारादिपरापरप्रणवयोगाच्चतुष्कलतां प्राप्तः परापर उच्यते । तेनोभयरूपेण प्रणामिताः प्रह्वीभावमापादिताः

स्वप्रत्यवमर्शप्रवणाः कृताः । प्रणामिता इत्यैशः पाठः । अत एव प्रकर्षेण नूयते परं तत्त्वं यैस्ते प्रणवा इति प्रारम्भ एवोक्तमस्माभिः ॥ २७ ॥

अतश्चैते

प्रवर्तन्ते हि सर्वत्र
भुक्तिमुक्तिफलप्रदाः ॥ २८ ॥

सर्वत्रेति साधकपुत्रकादिविषये ॥ २८ ॥

तस्मादयं मूलमन्त्रः

पञ्चभिस्तु युतस्त्वेभिः
स पञ्चप्रणवात्मकः ।

यो निःस्वभावः परापरप्रणवभेदप्रथनद्वारेणैव विश्वत्र कारणं चतुष्कलनाथ इति निर्णीतमेवैतत् ॥

किंच

तत्रस्थ एकरूपस्तु
निष्कलस्तत्त्वतः स्मृतः ॥२९॥

तत्रेति पूर्वोक्तप्रणवविश्रान्तिधाम्नि चतुष्कलनाथे यस्तिष्ठति । एकरूप इति प्रोक्त-

प्रकृतिरूपः अनाहतभट्टारकः । स एव तत्त्वतो निष्कल इत्यर्थः ॥ २९ ॥

न केवलमसौ, यावत्

तद्योगादपि तद्बीजं

प्रोक्तनिष्कलसंबन्धाद्बीजमपीति चतुष्कलनाथोऽपि निष्कल उच्यते इत्यर्थः ॥

किंच

सर्वबीजप्ररोहकम् ।

सर्वेषां बीजानां ब्रह्मादिकारणानामङ्ग-ब्रह्मादिमन्त्राणां च प्ररोहकं सामर्थ्यप्रदं तद्योगादेव ॥

अत्र हेतुः

प्रवर्ततेऽयतो यस्मा-

द्देवासुरनिकेतनम् ॥ ३० ॥

अयते गच्छति स्वयमुच्चरति चित्प्रकाशाभेदेन स्फुरतीत्ययो हलाकृतिस्ततो, यस्माद्देवासुराणां प्राङ्निरूपितनीत्या निकेतनं उपासास्थानं चतुष्कलबहुरूपात्म मन्त्रद्वयं प्रवर्ततेऽनुग्रहादौ प्रसरति, ततो युक्तमुक्तं

'तद्योगादपि तद्बीजं सर्वबीजप्ररोहकम् ।' (६।३०)

इति । देवासुरा इन्द्रियाणि तन्निकेतनं प्राण इति केचित् ॥ ३० ॥

अतश्च प्रथमपटलनिर्णीतव्याख्यनुसारं चतुष्कलबहुरूपाभ्यां विश्वस्य स्वीकारात्तयोश्च परस्फुरत्तासारानाहतध्वनिविश्रान्तत्वात्

तत्र मन्त्राश्च वर्णाश्च
प्रतिष्ठां यान्ति नान्यथा ।

मन्त्राः पिण्डबीजानि । वर्णा मालामन्त्रसम्बन्धिनो मातृकावर्तिनश्च सर्वेऽनाहत एव प्रतिष्ठिताः । नहि परां स्फुरत्तां विना कस्यापि स्फुरणं घटते । उक्तं च श्रीस्पन्दे

'तदाक्रम्य बलं मन्त्राः ।' (२।१०)

इत्यादि ॥

अतश्च

तस्य बोधाद्विमुच्यन्ते
अहिकञ्चुकवत्प्रिये ॥ ३१ ॥

दीक्षिता इति शेषः ॥ ३१ ॥

एतत्स्फुटयति

तावद्भ्रमति संसारे
यावत्तत्त्वं न विन्दति ।
विदिते तु परे तत्त्वे
न भूयो जायते क्वचित् ॥३२॥

यथाहिस्त्यक्तेन कञ्चुकेन न पुनः श्लिष्यति, तथा समनान्तेन बन्धेन त्यक्तेन तत्त्वज्ञो न भूयः स्पृश्यते ॥ ३२ ॥

तत्त्वं हंसरूपमेवेति दर्शयन्नेतदेव भूयः स्फुटयति

अकृतार्थो नरस्ताव-
द्यावद्धंसं न विन्दति ।

विन्दति लभते स्वत्वेन प्रत्यभिजानाति ॥

एतत्सोपायं वैधर्म्यदर्शनेन प्रकृते योजयति

प्रणवेन समायुक्तं
कृतार्थ इति निर्दिशेत् ॥ ३३ ॥

प्रणवेन चतुष्कलेन सम्यगायुक्तमिति निर्णीतवक्ष्यमाणतदुच्चारज्ञानतदुच्चारणौपयिक-

मेव परनिष्कलस्वरूपविश्रान्तत्वान्नरः कृतार्थो भवतीत्यर्थः ॥ ३३ ॥

अतश्च

उच्चारं च ततो ज्ञात्वा
उच्चरेत्तं वरानने ।

उच्चरेदुच्चारयेत् । तमिति परविश्रान्त्युपाय-भूतं चतुष्कलम् ॥

तत्र

उच्चारस्त्रिविधो देवि
हंसस्य समुदाहृतः ॥ ३४ ॥

उक्तरूपपरापरप्रणवाधिष्ठानाद्धंसस्यापि परापरः स्वरूपनिष्ठत्वेन तु परात्पर इति त्रिविधो य उच्चारः स, उदाहृतः

'एते वै प्रणवाः पञ्च परापरविभागशः
परापरेण हंसेन.....' (६।२७)

इति, तथा

'परतः परमो हंसः सर्वं व्याप्य व्यवस्थितः' (६।२७)

इत्याद्युक्त्या समनन्तरमेवोक्तः ॥ ३४ ॥

तमेवोच्चारं स्फुटयति

हकारोकारसंयुक्त-
बिन्द्वन्ते तु तृतीयकः ।
सृष्टिन्यासेन तूच्चारः
संहारयोग उच्यते ॥ ३५ ॥

ह् इति लुप्तविभक्तिकोऽनाहतस्वरूपदर्शनाय । तेन ह् इति यः स्वयमुच्चरद्रूपो हंसः स अकारेण उकारेण च वर्णेन संयुक्तस्तदुपरि च बिन्दोरन्ते समीपे तृतीयक इत्यनुस्वाररूपो मकारोऽस्य सम्बद्ध एवमेतदन्तो य उच्चारः । सृष्टेरिति जागराद्यवस्थात्रयाधिष्ठातृसृष्टिस्थितिसंहारकारिभेदमयब्रह्मविष्णुरुद्रसर्गस्य यो न्यासः पृथक्पृथग्वाचकत्वेन विमर्शस्तेन न त्वभेदेनेत्यर्थः । एतेषां तु त्रयाणामपि भेदमयानां संहारयोग इति तुर्यदशाप्रथमकोटिसंस्पर्शात्मकबिन्दुपदैक्ययोजनारूप उच्यते न त्वत्र वर्णोच्चारव्याप्तिरस्ति ॥ ३५ ॥

यथा विभक्तः प्राक् तेन

एवमादिक्रमेणैव
मन्त्रमुच्चारयेद्बुधः ।

बुधो ज्ञानी, एवमित्युक्तरूपेण, आदीत्यकारादिक्रमेण, मन्त्रमित्येतत्सम्बन्धादेव मन्त्ररूपतां प्राप्तं हंसमुच्चारयेत् ॥

एतदनुवदन्नत ऊर्ध्वं मन्त्रोच्चारे इतिकर्तव्यतान्तरमाह

बिन्दुस्थं त्रितयं कृत्वा
वक्त्रमुद्घाटयेत्ततः ॥ ३६ ॥

त्रितयं मकारान्तं, बिन्दुस्थं कृत्वेति तदभेदव्याप्तिसारं संपाद्य, नादोच्चारणार्थं वक्त्रमास्यमुद्घाटयेदित्येतदुच्चारावसरे दिव्यं करणं बध्नीयादित्यर्थः ॥ ३६ ॥

ततश्च

ईषदुद्घाटिते वक्त्रे
तदा नादं विजानत ।

अनयेतिकर्तव्यतया मन्त्रोच्चारावहितस्य नादनादान्ताभिव्यक्तिर्भवतीत्यर्थः ॥

किंच

नादस्थं पञ्चधा चैव
शक्तिस्थं पञ्चधा पुनः ॥ ३७ ॥

व्यापिन्यां पञ्चधा चैव

मन्त्ररूपं विजानतेति सम्बन्धः । पञ्च-धात्वं च

'ब्रह्मादिपञ्चकं यच्च.....।' (६।४१)

इत्युपक्रम्य

'परापरविभागेन ते सर्वत्र व्यवस्थिताः'(६।४१)

इति समनन्तरवक्ष्यमाणस्थित्या मन्तव्यम् । तेन योजनिकाग्रन्थे नादस्य यदष्टकलत्वमुक्तं तद्वाचकस्वरूपविमर्शयुक्त्या । इदं तु पञ्चधात्वं तत्पदाधिरूढवाच्यरूपकारणविमर्शयुक्त्येति न पूर्वापरवैषम्यं किञ्चित् ॥ ३७ ॥

किंच

समनानिष्कलात्मनोः ।

ऊर्ध्वोर्ध्वमवस्थितयोः । पूर्वनिर्णीतं रूपं विजानतेत्यनुषङ्गः ॥

अथैतदुपरि

उन्मना च परं तत्त्वं

सर्वं व्याप्य व्यवस्थितम् ॥३८

पूर्वनिर्णीतं रूपं जानीतेत्यर्थः ॥ ३८ ॥

उपसंहरति

एवं ज्ञात्वा विमुच्यन्ते
शिवतत्त्वविदो जनाः।

एवमुक्तक्रमेण, ज्ञात्वा उन्मनान्तानि पदान्यनुभूय, ये शिवतत्त्वमिति परमशिवमात्मानं, विदन्ति प्रतिजानन्ति, ते विशेषेण सिद्धान्तवैलक्षण्येन मुच्यन्ते। तत्र हि

'अवर्णोवर्णमकारबिन्दुनादाश्च तस्य सन्मात्राः'।

इत्येवं मन्त्रव्याप्तिस्तद्गुरुभिर्दर्शिता॥

अत्र वैधर्म्यमाह

अन्यथा नैव मुच्यन्ते
बिन्द्वन्ते ये व्यवस्थिताः॥३९

बिन्दौ तदन्ते च नादादिपदे ये व्यवस्थिता विश्रान्तास्ते नैव मुच्यन्तेऽपितु तत्तत्पदोचितविभूतिमेव भजन्ते॥ ३९॥

यतः

ज्योतीरूपं तु बिन्दुस्थं
नादस्थं शब्दरूपकम्।
शक्तिस्थं स्पर्शगं चैव
तदूर्ध्वं शून्यरूपकम्॥ ४०॥

यदेतद्विन्दुस्थं त्रितयमिति नादस्थं पञ्चकमित्याद्युक्तं तद्विन्दुस्थं ज्योतीरूपमिति वेद्याविभागप्रकाशरूपम् । नादस्थं तु शक्तिरूपमिति विसर्गशक्तिमयम् । शक्तिपदावस्थितं तु स्पर्शागमानन्दस्पर्शसतत्त्वम्, तदूर्ध्वं व्यापिन्यां तु शून्यताभासरूपम् ॥ ४० ॥

यतो व्यापिनीधाम

ब्रह्मादिपञ्चकं यच्च
तेषां शून्यं च तत्पदम् ।

चकाराद्ब्रह्माद्यधिष्ठेयानां तत्त्वानामपि । तैः शून्यमिति वक्तव्ये तेषां शून्यमिति षष्ठ्या ते सर्वे तत्र तदुचितप्रकृष्टसंविद्रूपतया स्थिताः, नतु क्वापि गताः—इति दर्शयति । अत एव पूर्वमशून्यं शून्यमित्याद्युक्तम् ॥

ननु ब्रह्मादयो हृदयादिललाटान्तपदावस्थितास्ते कथमियतीं भूमिमायाता इत्याह

परापरविभागेन
ते सर्वत्र व्यवस्थिताः ॥ ४१ ॥

परमेश्वरस्य हि चिदानन्देच्छाज्ञानक्रियाख्याः शक्तयस्तत्पदोचितप्रपञ्चव्याप्तिभाजो ब्र-

ह्मादिपर्यन्तमाभासितवत्य इति तद्व्याप्तिसारा ब्रह्माद्याः स्थूलसूक्ष्मादिव्याप्त्या सर्वत्र स्थिताः। एतच्च एकादशे व्यक्तीभविष्यति। अथवैते तत्तत्पदौचित्येन तास्ताः सिद्धीर्ददति ॥ ४१ ॥

अथ

शून्यातीता तु समना
शुद्धात्मा तून्मना तथा ।

क्रमेण स्वोचितसंविद्रूपेत्यर्थः ॥

अथ

सर्वातीतं परं तत्त्वं
सर्वं व्याप्य व्यवस्थितम् ॥४२

सर्वातीतत्वेऽपि सर्वव्यापकत्वमस्य स्वच्छ-स्वच्छन्दचिदानन्दसुन्दरत्वात् ॥ ४२ ॥

यतश्च परं तत्त्वं सर्वं व्याप्य व्यवस्थितमत एवाकारोकारमकारवाच्या अतिस्थूला अपि

मन्त्ररूपाश्च विज्ञेया
बिन्दुधर्मात्तु देवताः ।

चकार एवार्थः। मन्त्ररूपा एव तद्भेद-व्याप्तिसारेणाविश्लेषेण ज्ञातव्याः ॥

एवं हि

तत्रस्थाः सर्वकर्माणि
साधयन्ति न संशयः ॥ ४३ ॥

तत्रेति व्याख्यातव्याप्तिसतत्त्वे मन्त्रे स्थिता उपारूढाः ॥ ४३ ॥

एवमुल्लासक्रमेण हृदयाद्वादशान्तं मुक्त्यङ्ग-मन्त्रोच्चारमुक्त्वा सिद्ध्यङ्गं तं प्रातिलोम्येना-दिशति

तत्त्वं च उन्मनात्मा तु
समना शून्यमेव च ।
स्पर्शश्चैव तथा शब्दो
रूपं च तदनन्तरम् ॥ ४४ ॥
मन्त्रात्मनि स्थिताः सर्वे
ज्ञातव्या दैशिकेन तु ।

रूपमिति बिन्दुतेजः । तदनन्तरमिति मकारोकारात्मवर्णस्वरूपम् । त एते सर्व एव प्रमेया मन्त्रात्मनिष्कलस्वरूपेऽवस्थिता उल्लास-प्रवेशक्रममविमृश्य मन्त्रावसर एव मुक्ति-

सिद्ध्यङ्गरूपेणोपलभ्यन्ते इत्यर्थः । दैशिकेनेति प्राधान्यात्, तदुपदेशात्त्वन्येनापि ॥ ४४ ॥

न केवलमेते मन्त्रस्थाः सर्वकर्माणि साधयन्ति, यावत्

तत्रस्था ज्ञानयोगं च
प्रयच्छन्ति वरानने ॥ ४५ ॥

ज्ञानं तत्तज्ज्ञेयतत्त्वानुभवं, योगं तदैकात्म्यप्राप्तिम् ॥ ४५ ॥

सर्वकर्माणि साधयन्तीति यदुक्तं, तत्र कर्मानुरूपं मन्त्रदेवतानां ध्यानमाह

कर्मकाले तु सकला-
ञ्छिरःपाण्यादिभिर्युतान् ।

कर्म अर्चाहोमादि ॥

क्रमेण

जपेत्तु सकलान्देवि
निष्कलेन समन्वितान् ॥४६॥

ध्यायेदित्यनन्तरस्थमनुषज्यते । निष्कलेन चिद्घनतापरमार्थेन, सम्यगन्वितांस्तद्विश्रान्तिसारान् ॥ ४६ ॥

यदा तु सर्वज्ञत्वादिरूपां सिद्धिमिच्छति, तदा बिन्दुविश्रान्तिसतत्त्वान्

ध्यायेज्ज्योतिर्मयान्सर्वान्

उक्तं हि

'ज्योतीरूपं तु बिन्दुस्थं' (६।४०)

इति । इह तु एतत्फलनिरूपणपरत्वेनोक्तमिति प्रकरणतो ज्ञायते इति न पुनरुक्तम् ॥

अथ बिन्दुविश्रान्त्यूर्ध्वनादपदे

शब्दसिद्धिप्रदायकान् ।

नादविश्रान्तिमयत्वेन ध्यातास्तत्सिद्धिमेव वितरन्तीत्यर्थः । एवमुत्तरत्रापि तदुचितरूपध्यानात्तत्तत्सिद्धिप्रदत्वमेषाम् ॥

यदाह

शक्तिस्थाः शक्तिदाः प्रोक्ताः
शून्यस्था व्यापकाः स्मृताः ४७
क्रमाज्ज्ञानप्रदास्ते वै
समनास्था वरानने ।
कैवल्यदास्ततश्चोर्ध्वे
सर्वज्ञाश्चोन्मने पदे ॥ ४८ ॥

शक्तिः सर्वकरणसामर्थ्यम्। शून्यं व्यापिनी। व्यापका इत्याराधकस्य व्याप्तिप्रदाः। क्रमाज्ज्ञानं शिवादिक्षित्यन्ताशेषविषयम्। कैवल्यं शुद्धविज्ञानकेवलित्वं, यद्भेदवादिशैवानां परं प्राप्यम्। ऊर्ध्व इति शुद्धात्मपदे। सर्वज्ञा इत्यक्रमाशेषविश्वाभेदप्रथाप्रदाः। यथोक्तं प्राक्

'समना क्रमविज्ञानमुन्मना त्वक्रममिति।'

इति ॥

एते च मन्त्रावयवानुभवाः[1]

तत्त्वेन वेधिताः सर्वे
ये मया परिकीर्तिताः।

तत्त्वेन परशिवेन[2] वेधिताः[3] सर्वात्मना व्याप्ताः। वेधितेत्यैशः[4] पाठः, विध विधान इत्यस्यैवायं प्रयोगः ॥

अत एव

तज्ज्ञात्वा सिद्धिदाः सर्वे
मुक्तिदाश्च न संशयः ॥ ४९ ॥

---

१ ख० घ० पु० नुभावा इति पाठः। २ घ० पु० परमशिवेनेति पाठः। ३ ख० पु० बोधिता इति पाठः। ४ ख० पु० बोधितव्या इति पाठः।

तदिति तत्त्वं, साधकानामपि ह्येतन्मन्त्रक्रमेण सिद्धिमुक्तिपर्यवसानेनैवेति योजनिकाग्रन्थे निर्णीतम् । भिन्नकर्तृत्वेऽपि कर्त्वेश्वरप्रामाण्यात् ॥ ४९ ॥

उपसंहरति

पञ्चप्रणवसंयुक्तं
तत्त्वं ते कथितं मया ।

पञ्चप्रणवोच्चारोपायप्राप्तं तत्त्वं परमशिवात्मकपरमहंसस्वरूपं, ते तवैव योग्यायाः शक्तेर्मया कथितं, नान्यस्य कस्यचित् ॥

तदेतज्ज्ञात्वा

पञ्चप्रणवपूर्वेण
ओंकाराद्ययुतेन तु ॥ ५० ॥
नमस्कारावसानेन
बहुरूपेण सुव्रते ।
जपतः सिद्धिमाप्नोति
लक्षेणाक्षरसंख्यया ॥ ५१ ॥

साधक इति शेषः । पञ्चप्रणवः चतुष्कलः

पूर्वो यस्य तेन। व्याख्यातभिन्नतद्याख्यतद्याख्यानुसन्धानपूर्वं[1] तदुच्चारोद्घटितमध्यमार्गाश्रयत्वात्तल्लीनेन बहुरूपेण यो जपस्ततः सिद्धिमाप्नोतीति सम्बन्धः । ओंकाराद्ययुतेनेत्यादिनेदमाह—यद्यपि प्रणवसमनाव्याप्तिश्चतुष्कलनाथो बहुरूपस्याघोरशब्दादेः 'रूपेभ्यः' इत्यन्तस्यादौ प्रयुक्तस्तथापि सर्वमन्त्राणां पूजाजपविषये प्रणवनमस्काराभ्यामाद्यन्तसम्बन्धो दीपकः कार्य इति शास्त्रसमयः। तेन द्वात्रिंशदक्षरस्य पूर्वं यौ नमस्कारप्रणवौ उक्तौ, तावेव चतुष्कलपूर्वस्य देयौ। यतः

'तत्रस्थाः सर्वकर्माणि साधयन्ति' (६।४३)

इत्युक्तम् । अक्षरसंख्यया लक्षेणेति द्वात्रिंशता लक्षैरित्यर्थः ॥ ५१ ॥

एतदेवाधिकावापेन पूरयति

प्रणवाद्येन संयुक्तं
मन्त्रमेवं जपेत्सदा ।

प्रणव आद्यो यस्य चतुष्कलनाथस्य तेन सम्यग्युक्तं मन्त्रं जपेत्सदा इति यावत् । पूर्व-

---

१ ख० पु० तद्याख्येति पाठः ।

मेव तावदस्यैकाग्रताया अविच्छेदेन जपः कार्य इत्यर्थः । सदेति अत्राधिकावापः ॥

अथ

जपान्ते तु पुनर्होमं
दशमांशेन कारयेत् ॥ ५२ ॥

'जपित्वाक्षरलक्षं तु बहुरूपस्य ..... ।' (६।३)

इत्याद्युपक्रम्य पञ्चप्रणवस्वरूपं निर्णीय,

'प्रणवाद्येन संयुक्तं मन्त्रमेवं जपेत्सदा ।'

इत्युपसंहृत्य

'जपान्ते तु पुनर्होमं ।'

इत्युक्तम् । अतो जपोपक्रमेणाङ्गहोमस्तावत्कृतः। जपे तु मन्त्रदेवतासंमुखीकरणात्मनि निष्पन्ने, तत्तर्पणाय स्वाहान्तेन मन्त्रेण जपसंख्यातो दशांशेनेति लक्षत्रयेण सहस्रविंशत्या च होमः कार्य इति पुनःशब्दस्यार्थः ॥ ५२ ॥

अत्र होमे समुचितं द्रव्यमाह

नृमांसं पुरसंयुक्तं
घृतेन च परिप्लुतम् ।
ततः सिद्धिमवाप्नोति
अधमां मध्यमोत्तमाम् ॥५३॥

पुरं गुग्गुलुः। एतत्त्रयं युगपद्भुत्वा तत्त्वेश्वरत्वाकाशोत्पतनपातालसिद्धीरुत्तमादिरूपाः सर्वाः प्राप्नोति, नतु यथासंख्यमशब्दार्थत्वादागमान्तरविरोधाच्च ॥ ५३ ॥

यदा तु

त्रिगुणेन तु जप्येन
स्वच्छन्दसदृशो भवेत्।
ब्रह्मविष्ण्विन्द्रदेवानां
सिद्धदैत्योरगेशिनाम् ॥ ५४ ॥
भयदाता च हर्ता च
शापानुग्रहकृद्भवेत्।
दर्पं हरति कालस्य
पातयेद्भूधरानपि ॥ ५५ ॥
स्फोटयेद्विल्वयन्त्राणि
दिग्गजानपि चालयेत्।
ब्रह्मराक्षसवेतालान्
क्रूरग्रहविनायकान् ॥ ५६ ॥

---

१ ख० घ० पु० आगमेति पाठः।

स्मरणान्नाशयेद्देवि
अवध्यस्त्रिदशैरपि ।

शापानुग्रहकृत्त्वाद्भयस्य दाता हर्ता च, स्मरणादिति स्मृतमात्रः सन्नाशयत्येवेत्यर्थः ५६

अस्य च मन्त्रस्य
प्राकृतान्यपि कर्माणि
सिद्ध्यन्ति जपलक्षतः ॥ ५७ ॥

प्रकृतिसंभूतद्रव्ययोगसंपाद्यानि वश्यादीनि प्राकृतानि । जपलक्षत इति पूर्वसेवार्थं दशांशहोमसहितान्निर्वर्तितात् । प्रयोगकाले कर्मोचितोहजात्यन्तमन्त्राभिमन्त्रणं वक्ष्यमाणप्रयोगनिर्दिष्टानां द्रव्याणां तत्तदन्यकल्पप्रयोगविषयाणां च स्थितमेव । यदुपसंहरिष्यति

'एवं शतसहस्राणि अन्यकल्पोत्थितानि च ।
प्रयोगानां करोत्येष मन्त्रराजेश्वरेश्वरः ॥' (६।५४)

इति ॥ ५७ ॥

एवं पूर्वाराधितमन्त्रस्य यानि मुख्यसिद्ध्यङ्गभावेन कदाचिदवसरे प्रयोज्यानि
तानि सम्यक्प्रवक्ष्यामि
यथावदनुपूर्वशः ।

सम्यगिति यथा विसंवादीनि न भविष्यन्ति। यथावदिति ययेतिकर्तव्यतया युक्तानि। अत्रामुको मे वशो भवत्वित्यूहान्तो मन्त्रस्य लक्षजपः कार्य इति व्याख्यानमसत्

'.....ओंकाराद्ययुतेन तु।
नमस्कारावसानेन.....॥' (६।५१)

इति पूर्वमेवासाधारण्येन मन्त्रस्वरूपस्य प्रतिपादितत्वात्। एतावता यथाप्रतिपादनमस्य सामान्येन क्षुद्रसिद्ध्यभिसन्धिमता पूर्वसेवार्थं जपहोमौ कृत्वा विनियोगकाले कर्मोचितोहजात्यन्तस्य प्रयोगः कार्यः॥

तत्र वश्यप्रयोगांस्तावदाह

मोहना सहदेवा च
भूधात्री चक्रलाञ्छना॥ ५८॥
रामवल्लया सहैकत्र
आत्मबीजेन पेषयेत्।
भक्ष्ये पाने च दातव्यं
वशीकरणमुत्तमम्॥ ५९॥

---

१ ख. घ. पु. भवन्तीति पाठः।

मोहना बलामोटा । भूधात्री भूम्यामलकी । चक्रलाञ्छना चक्राङ्का । रामवल्ली रामतरणि-रिति प्रसिद्धौषधिः । आत्मबीजं स्वशुक्रम् । प्रदातव्यमिति मन्त्राभिमन्त्रितम् । एवं ह्यवि-संवादि भवति ॥ ५९ ॥

उत्तवारणिमूलं तु
पुष्यर्क्षेण तु ग्राहयेत् ।
आत्मेन्द्रियेण संयुक्तं
वशीकरणमुत्तमम् ॥ ६० ॥

उत्तवारणी विशाला । पुष्यर्क्षेण त्विति पुष्यनक्षत्रेण सौम्यग्रहयुक्तेन । शुक्लपक्षे रात्रौ ओषधिग्रहणं कार्यमित्योषधिकल्पेष्वस्ति । आत्मेन्द्रियं स्वशुक्रम् । यथोक्तं

'नृबीजमिन्द्रदैवत्यं तस्मादिन्द्रियमुच्यते'

इति । उत्तमत्वमस्यैकौषधियोगात् । भक्ष्ये पाने चेति स्थितमेव ॥ ६० ॥

श्रवणाक्षिमलं लाला
रुधिरेन्द्रियसंयुतम् ।
भूकदम्बसमोपेतं
दातव्यं पयसा निशि ॥ ६१ ॥

श्रवणाभ्यामक्षिभ्यां मले लाला चेति पञ्च, रुधिरं वामानामिकासंबन्धि, इन्द्रियं शुक्रमित्यात्मीयं सप्तकं, भूकदम्बं भूतीकमष्टमम्। एतदेकीकृत्य रात्रौ मन्त्राभिमन्त्रितजलपानमध्ये देयं वशीकाराय ॥ ६१ ॥

एतच्च

अप्रवासे प्रदातव्यं
दत्त्वा न प्रोषितव्यम् ॥

अन्यथा

म्रियते विरहेण सा।

इयानस्य प्रयोगस्य महिमेत्यर्थः ॥

षष्टिं कनकबीजानि
षोडश मणिचन्द्रिकाः ॥ ६२ ॥
नरगोदन्तसंयुक्ताः
प्रदद्याद्यस्य भामिनी।
एष कापालिको योगो
गच्छन्तमनुगच्छति ॥ ६३ ॥

सा तमिति शेषः। कनकं धत्तूरकम्। मणि-

चन्द्रिका रक्तिका। नरगोदन्तयोर्नात्र संख्या-नियमः। एतच्चूर्णं भक्ष्ये पाने वा देयमिति प्राग्वत्। कपालैरस्थिभिर्निर्वृत्तः कापालिकः ६३

श्वेतार्कमूलं मञ्जिष्ठा
चटकस्य शिरस्तथा।
गृहोद्भवस्य कुष्ठं च
स्वरक्तेन्द्रियसंयुतम् ॥ ६४ ॥
भक्ष्ये पाने प्रदातव्यं
वशीकरणमुत्तमम्।

अर्कतरोः श्वेतत्वं श्वेतपुष्पत्वात्। गृहोद्भवश्चटको मूषकः। स्वरक्तेन्द्रियं प्राग्वत् ६४

मोहना चैव कान्तारी
मयूरशिखया युता ॥ ६५ ॥
आत्मलालेन्द्रियैर्युक्तं
वशीकरणमुत्तमम्।

कान्तारी प्रियङ्गुः। मयूरशिखा तदाकारैवौषधिः। आत्मलालेन्द्रियैरिति बहुवचनादिन्द्रियद्रव्ये उभयोद्भूते। उत्तममविसंवादि ६५

लज्जालुका च गोरम्भा
चण्डालीकर्मकं तथा ॥ ६६ ॥
नागेन्द्रपदमिश्रं त-
दात्मबीजसमन्वितम्।
एष योगवरो दिव्यो
दीयते यस्य सुव्रते ॥ ६७ ॥
मधुरेण समायुक्तो
यावदायुर्वशी स तु।

लज्जालुका लङ्कुडा। गोरम्भा छत्रा। चण्डाल्याख्याया ओषधेः कर्मकं प्रधानमूलम्। मधुरेण विषेण, तस्य च द्रव्यान्तरसंयोगान्मारणशक्तिनिरोधः ॥ ६७ ॥

चणका माषमुद्गाश्च
अपानेन विनिर्गताः ॥ ६८ ॥
वान्तं घृतं तथा रेतः
स्त्रीरजो ह्यन्मलं तथा।
मूत्रं रक्तं तथा केशो
लाला चैव वरानने ॥ ६९ ॥

पुत्रजानिः[1] कृताह्वा च
नागेन्द्रपदसंयुता ।
मोहना विष्णुक्रान्ता च
धात्री चैवैकतः स्थिता ॥ ७० ॥

पुष्यर्क्षेण नियुञ्जीत
गर्वितानां वरानने ।
भक्ष्ये पाने प्रदातव्यो
योगस्त्रिदशपूजितः ॥ ७१ ॥

अपानेन निर्गताः शकृद्भावमागताः । वान्तं घृतादि । आत्मीयं हृन्मलं नाभिमलम् । पुत्रजानिरोषधिविशेषः । कृताह्वा कृताञ्जलिः । विष्णुक्रान्ता प्रसिद्धा । धात्री आमलकम् । त्रिदशपूजित इत्यविसंवादी । एवमष्टौ वशीकारे प्रयोगा उक्ताः ॥ ७१ ॥

अथ

उच्चाटनं प्रवक्ष्यामि
शत्रूणां गर्वितात्मनाम् ।

---

१ पुत्रंदरिरिति पाठः ।

तत्र

काकोलूकस्य पक्षांश्च
खरोष्ट्रमूत्रमृत्तिका ॥ ७२ ॥

एभिर्द्रव्यैः

कृत्वा प्रतिकृतिं प्राज्ञः
काकरक्तेन लेपयेत् ।

अथान्यत्[1]

काकोलूकस्य पक्षांश्च
गुदे तस्या विनिक्षिपेत् ॥ ७३ ॥

अथ

तां चतुष्पथे निखनेत्

तत्र खनित्वा स्थगितस्थापितायास्तस्याः

श्मशानाग्निमथोपरि ।
प्रज्वाल्य होमयेत्तत्र
काकपक्षांश्च सुव्रते ॥ ७४ ॥
उद्भ्रान्तपत्रसहितान्
खरमूत्रेण भावितान् ।

---

१ ख. घ. पु. अथान्यानिति पाठः ।

यस्य नाम समुद्दिश्य
यकाराद्यन्तरोधितम् ॥ ७५ ॥
मन्त्रावसाने विन्यस्तं
विसर्गान्तं प्रचाटयेत् ।

तमिति शेषः । उद्भ्रान्तपत्राणि अर्जुनवात-धूलिदण्डमध्यगतानि पत्राणि । मन्त्रावसान इति आराधितबहुरूपान्ते । विसर्गान्तं यकारेणाद्यन्तप्रयुक्तेन रोधितं सम्पुटितं यस्य शत्रोर्नामेति यः देवदत्तो य उच्चाटितो भवत्विति सक्रोधमुच्चार्य[1] यः क्रोधसमाविष्ट एव वक्ष्यमाणनीत्या शतमष्टोत्तरं काकपक्षाञ्जुहुयात्साधकः स तमुच्चाटयेदिति संबन्धः ॥७५॥

स इत्थमुच्चाटितः
भ्रमते[2] काकवत्पृथ्वीं
शत्रुर्व्याधिनिपीडितः ॥ ७६ ॥

विद्वेषे प्रयोगमाह

पिण्याकं निम्बपत्राणि
मृत्किण्वं तु तुषाणि च ।

---

१ ख. घ. पु. क्रोधमत्यन्तमित्यधिकः पाठः । २ ख.घ.पु. क्रमत इति पाठः ।

शत्रोः प्रतिकृतिं कृत्वा
अक्षपुष्पैस्तु वेष्टिताम् ॥७७॥
श्मशाने निखनेत्तां तु
वह्निं प्रज्वाल्य चोपरि।
पुष्पैर्विभीततरुजै-
र्यस्य नाम्ना तु होमयेत्॥ ७८॥
विद्विष्टो वै भवेच्छत्रुः
कामदेवसमोऽपि यः।

पिण्याको गुग्गुलुबीजकल्कः। किण्वं सुरासंधानद्रव्यम्। अक्षपुष्पैर्विभीतपुष्पैः। वेष्टितामिति तन्मालावलिताम्। नाम्नेति विद्विष्टो भवतु इत्यन्तेन विद्वेषणजातियुक्तेन बहुरूपेणेत्यर्थात्। होमोऽष्टोत्तरशतसङ्ख्यः॥ ७८॥

अथास्य विद्विष्टस्यान्यस्य वा सुभगीकरणमाह

प्रियङ्गुलतिकामिश्रं
गुग्गुलुं घृतवेधितम्॥ ७९॥
हुत्वा त्वष्टशतं देवि
सुभगः संप्रजायते।

प्रियङ्गुलतिका गन्धप्रियङ्गुः । अत्राप्याराधितं बहुरूपमेवोच्चार्यामुकः सुभगो भवत्वित्यन्ते सौम्यजातिः प्रयोज्येति ॥ ७९ ॥

जातिकुट्मलकैर्मिश्रै-
स्त्रिमध्वक्तैस्तिलैर्हुतैः ॥ ८० ॥
सुभगत्वमवाप्नोति
रूपहीनोऽपि यो नरः ।

त्रिमधु क्षीरशर्कराघृतम् । अत्रापि पूर्ववन्मन्त्रोऽष्टोत्तरशतसङ्ख्यश्च होमः । एवमुत्तरत्रापि कर्मोचितोहजात्यन्तो होमोऽष्टोत्तरशतसङ्ख्य एव ॥ ८० ॥

तिलैर्लवणसंमिश्रै-
स्त्रिमध्वक्तैर्हुतैः प्रियैः ॥ ८१ ॥
सप्ताहाद्वशमायाति
या स्त्री रूपेण गर्विता ।

आकर्षणमाह

राजिका लवणं चैव
मधुक्षीरघृतप्लुतम् ॥ ८२ ॥

होमयेन्नामसंमिश्रं
यस्याकर्षेत्तु तं द्रुतम्।
राजिका आसुरिका ॥ ८२ ॥

पूर्वं भक्ष्यपानक्रमेणाष्टौ वशीकारा उक्ताः, होमेन त्वेकः, अधुना स्नानादिप्रयोज्यद्रव्यक्रमेणाप्याह[1]

नरस्य रोचनां गृह्य
द्विरदस्य मदेन तु ॥ ८३ ॥
भावयित्वाभिमन्त्र्यैत-
न्मन्त्रेणाष्टशतं जपेत्।
स्नाने विलेपने मद्ये
गन्धे वा यस्य दीयते ॥ ८४ ॥
स वश्यो भवति क्षिप्रं
धनदः प्राणदस्तथा।

नररोचनां गोरोचनावद्गृहीत्वा, हस्तिमदेन लिप्त्वा, मन्त्रेणेति बहुरूपेण प्राग्वदूहप्रयोगजात्यन्तेनैतद्द्रव्यमष्टोत्तरशतजपादभिमन्त्र्य यस्य स्नानादौ दीयते स वश्यो भवतीति संबन्धः ॥ ८४ ॥

---

१ ख. घ. पु. णाहेति पाठः।

मारणमाह

अथवा मारयेत्क्षिप्रं
शत्रुं निश्चितमात्मनः ॥ ८५ ॥
अपकारशतैर्युक्तं
कृतघ्नं दुष्टचेतसम् ।

नतु स्वल्पापराधम् ॥ ८५ ॥

तत्र

कपालद्वयमादाय
नाम शत्रोः समालिखेत् ॥ ८६
कपालसंपुटस्थं त-
द्विषाङ्गारेण भावितम् ।
रुधिरेण समायुक्तं
हुंफट्कारविदर्भितम् ॥ ८७ ॥
महाप्रेतवनं गत्वा

विषाङ्गारेण [1]श्मशानाङ्गारेण रुधिरविमिश्रेण मषीं कृत्वा श्मशान एव कपालयोः शत्रोर्नाम द्वितीयान्तं, विदर्भितमिति

---

१ ख. घ पु. श्मशानिकाङ्गारेति पाठः ।

'अभिधेयं भवेत्पूर्वं ततो मन्त्रः सकृद्भवेत् ।
विदर्भितो भवत्येष.....॥'

इत्यान्नातत्वादन्तन्यस्तहुंफट्कारं मारयामि हुंफडित्यन्तं सम्यक्संरुद्धभैरवरूपस्वात्माभिमानानुसन्धानेन लिखेत् ॥ ८७ ॥

अथ

स्वच्छन्दं पूजयेत्ततः ।
कृष्णमाल्योपहारैश्च

श्मशान एव, कृष्णरात्रौ, श्मशानावरणयुक्तमित्यर्थात् ॥

ततः कर्म समारभेत् ॥ ८८ ॥

विज्ञाप्य भैरवं देवं
शत्रुं मे विनिपातय ।

अथ

अनुज्ञातस्तु देवेन
गृहीत्वा तच्छिरोद्वयम् ॥ ८९ ॥
तत्र गत्वा महादेवि
कपालासनसंस्थितः ।

तत्रस्थो रोषसंपूर्णो
दक्षिणाभिमुखः स्थितः ॥९०॥
आत्मनो भैरवं रूपं
ज्ञात्वा घोरं सुभीषणम् ।
क्रुद्धः समुच्चरेन्मन्त्री
द्वात्रिंशाक्षरसंमितम् ॥ ९१ ॥
विलोमेन महाभागे
शत्रुनाम ततोऽन्तगम् ।
हुंफट्द्वयं समुच्चार्य
काद्ये चास्फालयेद्भृशम् ॥९२॥
खण्डशश्चूर्णिते याव-
त्तावच्छत्रुर्विनश्यति ।
सप्तरात्रेण देवेशि
प्रयोगस्त्वनिवर्तकः ॥ ९३ ॥

अनुज्ञात इति भावनया । शिरोद्वयं कपालयुग्मम् । कपालासनं मुण्डासनम् । रोषस्तीव्रापकारस्मरणात् । तत इति विलोममन्त्रोच्चारानन्तरम् । अनिवर्तको न निवर्तते, नान्यथा भवतीत्यर्थः ॥ ९३ ॥

उपसंहरति

एवं शतसहस्राणि
अन्यकल्पोत्थितानि च ।
प्रयोगानां करोत्येष
मन्त्रराजेश्वरेश्वरः ॥ ९४ ॥

एवं करोत्यविसंवादीनि सम्पादयति ॥९४॥

एवमीदृक्प्रयोगक्रममुद्रितस्य यद्यस्यानुकम्पया स एवान्योऽपि वान्यस्य वा शान्तिमिच्छेत्, तदा

अनुलोमगतं देवं
वौषट्कारान्तसंस्थितम् ।

अमुकस्येति ऊह्युक्तमुच्चार्य ॥

क्षीरं तु होमयेद्देवि
शान्त्यर्थं हितकारकम् ॥ ९५ ॥

अथोक्तानुक्तकर्मसु उचितजातिप्रयोगानाह

वषडाप्यायने शस्तं
स्वाहान्तं वशकर्मणि ।
मन्त्राणां तर्पणार्थं च

अन्त इत्युभयत्र सम्बध्यते ॥
किं च मात्रं स्वरूपं
नत्यन्तं चार्चने स्मृतम् ॥९६॥
नतिर्नमःशब्दः । चकाराज्जपेऽपि ॥९६॥
एतदुपसंहरन्भाविपटलस्य सङ्गतिं करोति
एतद्धि कथितं देवि
साधकस्य सुमेधसः ।
क्रियाकालांशयुक्तस्य
अक्लेशात्तु सुखावहम् ॥९७॥

सुमेधसो यमनियमादिवशीकृतधिषणस्य, अत एव यथाकथञ्चित्क्षुद्रकर्माण्यनारभमाणस्य अपितु मुख्यसिद्ध्यङ्गतया स्वीकारयोग्यस्य वशीकरणादिसिद्धिसाधनपरिपन्थिनश्चोच्चाटनादि अवसरे कुर्वतः, क्रियया स्नानार्चनसमयपालनात्मतया, भाविपटलनिर्णेष्यमाणकालेन, अंशकेन चाष्टमपटलनिर्णेष्यमाणेन युक्तस्य, तज्ज्ञात्वा प्रयोगमनुरुन्धानस्याक्लेशादित्याराधितैतन्मन्त्राभिमन्त्रणपूर्वकमनुष्ठीयमानं, सुखावहमिति अभीष्टफलप्रदं भवत्येवेति शिवम् ॥


सारं सारं गुरुवरपदद्वन्द्वविस्फूर्जितानां
मात्रं वीर्यं किमपि परमं दर्शितं यन्मयात्र ।
तस्मिन्नन्तर्नमत गुरवो मन्त्रचक्रैकसारे
संसाराब्धिं तरत तरसा भैरवीभावमेत ॥



इति श्रीस्वच्छन्दोद्द्योते

पञ्चप्रणवाधिकारः षष्ठः

पटलः ॥ ६ ॥



श्रीमत्प्रतापभूभर्तुराज्ञया प्रीतये सताम् ।
मधुसूदनकौलेन सम्पाद्यायं प्रकाशितः ॥



अथ

श्रीस्वच्छन्दतन्त्रम् ।

श्रीमन्महामाहेश्वराचार्यश्रीक्षेमराजकृतोद्द्योताख्य-
विवरणोपेतम् ।

(सप्तमः पटलः)

संकुचच्चित्स्फुरत्तात्मप्राणान्तर्येन भास्यते ।
कालाध्वा विश्वभृद्भुक्तिमुक्त्यर्थं स जयत्यजः ॥

'क्रियाकालांशयुक्तस्य' इति यदुपसंहृतं ततो विदितं क्रियास्वरूपमनूद्य, कालांशकं ज्ञातुं श्रीदेव्युवाच

क्रिया ज्ञाता मया देव
त्वत्प्रसादान्महेश्वर ।
कालांशकं च देवेश
कथयस्व प्रसारतः ॥ १ ॥

'क्रिया' पूजनादिसाधनान्ता । 'कालं' च तत्तत्सिद्धिसाधनोचितमवसरम्, 'अंशकं' च

ब्रह्मांशकविष्ण्वंशकादिरूपं 'प्रसारतः' इति सबाह्याभ्यन्तरव्याप्त्या अभिधत्स्व । अत एव पूर्वं

'.....कालं चैव समासतः' । (१।९)

इत्युक्त्योद्दिष्टमपि कालस्वरूपं तत्त्वतोऽज्ञात्वा पुनः प्रश्नितम् ॥ १ ॥

श्रीभैरव उवाच

कालो द्विधाऽत्र विज्ञेयः
सौरश्चाध्यात्मिकः प्रिये ।

कलयति जन्मस्थित्यादिविकारषड्भेन परिच्छिनत्ति जगद्यः पारमेशक्रियाशक्तिस्पन्दात्मा 'कालो' 'द्विधा' इत्येकरूपोऽपि बाह्याभ्यन्तरतया संस्थितः, 'अत्र' इति नित्यनैमित्तिककाम्येषु सर्वेषु कर्मसु अङ्गतयाराधकैर्ज्ञातव्यः । सूरे भवः 'सौरः' स्थूलोऽहोरात्राद्यात्मा, स एव त्वात्मनीति तदधिष्ठिते प्राणे, अध्यात्मे भव आध्यात्मिकः सूक्ष्मरूपः । तत्र शुभं कर्म सुवारसुदिनादौ कर्तव्यम् । तत्र चैहिकामुत्रिकफलसिद्ध्यर्थं दक्षिणायनोत्तरायणादिस्वरूपमवश्यं ज्ञातव्यम् ॥

तदेतत्सर्वं बाह्यकालत एव ज्ञायत इत्याह

सुवारकरणे लग्ने
सुयोगे सुदिने प्रिये ॥ २ ॥
तेजोऽपचयराशौ तु

शोभनो वारश्चन्द्रतिथ्यादिग्रहनक्षत्रयोगः, 'करणं' च वव-वालव-कौलव-तैतिलादिकं विष्टिवर्जितं यत्र, 'सुदिने' अरिक्ततिथौ, 'सुयोगे' इत्यानन्दादियोगवति यो 'लग्नः' स्वर्क्षादेरनुकूलः सूर्यसंचारापेक्षः प्रतिदिनं घटिकानियमेन मीनादिराश्युदयस्तत्र, तेजसोऽपचयराशौ मकरसंक्रान्तौ तदुपलक्षिते च तदुपचयराशौ कर्कटे आमुत्रिकैहिककर्मारम्भविषयेऽवश्यज्ञातव्यो यः कालः स एष सौर इति दूरेण संबन्धः । सुवारकरणमित्यादिप्रथमापाठस्तु स्पष्टः ॥ २ ॥

किंच

दक्षिणायनमुत्तरम् ।
ग्रहणं चन्द्रसूर्याभ्यां
कालश्च ऋतवस्तथा ॥ ३ ॥

पक्षो मासश्च वेला वि-
षुवद्राश्यन्तरं तथा ।
पुण्यापुण्योदयो देवि

चन्द्रसूर्याभ्यामुपलक्षितं 'ग्रहणम्' दक्षिणायनोत्तरायणवदैहिकपारलौकिकफलकर्मविषयम्। 'कालः' चातुर्मास्यसंज्ञः । 'ऋतवो' वसन्ताद्याः । 'पक्षः' शुक्लः कृष्णश्च । 'मासः' चैत्रादिः । 'वेला' तत्तद्ग्रहादिसंचाराश्रयः प्रविभक्तोऽहोरात्रविभागः । 'विषुवत्' दिनमहर्निशासाम्यात्म मेषतुलयोः सूर्यसंक्रान्तिकालः । 'राश्यन्तरम्' इतराः संक्रान्तयः । 'पुण्यकालो' वैशाखशुक्लतृतीयादिः । 'अपुण्यकालो' मलमासादिः ॥ ३ ॥

तदेवमादिकं सर्वं तत्तत्कर्माङ्गतया उपयुज्यमानं यत्, स कालः

सौर एष प्रकीर्तितः ॥ ४ ॥

बाह्य इति शेषः ॥ ४ ॥

आध्यात्मिकं पुनर्देवि
कथयामि निबोध मे ।

'पुनः' इति विशेषेण । 'निबोध मे' इत्युक्त्या परमोपादेयत्वं ध्वनति ॥

तत्र

षाट्कौशिकस्तु यो देहो
भूततन्मात्रसंयुतः ॥ ५ ॥
स मनोबुद्ध्यहङ्कार-
बुद्धिकर्मेन्द्रियैर्गुणैः ।
सर्वतत्त्वैस्तथा देवैः
समधिष्ठितविग्रहः ॥ ६ ॥
तत्रात्मा प्रभुशक्तिश्च
वायुर्वै नाडिभिश्चरन् ।

स्थित इति शेषः । षट्कौशानि त्वङ्मांसरक्त-मज्जास्थिशुक्राणि यो देहः, स कार्यकरण-त्रयोविंशत्या सत्त्वादिभिः 'गुणैः' 'सर्वतत्त्वैः' च तदुपरिस्थितैर्नियत्यादिभिः शिवतत्त्वान्तैः, तथा 'देवैः' ब्रह्मादिभिः कारणैः सम्यक्

व्याप्यव्यापकभावेन 'अधिष्ठितः' कृतावस्थितिः 'विग्रहः' स्वरूपं यस्य। 'आत्मा' संकुचितसंविद्रूपस्तत्तत्कर्मानुष्ठाता तत्फलभोक्ता च, 'प्रभोः' स्वच्छन्दभैरवस्य 'शक्तिः' स्वातन्त्र्यात्मा मनःप्रसादाद्यवसरेषु भान्ती, 'वायुः' च नासिकापथवाही प्राणो 'नाडिभिः' वक्ष्यमाणाभिः 'चरन्' स्थितः । अयमत्राशयः—इह विश्वोत्तीर्णविश्वमयचिदानन्दसुन्दरः स्वतन्त्रभट्टारकः स्वस्वातन्त्र्यशक्त्या

'स्थूलसूक्ष्मस्वरूपेण स एकः संव्यवस्थितः'।
(स्व० ४।२९५)

इत्युक्तन्यायेन सदाशिवादिक्षित्यन्तं विश्वमुन्मीलयेत्प्रथमं तदुल्लासनभित्तिं शून्यातिशून्यभूमिं स्वात्मदर्पणे । तत्र च चित्प्रकाशप्राधान्येन शून्यस्य गुणीभावात् शून्यातिशून्यभूः सदाशिवादिमन्त्रान्तशुद्धप्रमातृसंकोचप्रपञ्चोत्थापिका महामायाशब्दवाच्या उच्यते । यदा तु चित्प्रकाशगुणीभावात् शून्यमेव प्राधान्येन दर्शयति, तदैषा मायाशक्तिरशेषविज्ञानाकलप्रलयाकलसकलतत्प्रमे-

यसंकोचप्रपञ्चप्रदर्शिका अभिधीयते । यश्च संकोचस्तया प्रदर्श्यते, स एव शून्यप्रमाता निमग्नविमर्शशक्तिः । यदा चासौ व्यतिरिक्तमेयग्रहणायोन्मुखीभवति, तदा प्राणरूपतया स्फुरति; तथा स्फुरन्नपि कस्तूरिकाकणवत् तत्रापि तावत्यंशे संकुचिताशेषविश्वात्मतया भाति । तदभिप्रायेणैव च विततविततमूर्तिवैचित्र्यात्मा पूर्वं षड्विधाध्वविभागः प्राणस्थित इत्युक्तम् । इह चैकत्रैव प्राणोच्चारे नालिकातः प्रभृति षष्ट्यब्दोदयान्तम्, एकादशपटले च मानुषायुष्कालात्प्रभृति अनाश्रितान्तस्य विश्वस्य च आयुष्परिमाणमतिविततविततक्रियाशक्तिवैचित्र्यात्मकमस्ति,—इति प्रतिपादयिष्यते । यद्यपि च प्राणभूमिकायामिवात्यन्तसंकुचितशरीराद्यात्मतायामपि परमेश्वरः पूर्णषट्त्रिंशत्तत्त्वस्फाररूप एव यथाप्रतिपादितं, तथापि 'प्राक् संवित्प्राणे परिणता' इति नीत्या प्राणरूपः परस्याः शक्तेरन्तरङ्गमधिष्ठानं, तदवरोहक्रमेण भूतभावशरीरावतरणादिति समग्रप्राणप्रसरभित्तिभूतमध्यम-

प्राणभूमिकाध्यारोहक्रमेणैव परशक्तिपदानुप्रवेशावष्टम्भपूर्वमेव स्वच्छन्दभैरवता अवाप्यते महायोगिभिः । मितयोगिभिश्च तत्तदान्तरकालांशविश्रान्तिपूर्वं विधिमनुतिष्ठद्भिः सा सिद्धिरविघ्नेनासाद्यते । अत एव प्रतिपादितप्रतिपादयिष्यमाणैतच्छास्त्रनिर्दिष्टः संहितान्तरनिर्दिष्टोऽपि वा सर्व एवोपासादिक्रमो मध्यप्राणपथोच्चरत्मन्त्रप्रमुखमेव फलदो भवति,—इत्याशयेनात्र पटले परमेश्वरस्याध्यात्मिककालस्वरूपप्रतिपादने महान् संरम्भः,—इत्यलं तावदिहैवाधिकेन ॥ ६ ॥

यद्यप्यात्मप्रभुशक्तिवायवः सर्वत्र देहस्थिताः, तथापि प्राधान्याभिप्रायेण यथाक्रमं

नाभ्यधोमेढ्रकन्दे च
स्थिता वै

नाभ्यन्तं प्रकृतितत्त्वस्य व्याप्तिरिति नाभावशेषनाडीचक्रभूतायां प्राधान्येनात्मा स्थितः, अधोमेढ्रे तु मध्यशक्तिः । एषां चात्र स्वरूपमवधानधनैरेव सम्यगुपलभ्यते नतु पशुभिः ॥

---

१ ख० पु० प्रथोच्चरन्निति पाठः ।

एवं स्थिते सति आत्मविश्रान्तिपदात्
नाभिमध्यतः ॥ ७ ॥

तस्माद्विनिर्गता नाड्य-
स्तिर्यगूर्ध्वमधः प्रिये ।

अत एवोक्तमन्यत्र

'नाभिचक्रे कायव्यूहज्ञानम् ।' (पा० यो० ३।२९)

इति । केचित्तु नाभिचक्रत इति पाठं पूर्वत्रैव योजयित्वा, तस्मादित्यनेन कन्दपदं प्रत्यवमृष्टवन्तः ॥ ७ ॥

तासां मध्यात्

चक्रवत्संस्थितास्तत्र
प्रधाना दश नाडयः ॥ ८ ॥

'तत्र' इति नाभौ पद्मे । दश नाडीर्नामतो वक्ष्यति ॥ ८ ॥

दशभ्यस्तु

द्वासप्ततिसहस्राणि
नाड्यस्ताभ्यो विनिर्गताः ।

पुनर्विनिर्गताश्चान्या
आभ्योऽप्यन्याः पुनः पुनः ॥९॥

'विनिर्गता' इत्यूर्ध्वमधस्तिर्यक् च प्रसृताः ॥ ९ ॥

किमवधि निर्याताः,—इत्याह

यावत्यो रोमकोट्यस्तु
तावत्यो नाडयः स्मृताः ।

अर्धचतस्रः कोटयः ॥

अतश्च

यथा पर्णं पलाशस्य
व्याप्तं सर्वत्र तन्तुभिः ॥१०॥
शरीरं सर्वजन्तूनां
तद्वद्व्याप्तं तु नाडिभिः ।

इह 'प्राक्संवित्प्राणे परिणता' इति स्थित्या निर्णीतनीत्या संवित्तिः शून्यभूमिकामाभास्य प्राणभूमिमाश्रितवती, तत्रापि पलाशपत्रमध्यशाखान्यायेन मध्यनाड्याश्रयमध्यमप्राणरूपतां श्रित्वादिक्रमावस्थिते, तत्रापि प्रधानना-

डीदशकाश्रयप्राणादिप्रधानवायुरूपतामासाद्य पुरुषायुषमध्यसंभव्यहःसंख्याकानि षट्त्रिंशत्सहस्राणि बहिर्वाहानां प्राणनाडीनां, तावन्त्येव चान्तर्वाहानामपाननाडीनाम्,--इत्युभयं द्वासप्ततिसहस्राणि प्रधानभूतानि भासितवती । तथा हि सति यावज्जीवं कर्तव्यत्वेन दीक्षितानां यन्नित्यकर्म भगवत्स्वरूपानुसंधानादि आम्नातं, तदुक्तव्याप्तितत्त्वविदा एकवारमनुष्ठीयमानमपि सर्वमेवानुष्ठितं भवति । यदुक्तं कक्ष्यास्तोत्रे

'या अग्निहोत्राहुतयः सहस्र-
द्वासप्ततिः स्युः पुरुषायुषेण ।
नाड्यंशयुक्त्या सकृदेव जुह्वत्
संपादयेत्तास्तव मार्गविद्यः ॥'

इति । किंच

'मध्यप्राणनिविष्टहंसविसृता[1] ये रोमकूपाश्रयाः
प्राणाः सूक्ष्मविमर्शशालिवपुषः सार्धत्रिकोट्यात्मकाः ।
तान्मन्त्रात्मतया विलोमयति यो निःशेषतत्त्वाश्रये
देहेऽसाविह नादभैरवतनुः स्वच्छन्दनाथः परः ॥'

इति ॥ १० ॥

---

१ क० पु० हंसपरमा इति पाठः ।

एताश्च नाडयः
मारुतापूरिताः सर्वा
आत्मशक्तिचराः सदा ॥ ११ ॥

'आत्मा' संकुचितसंविद्रूपो ग्राहकः 'शक्तिः' प्राभवी विश्वाशेषपरस्फुरत्तात्मा[1], ताभ्यां हेतुभ्यां चरन्ति वैचित्र्येण प्रसरन्ति ॥ ११ ॥

ताश्च
पृथग्वृत्तिप्रभेदेन
भिन्नाश्चारप्रभेदतः ।

वृत्तयो व्यापाराः सूक्ष्मप्राणवाहात्मकचारप्रभेदहेतुकाः ॥

अत एव
चारवृत्तिप्रभेदेन
संज्ञाभेदो वरानने ॥ १२ ॥

भवति ॥ १२ ॥

अतश्च संज्ञाभेदात्
नाडीनां चैव वायूनां
भेदो ज्ञेयः सहस्रशः ।

सार्धत्रिकोटिपर्यन्त इत्यर्थः ॥

---

१ क० पु० परिस्फुरत्तेति पाठः ।

तत्र

प्रधाना दश याः प्रोक्ता
नाडयश्च वरानने ॥ १३ ॥
तासां मध्ये तु देवेशि
वायवो ये व्यवस्थिताः ।

'मध्ये' इत्यन्तः ॥ १३ ॥

तेषां

नाडीनां चैव वायूनां
संज्ञावृत्तीर्निबोध मे ॥ १४ ॥

वृत्तीर्व्यापारान् ॥ १४ ॥

तत्र तावत्संज्ञा आह

इडा च पिङ्गला चैव
सुषुम्ना च तृतीयका ।
गान्धारी हस्तिजिह्वा च
पूषा चैव यशस्विनी[1] ॥१५॥
अलम्बुसा कुहूश्चैव
शंखिनी दशमी स्मृता ।

---

१ ख० पु० यशा तथेति पाठः ।

आसां व्यापारमाह

एताः प्राणवहाः प्रोक्ताः
प्रधाना दश नाडयः ॥१६॥

प्राणं प्राणनारूपं सामान्यं वक्ष्यमाण-प्राणापानादिसंज्ञाभेदाद्दशविधं यथाक्रमं वहन्ति ॥ १६ ॥

वायूनां संज्ञाभेदमाह

प्राणोऽपानः समानश्च
उदानो व्यान एव च ।
नागः कूर्मोऽथ कृकरो
देवदत्तो धनञ्जयः ॥ १७ ॥

एषां वृत्तिभेदं

'जल्पितं हसितं गीतं नृत्तं युद्धगतिः कला ।
शिल्पं च सर्वकर्माणि प्राणस्येदं विचेष्टितम् ॥'(७।१०४)

इत्यादिना पटलान्ते वितत्य वक्ष्यति ॥१७॥

एते च

वायवो नाडयश्चैव
चक्रवत्संस्थिताः प्रिये ।

नाभिमध्यं परिवृत्येत्यर्थः ॥

तासु संचरतः सिद्धिं
योगं चैव वरानने ॥ १८ ॥

संचरतीति संचरन् तं वायुमधिष्ठाय, तत्तदुचितां सिद्धिं चित्तैकाग्र्येण योगं च प्राप्नुयात् ॥

जपतश्च वरारोहे
जपसिद्धिमवाप्नुयात् ।

'तासु संचरतः' इत्यनुवर्तते । जपाज्जपतः ॥

आसामपि

दशानां तु परं देवि
नाडीत्रयमुदाहृतम् ॥ १९ ॥
बिन्दुनादात्मके द्वे वै
मध्ये शक्त्यात्मिका स्मृता ।

'बिन्दुः' ज्ञानशक्तिप्रधानः प्राणस्तदात्मिका पिङ्गला दक्षनाडी । 'नादः' क्रियाशक्तिप्रधानोऽपानस्तदात्मिका इडा वामनाडी । तयोर्मध्ये सुषुम्नाख्या परेच्छाशक्तिस्फुरत्तारूपा ॥१९॥

तिस्र एताः
हृच्चक्रे तु समाख्याताः
साधकानां हितावहाः ॥२०॥

हृत्पद्ममध्यकर्णिकायां सम्यगनुप्रवेशेन आ समन्तात् ख्याताः सत्यः साधकानां त्रिविध-सिद्धिप्रदाः ॥ २० ॥

एवं स्थिते

प्राणो वै चरते तासु
अहोरात्रविभागतः ।

'प्राणः' प्राणनात्मा सामान्यरूपः । अहो-रात्रशब्दः पक्षमासाब्दोपलक्षकः ॥

यथा

तथा ते कथयिष्यामि
प्रविभज्य यथास्फुटम् ॥२१॥

अत्र पीठिकाबन्धं तावत्करोति

प्रभुशक्तिसमाकृष्टा
मरुत्प्राणात्मसंस्थिताः ।
त्रय एतेऽविभागेन
संचरन्ते समन्ततः ॥ २२ ॥

'मरुत्' प्राणनात्मा सामान्यः, प्राणस्तु दक्षवाममध्यादिवाही प्राणापानोदानाद्याख्या-विशिष्टः, आत्मा संकुचितचिदात्मा । तद्रूपतया

संस्थितास्त्रय एते पदार्थाः 'प्रभोः' शिवस्य 'शक्त्या समाकृष्टाः' इति शून्यपदावभासपुरःसरं प्राणनाभूमिमुल्लास्य, प्राणापानादिविशेषपदवीमुट्टङ्क्य भोगसांमुख्येन प्रवर्तिताः 'अविभागेन संचरन्ते' नानादेहभूमीः श्रयन्ति ॥२२॥

त्रिष्वेषु मध्ये यो मरुदुक्तः, सः

अध ऊर्ध्वं वहेद्यस्मा-
त्सर्वनाडीः प्रवाहयन्।

ततोऽस्य

वृत्तिसंज्ञाप्रभेदेन
वर्णरूपाण्यनेकधा ॥ २३ ॥

'वृत्तिः' बहिर्वहनान्तर्वहनादिव्यापारस्ततो यः प्राणापानसमानादिसंज्ञाभेदस्तेन, द्वादशषोडशादिस्वरभेदभिन्नास्तद्गर्भीकृतव्यञ्जनात्मानश्च 'वर्णाः' तत्तदनुभवात्मकानि च 'रूपाणि अनेकधा' भवन्ति। अत्र चागमान्तरोक्त्या गर्भीकृतव्यञ्जनः स्वरोदयरूपः पञ्चाशद्वर्णोदयात्मा अष्टवर्गोदयस्वरूपो वा वर्णोदयोऽस्ति। स त्विह नोक्तः केवलं वर्णशब्देन सूचितः ॥२३॥

तदत्र

द्वासप्ततिसहस्रेभ्यो
जायन्ते दश वै प्रिये ।

ये 'दश' प्राणादयस्ते 'द्वासप्ततिसहस्रेभ्यो' द्वासप्ततिसहस्रनिमित्तं 'जायन्ते' तत्प्रपञ्च-व्याप्तिं श्रयन्तीत्यर्थः ॥

ततोऽपि प्रागुक्ताध्युष्टकोट्यात्मतां प्राणः श्रयतीत्याह

कोटिधातो वरारोहे
स एकः संव्यवस्थितः ॥२४॥

सच

प्राणापानमयः प्राणो
विसर्गापूरणं प्रति ।

'हकारस्तु स्मृतः प्राणः.....।' (स्व० ४।२५५)

इति यः पूर्वमेवाशेषवाच्यवाचकाविभाग-विमर्शमयो हलाकृतिः प्राण उक्तः, स एव स्वातन्त्र्यावभासितसंकोचावभासपुरःसरं नि-र्णीतावरोहक्रमेण प्रकृतं रूपं यस्य प्राणनरू-पस्य सामान्यप्राणस्य, स 'विसर्गापूरणं प्रति'

इति सर्वैरेव सुषिरमार्गाद्बहिस्तत्तद्भावावभास-सृष्टिरूपविसर्गार्थं तदवभासपुरःसरं प्रवेशयुक्त्या तदाहरणेनान्तरापूरणार्थं प्रकर्षेण अननाद्धननादर्थजिघृक्षाग्रहणविश्रान्तिदशोचितादिमर्शात् प्राण इत्यर्थः॥

एतदेव स्फुटयति

नित्यमापूरयन्नेव
प्राणिनामुरसि स्थितः ॥२५॥
प्राणनं कुरुते यस्मा-
त्तस्मात्प्राणः प्रकीर्तितः।

सर्वदेहगतोऽप्ययं प्राणिनामुरसि स्फुटमुपलभ्यमानत्वेन अवस्थितो 'नित्यमापूरयन्' अर्थात् प्राणिनोऽर्थांश्च प्रवेशनिर्गमाभ्यां 'प्राणनं' विमर्शमयं जीवनं कुरुते। तस्मादयं प्राण उक्तः॥ २५॥

यदर्थमियान् पीठिकाबन्धः कृतस्तदेवानुबध्नन्नाह

अहोरात्रगतिं प्राणे
अधुना कथयामि ते ॥२६॥

'गतिं' ज्ञप्तिं प्रसरणं च ॥

तत्र

तुटयः षोडश प्राणे
पूर्वं हि कथिता मया ।
बाह्येनैव तु कालेन
ते लवाः परिकीर्तिताः ॥२७॥

याः पूर्वं चतुर्थपटले सपादद्व्यङ्गुलोदयपरिमाणाः षोडश तुटय उक्ताः, ताः

'मानुषाक्षिनिमेषस्य अष्टमांशः क्षणः स्मृतः ।
क्षणद्वयं तुटिर्ज्ञेया तद्द्वयं तु लवः स्मृतः ॥'
(स्व० ११।१५

इत्येकादशपटलवक्ष्यमाणेन 'बाह्येन कालेन ते लवा' लवशब्दाख्याः कालाक्यवाः । एवं च प्राणीया तुटिर्बाह्यतुटिश्चान्यैव, नतु शब्दसाम्यादत्र भ्रमितव्यम् । प्राणीया तुटिर्बाह्यो लवः, बाह्या तुटिः प्राणीयं तुट्यर्धं पर्यवस्यति। इत्थं च बाह्यः क्षणः प्राणीयतुटेस्तुर्योऽशः,—इति मन्तव्यम् । अनेनैव च क्रमेण आन्तरप्राणापानोदयरूपो यः सन्ध्याकालं विना त्रिंशत्तुटिकोऽहोरात्रः, स एव

'लवद्वयं निमेषस्तु ज्ञातव्यो गणितक्रमात्।
दश पञ्च निमेषास्तु काष्ठा चैव प्रकीर्तिता॥' (स्व०११।२००)

इत्येकादशपटलव्यवस्थयैव काष्ठाभिधानः कालावयवः। यदिहैव अग्रे वक्ष्यति

'आध्यात्मिकाहोरात्रेण बाह्ये काष्ठा विधीयते।' (स्व०७।४९)

इति॥ २७॥

इह तु

ताभिश्चतसृभिर्देवि
प्राणे यामो विधीयते।

'ताभिः' इति तुटिभिः बहिर्वदन्तरपि दिनचतुर्भागो 'यामः' प्रहरः॥

तैरेव प्रहरैर्देवि
चतुर्भिस्तु दिनं भवेत्॥२८॥

एवं निर्गमक्रमवत् प्रवेशक्रमेणापि तथैव

रात्रिश्चतुर्भिर्विज्ञेया

तदित्थं संकलय्य

अहोरात्रस्त्वतोऽष्टभिः।

पारमेशशक्तिनियमितसूर्योदयादिस्थित्या यथा बहिर्दिननिशाविभागः, तथान्तरपि प्राण-

सूर्योदयादिस्थित्या योगिनः प्रतिदिनादिसाध्यकार्यविवक्षया,—इत्युक्तप्रायम् ॥

यथास्य प्राणस्य बहिरन्तर्वाहितानैयत्यं, तथोपपादयति

शिवो धर्मेण हंसस्तु
सूर्यो हंसः प्रभान्वितः ॥२९॥
आत्मा वै हंस इत्युक्तः
प्राणो हंससमन्वितः ।

यः पूर्वं चिदानन्दघनः 'शिवः' उक्तः, स 'धर्मेण' स्वातन्त्र्यात्मना स्वभावेन 'हंसः' इति हानसमादानधर्मा विश्वसर्गसंहारकारी, शिवत्वादेव पञ्चविधं कृत्यं हानसमादानसतत्त्वं करोति । यथा चासौ, तथा तदीयज्ञानशक्तिमयः 'सूर्यो'ऽपि 'प्रभया' प्रकाशेन 'अन्वितः' सन् रसविसर्गादानक्रमेण हानसमादानधर्मा 'हंसः' । यतश्च निर्णीतनीत्या शिव एव स्वातन्त्र्यावभासितसंकुचितचिद्रूप 'आत्मा' ततः सोऽपि करणोन्मीलननिमीलनादिक्रमेण हानसमादानधर्मा 'हंस इत्युक्तः' इति ।

'अनेनैव तु योगेन हंसः पुरुष.....।' (४।२६०)

इत्यत्र योजनिकाग्रन्थे इत्थं स एव प्राणः प्राणभूमिकामाश्रितोऽपि बहिरन्तश्च हानसमादाने कुर्वन् हंस एव । यतः स एवायं सूर्य आत्मा प्राणश्च हंसेन अनाहतात्मकनिष्कलभट्टारकेण शिवरूपेण सम्यगन्वितः । स एव ह्यवरोहक्रमेण प्राणान्तं पदमाश्रित्य बहिरन्तर्गमागमौ कुर्वन् सर्गसंहारकृत् । अत एवैतत्पदपरिशीलनाभ्यासेनैव झगिति परमशिवतामाविशन्ति महायोगिनः । प्रसङ्गादत्र रहस्यार्थः कटाक्षितः ॥ २९ ॥

प्रकृतं तु

तस्योदयात्कलेत्कालः

'तस्य' प्राणस्य 'उदयात्' प्रभृति जन्मादिविकारषड्क्रमेण 'कालो' भूतवर्तमानादिभेदेन वहन्विश्वं जगत्कलयति । 'कलेत्' इत्यैशः पाठः ॥

अत्र चोक्ताहोरात्ररूपे प्राणचारे

ग्रहाणामुदयो भवेत् ॥ ३० ॥

स चादूर एव व्यक्तीभविष्यति ॥

किंच

ऋक्षाणि राशयश्चैव
तारास्त्वंशास्तथैव च ।
प्राणे वै उदयन्त्येते
अहोरात्रेण सुव्रते ॥ ३१ ॥

बाह्यदिनगतनक्षत्रानुसारं प्राथम्यं परिकल्प्य, प्राणापानवाहे सप्तविंशतिधा विभक्ते प्रमाणे, अश्विन्यादिनक्षत्राणां तदधिष्ठातॄणां मेषादिराशीनामनुकूलाननुकूलजन्मादितारांणां त्रिभागनवभागादिकलनया च राश्यंशानां बाह्य इव प्राणीयेऽपि अहोरात्रोदयोऽस्ति ॥३१॥

अथ

अहोरात्रोदयस्यैव
विभागं कथयामि ते ।
हृदयोर्ध्वे तु कण्ठाधो
यावद्वै प्रवहेत्प्रिये ॥ ३२ ॥
अङ्गुलेन विहीने तु
प्रथमः प्रहरः स्मृतः ।

'तुटिभिश्चतसृभिर्यामः' इति यत् प्रागुक्तं, तत्तुटिचतुष्टयवाहिकालापेक्षम् । इदं तु देशापेक्षमिति न पौनरुक्त्यम् । हृदयात्कण्ठान्तं पूर्वं दशाङ्गुलमेकाङ्गुलहान्या नवाङ्गुलं भवति ॥ ३२ ॥

ततोऽपि

द्वितीय ऊर्ध्वे विज्ञेयो
मध्याह्नस्तालुमध्यतः ॥ ३३ ॥

अत्रापि नवाङ्गुलतैव यो द्वितीयः, स एव तालुमध्ये मध्याह्नः ॥ ३३ ॥

अत्र विश्रान्तस्यानुष्ठानफलमाह

अत्र होमो जपो ध्यानं
कृतं वै मोक्षदं भवेत् ।

अथ

नासाग्र्यत्र्यङ्गुलोर्ध्वे तु
यावत्प्राप्तस्तु सुव्रते ॥ ३४ ॥
प्रहरस्तु तृतीयोऽसौ
भवेद्वै वरवर्णिनि ।

'नासाग्र्यस्य' भ्रूमध्यस्य त्र्यङ्गुलमूर्ध्वं ल-

लाटम्, आकण्ठं चतुरङ्गुलात्तालुनो भ्रूमध्यं द्व्यङ्गुलमिति तदूर्ध्वं त्र्यङ्गुलमुक्तम् ॥ ३४ ॥

तदुपरि

शक्त्यन्ते च चतुर्थस्तु
प्रहरः

'शक्त्यन्ते' द्वादशान्ते ॥

एतावदन्तम्

अहः प्रकीर्तितम् ॥ ३५ ॥

आन्तरम् ॥ ३५ ॥

तत्र च

चतुर्थान्ते तु देवेशि
प्राणसूर्यः सदास्तगः ।

'सदा' इति यदा यदा चतुर्थप्रहरस्यान्तो भवति, तदा प्राण एव अहोरात्रविभागहेतुत्वात् सूर्योऽस्तमेति ॥

किंच

ततोऽस्तमयसन्ध्यात्र
तुर्यार्धं तु भवेत्प्रिये ॥ ३६ ॥

'ततः' इति तं चतुर्थान्तमवलम्ब्य, प्राण-

निविवृत्सापानोल्लिलसिषासामरस्यात्मतया गुणीभूतवाह्त्वेनोन्मज्जच्छक्तितद्वत्प्रकाशावेशविश्रान्तिरूपार्धतुटिकला अस्तमयसंध्या॥३६॥

अत्र च सन्ध्यायां प्राणसूर्यः

तत्कालं तु विलम्ब्यैवं
पुनश्चाधः प्रवर्तते।

'तत्कालं' तुल्यर्धं, संघट्टपदे विश्रम्य, 'एवम्' इत्यारोहक्रमेणैव 'पुनश्च' इति पुनः पुनः 'अधः प्रवर्तते' अपानचन्द्रीभूय हृदन्तमवरोहति॥

तदाह

स च चन्द्रोदयो देवि
रजनी च विधीयते॥ ३७॥

सूर्य एव प्रभासंक्रमणयुक्तया चन्द्रः,—इति कालज्ञाः॥ ३७॥

रात्रावपि प्रहरक्रमः प्राग्वन्नवाङ्गुलस्थित्या अपानचन्द्रसंचारक्रमेणेत्यतिदिशति

पूर्वोक्तक्रमयोगेन
यामेष्वेवं चरत्यसौ।

अत्र सन्ध्याविश्रान्त्यनन्तरं दिनचतुर्थ-प्रहरोदयस्थानान्तमाद्यः प्रहरः ॥

ततः

तालुके चार्धरात्रस्तु
पुनरेवं विधीयते ॥ ३८ ॥

'पुनरेवम्' इत्यवरोहक्रमेण नवाङ्गुलस्थित्यैवेत्यर्थः । अत्र होमादि सिद्धिदमित्यर्थलब्धमेतत् । किंच 'पुनरेवं विधीयते' इति पुनरपि नवाङ्गुलस्थित्या कण्ठाधोऽङ्गुलान्ते तृतीयो रात्रियाम इत्यर्थः ॥ ३८ ॥

ततोऽपि

हृत्पद्मं तु यदा प्राप्तः
प्रभातसमयस्तदा ।

तत्रापि

तुल्यर्धं तु वरारोहे
पूर्वसंध्या भवेत्ततः ॥ ३९ ॥

एतत्पूर्ववद्व्याख्येयम् । पूर्वत्वमत्र संध्यायास्तदनन्तरं प्राणसूर्योदयात्मकदिनप्रारम्भात् ॥

यदाह

तस्मात्समुदयश्चैव
सूर्यस्य स भवेत्पुनः ।

'सूर्यः' प्राणः ॥

उदेत्य च

पूर्ववत्क्रमयोगेन
स चरेद्धि सदा शुभे ॥ ४० ॥

'शुभे' इत्यामन्त्रणम् ॥ ४० ॥

अत्रैव

वासरे तु चरेत्सूर्यो
धारायां संचरेच्छशी ।

प्राण एव सूर्यः, अपानस्तु चन्द्रः । अथ च सूर्य इन्द्रियवर्गो 'वासरे' प्राणोदये 'चरति' समुल्लस्य बाह्यं प्रकाशयति । 'धारायां' निशायामपानोदये 'शशी' मेयग्रामरूपः 'चरेत्' प्रमाणप्रकाशमाविश्य प्रमात्रैकात्म्यमेति ॥

तदित्थमहोरात्रमध्ये

चन्द्रसूर्योदयो ह्येष
मया ते परिकीर्तितः ॥ ४१ ॥

साधकानां सौम्येतरसिद्ध्यर्थमत्रैव मध्ये सूरोदयोक्तवद्ग्रहपञ्चकोदयक्रमं दर्शयति

भौमाद्याश्च ग्रहा ह्येवं
चरन्ति प्रविभागशः ।

यथा सदा बहिरन्तश्च दिननिशयोः सूर्य-सोमौ चरतः, तथा सदैव पञ्चधा पञ्चधा विभक्तयोस्तयोः भौमाद्याः सौरान्ताः पञ्च विभागक्रमेण चरन्ति, तेन च क्रूरसौम्य-सिद्ध्यङ्गं भवन्ति ॥

अथ बाह्यवेलावारानुसारमहनि निशायां चान्तरपि ग्रहसप्तकोदयं गारुडादिशास्त्रदृष्ट-न्यायेन दर्शयति

प्राणे चाप्युदयन्त्येते
प्रहरे प्रहरे प्रिये ॥ ४२ ॥
वेला वारो भवेद्यस्य
स चरेत्प्रहरद्वयम् ।

यस्य ग्रहस्य बहिर्वारः, स प्रथमे प्रहरे बहिरिव अन्तरप्युदेति । ततो दिने षट्परि-वर्तनक्रमेण अर्धेऽर्धे प्रहरे तदन्ये, यावदन्त्ये

तद्दिनार्धप्रहरे स एव। तदुत्तरेष्ववसरेषु क्रमेण पञ्चपरिवृत्तिक्रमेणान्ये, यावदन्त्ये तन्निशार्धप्रहरे स एव। एवमेकैकस्य ग्रहस्य दिनेऽर्धप्रहरं रात्रावर्धप्रहरं चोदयः। वार-भागिनस्तु द्विगुणमिति स्थितेऽहोरात्रमेलनया वारभागिनः प्रहरद्वयं, तदन्येषां तु प्रहर-मुदयो भवति। तदुक्तं श्रीतोतुले

'प्रहरार्धभुजः सर्वेऽहोरात्रं च चरन्ति ते।'

इति। संहितासारेऽपि

'णिंसिवासर दुपहरेणा आभुञ्जन्ति गहपराहणा।
जस्स दिनं सेवारो विणिवत्तइ रअणिव अणा ते।
कमपरिवेत्तण दिणरत्तिं भुञ्जन्ति बाणपरिवत्ते'॥[1]

इति॥ ४२॥

अत्रैव मध्ये

राहुश्चरति सोमेन
केतुश्चरति भास्वता॥ ४३॥

सहेत्यर्थः। तेन तच्चार एव तयोश्चारो, नतु ग्रहान्तरवद्व्यतिरिक्तः॥ ४३॥

---

१ 'णिमावासरद्वयफरेण आ भुञ्जन्ति गहपराहणाजः स दिनं सेवारोविणि वत्तर हर अणिव अणाते कम्परि वेतुणदिनं रत्तिं भुञ्जन्ति बाणपरिवत्तते'।

किंच

ये ग्रहास्ते च वै नागा
लोकपालाष्टकं च ते ।
मूर्तयश्चैव ते चाष्टा-
वष्टौ ते च गणेश्वराः ॥ ४४ ॥
ते च पञ्चाष्टका रुद्रा-
स्तथा योगाष्टकाः परे ।
अनन्तादिशिखण्ड्यन्ता-
स्ते च विद्येश्वराष्टकाः ॥ ४५ ॥
सकलाद्यानि तत्त्वानि
स्थितानि परतस्त्विह ।
पूर्वोक्ता भैरवाश्चाष्टौ
सर्वे ते च व्यवस्थिताः ॥ ४६ ॥

'ग्रहाः' आदित्यादयः सौरान्ता यथाक्रम-मनन्तवासुकितक्षककार्कोटपद्ममहापद्मशंख-पालनागाः, राहुस्तु कुलिकः । तदुक्तम्

'इनस्त्वनन्त इत्युक्तः सोमो वासुकिरुच्यते ।
तक्षकः कुज इत्युक्तः कार्कोटः सोमजो भवेत् ॥

सरोजो गुरुराख्यातो महाब्जः शुक्र उच्यते ।
शंखो मन्दगतिर्ज्ञेयः सप्त नागा ग्रहाः क्रमात् ॥
अष्टमः कुलिको नाम राहुः क्रूरग्रहो भवेत् ।'

इति । यश्च श्रीतोतुले

'रवेः षोडश मध्यात्तु चतुरोऽन्ताच्च भार्गवात् ।
चषकौ द्वौ बुधस्यादौ सोमस्याष्टौ तु मध्यतः ॥
सौरस्यान्ताच्चतुःषष्टिं मध्यतश्चषकं गुरोः ।
द्वात्रिंशतं कुजस्यान्ताद्भुङ्क्ते षट्परिवर्ततः ॥'

इति चषकसंख्यया कुलिककाल उक्तः, सोऽत्रात्यन्तसूक्ष्मे प्राणचारे दुर्लक्ष्य एवेत्यविचार्य एव । एवं पुंभोगाय दिनार्धप्रहरानधितिष्ठतां ग्रहाणां नागैरधिष्ठितत्वं, नागानां तूक्तक्रमस्थितिभिर्लोकपालैरिन्द्रादिभिः । इन्द्राद्या मूर्तिभिरिति क्षित्यादिमूर्त्यधिष्ठातृशर्वरुद्रभवादिभिर्मूर्तीश्वरैः, ते च चण्डनन्द्यादिभिः प्रागुक्तैर्गणेशैः, तेऽपि गुह्यातिगुह्यपवित्रस्थाण्वाद्यैः पञ्चभिरष्टकैः, क्रमात्क्रममधिष्ठिताः। तेऽप्यकृतादिना योगाष्टकेन व्याप्ताः, योगाष्टकादपि परे ये प्रकृतिस्थाः क्रोधाद्याः, मायास्था मण्डलिप्रभृतयस्तैर्व्याप्ताः, तेऽपि विद्यातत्त्वगतैरन-

न्तादिभिः, विद्येश्वरा अपि सकलाद्यैरिति सदाशिवपरिवारभूतैः

'सकलो निष्कलः शून्यः कलाद्य.....।'(१०।११८९)

इति वक्ष्यमाणैरष्टभिः, यद्वा सकलः सदाशिव आद्यो येषामूर्द्ध्ववर्तिबिन्द्वीशब्रह्मव्यापिव्योमानन्तानाथानाश्रितानां तैस्तत्त्वैरिति अभेदभूमिस्पर्शात्पारमार्थिकैर्देवैः । तेऽपि औन्मनसपदव्याख्यवस्थितश्रीस्वच्छन्दनाथपरिवारत्वात् तदधिष्ठितैः कपालीशादिभिर्भैरवैरधिष्ठिताः,। तदाह सर्व एवैते तेषु प्राणीयाहोरात्रार्धप्रहरेषु व्यवस्थिताः । अत्र चाद्यार्धप्रहरक्रमेणैव इन्द्रादीनां दिने रात्रौ च द्वितुटिक उदयः, नतु षट्परिवृत्त्याद्यवस्थितग्रहस्थित्या, ग्रहाणां सप्तानामष्टकैः सह संगत्ययोगात्।व्यवस्थितिश्चैषामभेदव्याप्तिः, अत एवात्र सामानाधिकरण्येनोक्तिः कृता । एवं च परभैरवस्फारमयत्वमेव प्राणे पर्यवसितम्, अतो यदस्माभिः प्राणभूमिकायामहोरात्रक्रमेण व्याप्तिप्रदर्शनं पूर्वं कृतं, तदुत्सूत्रं न मन्तव्यम् । इत्थं च सर्वमिदं परमेश्वराद्वयमेवेत्यत्र

ज्ञानादेव ज्ञानिनां जीवन्मुक्तिः करतलगतेव, साधकानां तु तत्तद्भुवनेश्वरादिव्याप्ततत्पदानुसारेणापि महाव्याप्त्यनुसंधानाद्विघ्नेनैव तत्तत्सिद्ध्युदयो भवति,–इति प्रतिपादितं भवति ॥ ४६ ॥

तदुक्तमेवार्थमनुबध्नाति

ग्रहादीन्समधिष्ठाय
सर्वेषूदयकारकाः ।

सर्वे एवैते लोकपालाद्या भैरवान्ताः 'सर्वेषु' दिनरात्रिप्रहरेषु उदयं कुर्वन्ति । कथम् । ग्रहादीनिति तत्तदर्धप्रहरेषु पर्यायेण प्राप्तवारान् सूर्यादिग्रहान् आदिशब्दादनन्तादिनागांश्च सम्यगभेदेनाधिष्ठाय ॥

किंच

राशिभिः सह नक्षत्रै-
स्त उद्यन्ति अहर्निशम् ॥४७॥

हृदयात्प्रभृति द्वादशान्तं यावत्प्रत्यङ्कुलषट्कं राशिः–इति स्थित्या मकरादयो मिथुनान्ताः षड्राशयः, तदधिष्ठितानि च नक्षत्राणि तदनु-

सारेणैव प्रत्यंशमपि तत्र उद्यन्ति, तथैव च द्वादशान्ताद्धृदयं यावत्कर्कटाद्या धन्व्यन्ताः ॥ ४७ ॥

अत्रैवाभिजिदुदयमाह

मध्याह्ने चार्धरात्रे च
उदयोऽभिजितो भवेत् ।

तालुनीत्यर्थः । अभिजयति सर्वान् विघ्नान् इति 'अभिजित्' नक्षत्रविशेषः ॥

अतश्च

अभीप्सितं फलं तत्र
साधकानां भवेदिह ॥ ४८ ॥

'इह' इति पारमेश्वरेषु शास्त्रेषु उक्तं यत् भोगमोक्षाख्यं फलं साधकानामिष्टं, तत्तु माध्याह्ने आर्धरात्रिकेऽभिजिन्नक्षत्रे भवत्येव ॥४८॥

एतदुपसंहरन्नन्यदवतारयति

अहोरात्रविभागोऽय-
मेवं ते कथितो मया ।
अधुना पक्षमासांश्च
वर्षाणि कथयामि ते ॥ ४९ ॥

तत्र निर्णीताभ्यन्तराहोरात्रं बाह्ये काले नियोजयति

आध्यात्मिकाहोरात्रेण
बाह्ये काष्ठा विधीयते ।

अत्र काष्ठा न घटिका, अपितु दशपञ्चनिमेषात्मा कालावयवविशेष इति दर्शितमेव ॥

किंच

मासेनाध्यात्मिकेनैव
बाह्ये चैव कला भवेत् ॥ ५० ॥

तत्र त्रिंशदहोरात्रा
मासस्तु वरवर्णिनि ।

आध्यात्मिको मासः ते प्राणचारात्मानस्त्रिंशदहोरात्रा बाह्यास्त्रिंशत्काष्ठाः, तेन ईदृशेनान्तरेण मासेन बाह्यकलाख्य एव कालो भवति । वक्ष्यति चैकादशे

'त्रिंशत्काष्ठाः कला ज्ञेया ..... ।' (११।२०१)

इति । एवशब्दः कलाशब्दानन्तरं योज्यः । वरं वर्णयति सर्वोत्कृष्टं परं तत्त्वं परामृशतीति वरवर्णिनी ॥

किंचाध्यात्मिकैः

मासैर्द्वादशभिश्चैव
बाह्येऽथ घटिका भवेत् ॥५१॥

तदेव स्फुटयति

शतानि त्रीण्यहोरात्राः
षष्टिरेव तथाधिका ।
वर्षमेतत्समाख्यातं
बाह्ये वै घटिका च सा ॥५२॥

सषष्टित्रिशतप्राणापानचारा बाह्या घटिका। यतोऽसौ षष्टिश्चषकाणि, चषकं च षट् प्राणापानचाराः ॥ ५२ ॥

एवमुक्तरूपाध्यात्मिकवर्षकलिताः

घटिकाः षष्टिस्त्वहोरात्रे
बाह्ये तु प्रवहन्ति वै ।
ता एवान्तरचारेण
षष्टिः संवत्सराः स्मृताः ॥५३॥

बाह्यघटिका आन्तरं वर्षमिति विभक्तमेव। अतस्ताः षष्टिस्तावन्त्येवान्तराणि वर्षाणि सूक्ष्मकालगत्या । अत एवैकत्र प्राणचारे

षष्ट्यब्दोदय,—इति परा कालस्थितिरग्रे स्फुटी-
भविष्यति ॥ ५३ ॥

अथ षष्टिघटिकात्मसु वर्षेषु

प्राणसंख्यां पुनस्तेषु
कथयाम्यधुना तव ।
षट् शतानि वरारोहे
सहस्राण्येकविंशतिः ॥ ५४ ॥
अहोरात्रेण बाह्येन
अध्यात्मं तु सुराधिपे ।

घटिकायां सषष्टित्रिंशती प्राणचाराणाम्, इति गणनया षष्टिघटिकासंख्ये बाह्येऽहोरात्रेऽ-ध्यात्मे आत्मनि तदाश्रयेण प्राणचाराणामेषैव संख्या भवति ॥

एवमीदृशी

प्राणसंख्या समाख्याता
ज्ञातव्या साधकेन तु ॥ ५५ ॥

एवं प्रोक्तवक्ष्यमाणव्याप्तिसतत्त्वेन

प्राणहंसे सदा लीनः
साधकः

लीनो निभालनया विश्रान्तः ॥

तथा प्राणभूमिन्यग्भावेन शाक्तपदसमावेशादेवासौ

परतत्त्ववित् ।

भवति ॥

तदा च

तस्यायं जप उद्दिष्टः
सिद्धिमुक्तिफलप्रदः ॥ ५६ ॥

इह प्राणो निर्णीतविश्वमन्त्रवीर्यभूतहंसाश्रयत्वाद्धंस इति । तत्र यो लीनः, स प्राणसंख्ययैव सदैतावज्जपयुक्तो भवति । यथोक्तं श्रीविज्ञानभैरवे

'षट् शतानि दिवारात्रं सहस्राण्येकविंशतिः ।
जपो देव्याः समुद्दिष्टः सुलभो दुर्लभो जडैः ॥' (१५६)

इति ॥ ५६ ॥

'सिद्धिमुक्तिदः' इति यदुक्तं, तद्विभजति

अधःप्रवहणे सिद्धि-
र्हृत्पद्मं यावदागतः ।
मुक्तिश्चैव भवेदूर्ध्वे
परतत्त्वे तु सुव्रते ॥ ५७ ॥

एतच्च

'यदा करोति सृष्टिं च.....।'

इत्यादौ वितत्य निर्णीतम् ॥ ५७ ॥

तदेवमुक्तव्याप्तिज्ञानपूर्वं प्राणहंसे लीनतया परतत्त्वविदो योगिनः सर्व एव कालस्तत्प्रारोहप्रकर्षात्तादृगनुभवमय एव भवतीत्याह

मनोऽप्यन्यत्र निक्षिप्तं
चक्षुरन्यत्र पातितम्।
यथा प्रवर्तते प्राण-
स्त्वयत्नादेव सर्वदा ॥ ५८ ॥

तथेति मध्येऽध्याहार्यम्। तेन यद्यप्यन्तःकृततयो बहिष्कृतयः स्वधिये प्रसृताः, तथापि परतत्त्वविश्रान्तिपरत्वेन प्राणव्याप्तिज्ञस्य तथा तेनैव परविश्रान्तिप्रदेन प्रकारेण 'प्राणो' हंसात्मा मध्यमः 'अयत्नादेव' स्वरसत एव सर्वदा 'प्रवर्तते' वहति ॥ ५८ ॥

एतदेवोपोद्बलयति

नास्योच्चारयिता कश्चि-
त्प्रतिहन्ता न विद्यते।

स्वयमुच्चरते हंसः
प्राणिनामुरसि स्थितः॥ ५९ ॥

'हंसः' प्राग्व्यावर्णितसतत्त्वपरनिष्कलभट्टारकः, तदधिष्ठितत्वान्मध्यमः प्राणोऽपि निर्णीतव्यासिसारः'स्वयमुच्चरते' अशेषं वाच्यवाचकक्रममुल्लङ्घ्य परमाभेदसारमहामन्त्रवीर्यात्मना स्फुरति। यतोऽस्य न कश्चिदुच्चारयिता प्रतिहन्ता वा अस्ति, अस्यैव सर्वकर्तृत्वेन परमातृरूपत्वात्। अत एव चायम् 'अनाहतः' इत्युद्घोष्यते इतरवर्णवत् स्थानकरणाभिघातानभिव्यक्तत्वादनस्तमितत्वाच्च। स चायं 'प्राणिनामुरसि' हृदये जीवितस्यापि जीवितभूतः स्थितः। केचिदेव त्ववधानधना एतत्सत्तामाविशन्ति॥

तदित्थं परतत्त्वावहितसाधकजपनिष्पत्त्यभिप्रायेण

मासवत्सरसंख्या तु
एषा ते कथिता मया।

आध्यात्मिकीति शेषः। त्रिंशत्प्राणचारा आध्यात्मिको मासः, षष्ट्यधिका तु त्रिंशती वत्सरः,—इति हि निर्णीतमेव॥

इदानीमत्रैव प्राणचारे

चन्द्रसूर्योपरागं तु
कथयामि ततः परम् ॥ ६० ॥

साधकस्य भुक्तिमुक्तिफलप्रदमिति स्थितमेव ॥ ६० ॥

तत्रादौ

अहोरात्रस्तु यः प्रोक्तः
प्राणेऽस्मिन्सुरसुन्दरि।
स एव पक्षद्वितयं
मासं च कथयामि ते ॥ ६१ ॥

अविभागेनेति शेषः। त्रिंशत्प्राणचाराः॥६१॥

तत्र कृष्णपक्षं तावत्पक्षसंधिप्रदर्शनपूर्वं निरूपयति

तुर्य्यर्धं चाप्यधश्चोर्ध्वं
विश्रमः परिकीर्तितः।
मध्ये पञ्चदशोक्ता या-
स्तिथयस्ताः प्रकीर्तिताः ॥६२॥

अध ऊर्ध्वं च यत्तुट्यर्धं पूर्वमहोरात्रोदये पूर्वापरसंध्यात्वेनोक्तं, स एवेह विश्रमः पक्षसंधित्वेन कीर्तितः। यास्तु मध्ये पञ्चदश तुटयः, ता एव प्रतिपदाद्यास्तिथयः ॥ ६२ ॥

अत्र च पक्षसंधितुट्यर्धमुत्सृज्य, प्रतितुट्यहोरात्रविभागमाह

प्रथमोदये तु हृत्पद्मा-
त्तुट्यर्धं तु दिनं भवेत्।
द्वितीये चैव तुट्यर्धे
यदा चरति शर्वरी ॥ ६३ ॥

हृत्पद्मादित्युपलक्षणम्। तेनैकैकस्यास्तुटेः सार्धपादाङ्गुलपरिमाणमाद्यमर्धं दिनं प्रकाशरूपं, परं तु विश्रान्त्यात्मा रात्रिः। यत इयं भगवती संवित्प्रकाशानन्दमयी, ततो यत्र यावन्तावनया वेद्यवेदकविश्रान्तिरूपौ प्रकाशानन्दावाभास्येते, तत्र तावद्रूपे एव दिननिशे। तथा च मशकादौ सदाशिवादौ चात्यल्पातिविततकालत्वं तयोर्युक्तमेव। एवं च प्रतितुट्यर्धं वक्ष्यमाणक्रमेण तदंशांशेष्वपि वा ता-

वाभाससमानौ दिननिशाभेदं समुचितं प्रमातारं प्रति भासयत एव। कदाचिच्च प्रकाशस्याधिक्यं, कदाचिच्च विश्रान्तेः, कदाचित्तयोः साम्यमिति कृत्वा दिननिशयोर्वैषम्यं च भवत्यन्तर्बहिश्च। 'यदा चरति' इति सूत्रांशादनन्तरं तदेत्यध्याहार्यम्॥ ६३॥

अत्र च दिनरात्रिभेदे

राशयो ग्रहनक्षत्रा-
ण्युदयन्ति यथाक्रमम्।

पारमेश्वर्या हि संविदा या यादृशी दिनादिव्यवस्था क्रियते, तां सर्वे ग्रहादयोऽनुवर्तन्ते॥

तदित्थम्

अस्मिन्नेवमहोरात्रे
पूर्ववच्च वरानने॥ ६४॥
तुटिभिः पञ्चदशभिः
पक्षः स तु विधीयते।

'अस्मिन्' इत्यान्तरे। 'एवम्' इति तुल्यार्धार्धकलनया। 'पूर्ववत्' इति सुसूक्ष्मया दृष्ट्या। 'पक्षः' इति कृष्ण इत्यर्थात्॥

अथात्रैव पक्षे आमावस्यप्रातिपदतिथ्यंशमेलनप्रकटनेन सूर्यग्रहं निर्णिनीषुस्तिथिच्छेदवृद्धी दर्शयति

तिथिच्छेदे ऋणं ज्ञेयं
वृद्धौ चैव धनं भवेत् ॥ ६५ ॥
ऋण चैव भवेत्कासो
निःश्वासो धन उच्यते ।

'ऋणं' प्राणवाहस्य किंचिदल्पकालता कासवशाद्भवति । तथा सति झगिति धावनादामावस्यौंऽशः प्रतिपत्स्थानं प्रसरति । एतच्च दर्शयिष्यमाणसूर्यग्रहणोपयोगि । निःश्वासवशात्तु किंचिच्चिरकालता अपानचन्द्रस्य धनं, तथा सति पूर्णमास्युदयश्चन्द्रग्रहोपयोगी भवति ॥

प्रकृतं तु

कृष्णपक्षोर्ध्वचारेण
संहारः संक्षयो भवेत् ॥ ६६ ॥

कृष्णपक्षरूपेणोर्ध्वचारेण प्रकृतस्य प्राणस्य यः संहारः, स एव प्रवेशितपूर्वप्राणावस्थितमेयचन्द्रस्य प्रतितुल्यैकैककलाक्रमेण अमाव-

स्यान्तं पञ्चदशकलानां संक्षय इत्यर्थः । तदुक्तं श्रीकामिकायाम्

'अमृतं चन्द्ररूपेण द्विधा षोडशधा पुनः ।
पिबन्ति च सुराः सर्वे दश पञ्च पराः कलाः ॥
अमाशेषगुहान्तस्थामावस्या विश्वतर्पिणी ॥'

इति । द्विधेति कलापञ्चदशकभित्तिभूतातिस्वच्छरूपतया दृश्यमानसितपक्षपञ्चदशकलात्मना चेत्यर्थः ॥ ६६ ॥

यत ईदृक् कृष्णपक्षः, ततः

क्रूरकर्माणि वै तत्र
कुर्वन्सिद्धिमवाप्नुयात् ।
शुभकर्माणि कृष्णे च
न च सिध्यन्ति सुव्रते ॥ ६७ ॥

चकारौ तुशब्दैवशब्दयोरर्थे । इह 'यदन्तस्तद्बहिः' इति स्थित्या यद्यदान्तरे दिनरात्रितत्संध्यापक्षमासादिके फलमुक्तं, तत्तद्बाह्येऽपि तत्र तथैवेति मन्तव्यम् ॥ ६७ ॥

अथान्तरीममावस्यां दर्शयति

शक्तिं वै विशति प्राणे
या तुटिस्तु विधीयते ।

अमावस्या तु सा ज्ञेया
कृष्णपक्षे वरानने ॥ ६८ ॥

'शक्तिः' ब्रह्मरन्ध्रस्थानं 'तुटिः' इति प्रक्षीणचन्द्रा पञ्चदशी । अत एवामाख्यायां षोडश्यां तुटौ वसनात् तद्भित्त्यवलम्बनादमावस्या सा ज्ञेया ॥ ६८ ॥

अथ पूर्वमासूत्रितं पक्षसंधिं स्फुटयति

शक्तेर्मध्योर्ध्वभागे तु
तुल्यर्धं यत्प्रकीर्तितम् ।
पक्षसंधिस्त्वसौ ज्ञेयः

ब्रह्मरन्ध्रादुत्थिताया: शक्तेर्मध्यं त्वक्स्थानं त्वक्शेषस्तु केशस्थानमूर्ध्वमेकमेव तुल्यर्धं यत्, स पक्षयोः कृष्णशुक्लयोः संधिः । यदेव हि प्राणस्यान्त्यं तुल्यर्धं, तदेवापानस्याद्यं भवतीत्येतदुभयोस्तुल्यर्धात्मकं देशत एकमेव तत्तल्यर्धद्वयवाहकालं संधिपदम् ॥

अथात्र सूर्यग्रहणं दर्शयति

अमावस्यार्धप्रतिपदा ॥ ६९ ॥

तिथिच्छेदेन वै तत्र
सूर्यस्य ग्रहणं भवेत् ।

प्रागुक्तात्कासात् तिथिच्छेदेन यदा अमावस्येति तत्संबद्धः पक्षसंध्यार्धकालः स्वस्मिन् सध्यातुटिभागे प्रतिपत्कालेन सह भवति, तदा सूर्यग्रहणं भवति ॥

यतः

रविबिम्बान्तरे देवि
चन्द्रबिम्बं तदा भवेत् ॥ ७० ॥
तदन्तरे भवेद्राहु-
रमृतार्थी वरानने ।
अमृतं स्रवते चन्द्रो
राहुश्च ग्रसते तु तम् ॥ ७१ ॥
पीत्वा त्यजति तद्बिम्बं
तदा मुक्तः स उच्यते ।

तदेति प्रतिपदोऽमावस्याभागसंघट्टे 'रविबिम्बान्तरे' प्राणमध्ये 'चन्द्रबिम्बम्' अपानः प्रविशेत् । पूर्वोक्तनीत्या च चन्द्रसहचारी राहुः

सूर्यसंस्पर्शविलीनं चान्द्रममृतं 'पीत्वा' कंचित्कालमास्वाद्य अपानरूपं चन्द्रबिम्बं स्वसंबन्धात् मुञ्चति । इदमत्र सतत्त्वम्

प्राणार्कमानहठघट्टितमेयचन्द्र-
विद्रावितामृतरसोत्सुकितः खमाता ।
स्वर्भानुराच्छृणुत एव रविं रसं तु
पुण्ये ग्रहेऽत्र रसयेत्त्रयघट्टनज्ञः ॥

एवमन्तरिव बहिरपि अनयैव युक्त्या भवेत् ॥

आदित्यग्रहणं चैव
लोके तदुपदिश्यते ॥ ७२ ॥

ततो ज्योतिःशास्त्रोक्तप्रक्रियया

राहुरादित्यचन्द्रौ च
त्रय एते ग्रहा यदा ।
दृश्यन्ते समवायेन
तन्महाग्रहणं भवेत् ॥ ७३ ॥

महत्त्वमेव व्यनक्ति

स कालः सर्वलोकानां
महापुण्यतमो भवेत् ।

तथाच

तत्र स्नानं तथा दानं
पूजाहोमजपादिकम् ॥ ७४ ॥
यत्कृतं साधकैर्देवि
तदनन्तफलं भवेत् ।

'अनन्तम्' अपरिच्छिन्नं मोक्षाख्यं फलं यस्य । यद्वक्ष्यति

'मोक्षश्चैव पुनर्भद्रे.....।' (७।८४)

इत्यादि ॥

एवं कृष्णपक्षं सूर्यग्रहणं च प्रदर्श्य, शुक्लपक्षं चन्द्रग्रहणं च क्रमादादिशति देवः

तां चैवार्धतुटिं त्यक्त्वा
शुक्लपक्षोदयो भवेत् ॥ ७५ ॥

'ताम्' इति यत्र सूर्यग्रहणं दर्शितम्, 'शुक्लपक्षः' अपानचन्द्रोदयरूपः ॥ ७५ ॥

तदाह

शक्तिगर्भादधः सृष्टि-
स्तस्माद्वृद्धिः प्रजायते ।

'शक्तेर्गर्भः' कुण्डलाकारता, सा हि शिम्बिकारूपतया स्वान्तरशेषं विश्वमासूत्र्य 'अध' इति हृदयपर्यन्तं तदेव सृजति । अत एव वृद्धिः क्रमात्क्रममपानचन्द्रपरिपुष्टिरूपा तथा वृद्धिर्निःश्वासात्मकधनरूपा जायते अत्र कासक्रमेण तिथिच्छेदस्याभावात् ॥

यत एवम्, अतः

तदारभ्य च कर्माणि
शुभान्यभ्युदयानि च ॥ ७६ ॥
ध्यानमन्त्रादियुक्तस्य
सिद्ध्यन्ते नात्र संशयः ।

'तदारभ्य' इति शक्तिगर्भस्वरूपमवष्टभ्य, 'शुभानि' आप्यायनादीनि कर्माणि 'अभ्युदयानि च' तत्फलानि च ॥

अत्र शुक्लपक्षे दिननिशाविभागं प्रदर्शयति

प्राणहंसो यदा प्राप्त-
स्त्वधस्तां प्रथमां तुटिम् ॥७७॥
पूर्वमर्धं त्वहः प्रोक्तं
तुट्यर्धमपरं निशा ।

'प्राणहंसः' इति प्राग्वत्। 'अध' इति संधितुल्यर्धात् 'प्रथमां तुटिं' शुक्लपक्षप्रतिपद्रूपाम्। यदाशब्दश्रवणात् तदेत्यध्याहार्यम्। अहर्निशाप्रविभागः प्राग्वदेव। एवं द्वितीयादितिथिष्वपि मन्तव्यम्॥

किंचात्र

राशयो ग्रह ऋक्षाणि
योगाश्च करणानि च॥ ७८॥
पूर्ववत्क्रमयोगेन
तान्युद्यन्ति त्वहर्निशम्।

गतार्थमेतत्॥

या चेयं प्रथमा तुटिः
प्रतिपत्सा तु विज्ञेया

अत्र

चन्द्रश्चैककलो भवेत्॥ ७९॥

किंच

द्वितीयायां द्वितीया तु
वृद्धिमेति क्रमेण तु।

'द्वितीयायाम्' इति तुटौ । 'द्वितीया' इति कला ॥

एता एव तुटयः

तिथयश्चैवमारभ्य
यावत्पञ्चदशी तुटिः ॥ ८० ॥

भवति ॥ ८० ॥

सा च पञ्चदशी

पौर्णमासी तु विज्ञेया
तिथिर्वै साधकेन तु ।

'माः' चन्द्रः पूर्णोऽस्यामिति कृत्वा, अत एवैहिकसिद्धिं साधयति । तेनैषा साधकैरुक्त-वक्ष्यमाणव्याप्तिसारतया ज्ञातव्या ॥

अतश्च

तत्र पूजा जपो ध्यानं
संपूर्णं सफलं भवेत् ॥ ८१ ॥

ऐहिकफलमित्यर्थात् ॥ ८१ ॥

यतः

संपूर्णश्च भवेत्तस्यां
चन्द्रो वै चारुलोचने ।

चो ह्यर्थे । 'चन्द्रः' अपानः ॥

अथ

तस्याश्चार्धतुटिर्या तु
पक्षसंध्या तु सा स्मृता ॥ ८२ ॥

प्राग्वदेव । 'तस्याः' इत्यवधौ पञ्चमी ॥

कृष्णपक्षसंध्याशब्दवाच्यस्य पक्षसन्धेः पूर्ववदेव

तस्यार्धे पौर्णमासी तु
प्रतिपदर्धेन संस्थिता ।

प्रतिपदः संबन्धिना 'अर्धेने'ति तृतीया सहार्थे ॥

इत्थं च प्रागुक्तव्याप्त्यैव

हृत्पद्मसंधिमध्ये तु
सोमस्य ग्रहणं भवेत् ॥ ८३ ॥

संधिमध्यं—प्राणापानसंधिस्थानम् । इदमत्र तत्त्वम्—

'शक्तिसंस्रुतसुधारसक्रमा-
त्पूर्णमिन्दुमणुराहुराहरन् ।

छादयेदिह शुभे महाग्रहे
द्राक्षितं पिबति तं महामुनिः ॥'

इति । तदेतत् अन्तरिव बहिरपि ॥ ८३ ॥

आदित्येन विना लोके
सोमग्रहणमुच्यते ।

प्रतिपत्सङ्गात् दूरस्थार्कस्पृष्टेऽपीन्दौ रात्रावर्काभावात् , सूर्यग्रहणे तु पार्वणेन्दुकलयार्कः संस्पृश्यत एव ॥

किंच

तत्रैव च महत्पुण्यं
ध्यानहोमजपादिभिः ॥ ८४ ॥

यथोर्ध्वपदे आदित्यग्रहणं मोक्षप्रदतया महापुण्यं, तथा 'तत्रैव' इति मध्यमधामप्रवेशक्रमलब्धे हृदये चन्द्रग्रहणमैहिकोत्तमसिद्धिप्रदतया महापुण्यम् ॥ ८४ ॥

नच केवलं मध्यधामनि चन्द्रसूर्ययोर्ग्रहणं, यावत्

पक्षद्वयेऽपि देवेशि
ग्रहणं चन्द्रसूर्ययोः ।
नानासिद्धिप्रदं ह्येत-
त्साधकस्याभियोगिनः ॥ ८५ ॥

'पक्षद्वये' दक्षे वामे च मध्यवदेव ग्रहणद्वयम् । 'नाना' इति क्रूरसौम्यसिद्धिप्रदम् । 'अभियोगिनः' उद्युक्तस्य ॥ ८५ ॥

मुमुक्षोस्तु
मोक्षश्चैव पुनर्भद्रे
पक्षद्वयसमुज्झितः ।

चशब्द एवशब्देन सह नियतविषयतया तत्त्वेश्वरपदव्याप्त्यादिरूपमुत्तमं भोगं समुच्चिनोति । तेन पक्षद्वयोज्झितो मध्यमार्गश्च यो मोक्षः, तदूर्ध्वं सूर्यग्रहणे मोक्ष एव, हृदि तु चन्द्रग्रहणे भोगो मोक्षश्च ॥

अतश्च यो मोक्षार्थी
पक्षद्वयं परित्यज्य
पूर्वोक्तकरणेन तु ॥ ८६ ॥

उन्मन्यन्ते स्थितो नित्यं
परवृत्त्यवलम्बकः ।
परित्यज्य त्वधः सर्वं
ध्यानमास्थाय योजयेत् ॥८७॥
तस्य मुक्तिर्न संदेह-
स्त्वन्यथा सिद्धिभाग्भवेत् ।

पूर्वोक्तं करणं दिव्यम्। परा वृत्तिरुक्ता लक्ष्यते च । अधस्तनं सर्वमुन्मनान्तं 'परित्यज्य' तत्समरसीकृत्य । 'ध्यानं' परतत्त्वविमर्शः । 'अन्यथा' इति—दक्षवामपथोर्ध्वस्थितः ॥८६-८७॥

मध्यपथग्रहणं चैतदुर्लभम्, इतरत्तु सुलभमेव,—इत्याह

पक्षद्वयेऽपि ग्रहणं
भवेद्वै सर्वदेहिनाम् ॥ ८८ ॥

'देहिनाम्' इत्यनेन मितयोगिनामत्यन्तं देहप्रमात्रभिमानत्वमिति दर्शयति ॥ ८८ ॥

उपसंहरति

एवमेतत्समाख्यातं
यावदायुर्वरानने ।

'एतत्' इति सावधानसंचेत्यं ग्रहणम् ॥

अत्रैवाध्यात्माहोरात्रे
त्वथाब्दोदय उच्यते ॥ ८९ ॥

तमाह

हृत्पद्माद्ऊर्ध्वपर्यन्तं
राशयः षड् व्यवस्थिताः ।

'राशयो' मकराद्याः ॥

षट्त्रिंशदङ्गुले चारेऽत्र

अङ्गुलैः षड्भिरेकैको
हृत्पद्माद्याव शक्तितः ॥ ९० ॥

'एकैकः' इति राशिः ॥

इत्थमस्मिन्षट्त्रिंशदङ्गुले षण्मासोदये

अङ्गुले अङ्गुले ह्यत्र
तिथयः पञ्च संस्थिताः ।
तस्याप्यर्धं दिनं पूर्व-
मपरार्धं निशा भवेत् ॥ ९१ ॥

तस्य अङ्गुलपञ्चभागावधेस्तिथेः ॥

अत एव

षट्त्रिंशकास्तिथीनां ये
तेऽहोरात्रास्तु मासिकाः ।
त्रिंशता तैरहोरात्रै-
र्द्विपक्षो मास उच्यते ॥ ९२ ॥

षडङ्गुले राश्युदयस्थाने त्रिंशदहोरात्रस्य मासस्य निष्पत्तिर्भवतीत्यर्थः । 'द्विपक्षः' इत्यनेनेदमाह—यथातोऽपि तत्तन्मासस्साध्यक्रूरसौम्यसिद्ध्यर्थकृष्णशुक्लपक्षाश्रयणं सुसूक्ष्मदृशा योगिनानुसर्तव्यमिति[1]। अत एव वर्षसाध्ये विधौ तत्तन्मासकार्यं कर्म बाह्यान्तरमासैकीकारानुसरणपूर्वं योगिनानुष्ठातव्यमिति वर्षोदयेऽभिप्रायः ॥ ९२ ॥

तदित्थम्

मासि राश्युदये ह्येष
अधोर्ध्वप्राणसंचरे ।

ऊर्ध्ववदधःप्राणसंचारेऽपि एष एवमादिः क्रमो ज्ञेय इत्यर्थः ॥

---

१ क० ग० पु० अनुमन्तव्यमिति पाठः ।

अथ राश्युदयं विभागेनादिशति मासप्रभेददर्शनाशयेन

हृदयादुदयस्थाना-
त्संक्रान्तिर्मकरे स्थिता ॥ ९३ ॥
षडङ्गुलान्यधस्त्यक्त्वा
कुम्भे संक्रमते पुनः ।
कण्ठोर्ध्वे द्व्यङ्गुलं त्यक्त्वा
मीने संक्रमते पुनः ॥ ९४ ॥
गलोर्ध्वाद्यावत्तालवन्तं
त्यक्त्वा मेषेऽथ संक्रमेत् ।
नासान्तं यावत्संक्रान्ति-
रङ्गुलानि षडेव हि ॥ ९५ ॥
एषा वै विषुसंक्रान्ति-
रुत्तरे संव्यवस्थिता ।

'उदयस्थानात्' इति मन्त्रोच्चारणभूमेः । 'संक्रान्तिः' इति प्राणार्कस्येत्यर्थात्, अत एव माघादिमासक्रमोऽत्र स्थितः । 'षडङ्गुलानि' इति काकाक्षिवत् । 'विषुसंक्रान्तिः' विषुवत्सं-

क्रान्तिः । 'उत्तरे' इति उत्तरायणे ॥

एतच्च प्राग्वत्पारलौकिकादिसिद्ध्यङ्गतयेति ज्ञेयम् । तदाह

जपहोमार्चनध्याना-
न्महाभ्युदयकारिका ॥ ९६ ॥

एषा विषुवत्संक्रान्तिरित्यर्थः । अत्रापि प्राग्वदन्तरिव बाह्यसंक्रान्तिष्वपि तत्तत्फलप्रदत्वं स्मर्तव्यम् ॥ ९६ ॥

अथ

नासाग्रं तु परित्यज्य
प्राणहंसो वृषे चरेत् ।
षडङ्गुलानि संत्यज्य
संक्रमेन्मिथुने पुनः ॥ ९७ ॥
शक्त्यन्तं यावदध्वानं
संक्रान्तिर्मिथुने स्मृता ।

'षडङ्गुलानि' इति काकाक्षिवत् । 'शक्त्यन्तं' द्वादशान्तम् ॥

एतदनुवदन् फलं पर्यवसायि दर्शयति

मकराच्च समारभ्य
मिथुनान्तं च सुव्रते ॥ ९८ ॥
उत्तरायणमत्रैत-
दैहिकीसिद्धिवर्जितम् ।

उत्तीर्यतेऽनेनेति व्युत्पत्त्या उत्तरमयनम् ॥ ततश्च

स्नानं ध्यानं तथा दानं
पूजाहोमजपादिकम् ॥ ९९ ॥
साधकाद्यैः कृतं यच्च
सहस्रानेकधा भवेत् ।
इह जन्मनि नाप्नोति
परत्रैवोपतिष्ठते ॥ १०० ॥

साधकादीनां पुत्रकादीनां चात्र स्नानादिकरणात्तद्देहान्ते भोगो मोक्षश्चाभीष्टो भवति ॥

'इह जन्मनि नाप्नोति' इत्यत्र हेतुमाह

दिनानि तत्र वर्धन्ते
मकरान्मिथुनान्तिकम् ।

तत्काले संहरेद्वीर्यं
जगत्यस्मिंश्चराचरे ॥ १०१ ॥
हंसो रश्मिभिराकृष्य
गर्भस्थं कारयेत्तु तम् ।

'तत्र' इत्युत्तरायणे । दिनवृद्धिर्मेयग्रहणाभ्यासेन विश्रान्तिभागानादरात् । 'वीर्यं' विश्वस्याप्यायनकरं रसम् । 'हंसः' अनाहतनादोऽन्तः, बहिस्तु सूर्यः । 'रश्मिभिः' अन्तर्मुखीभूताभिर्विमर्शमयीभिरिन्द्रियदेवीभिरन्तः, बहिस्तु प्रभाभिः । 'संहरेत्' इति व्याचष्टे—'गर्भस्थं' शक्त्यन्तर्गतं 'कारयेत्' कुर्वतो रश्मीन्नियुनक्ति ॥

तत्कृत्वा
गर्भस्थानेकधारूपं
यद्गृहीतं पुरातनम् ॥ १०२ ॥
कर्कटादेः समारभ्य
सर्वं वर्षति तत्पुनः ।

'कर्कटादेः' इत्यपानोदयस्थानात् । 'तत्' इति वीर्यम् ॥

यत एवं प्राणोदयो वीर्यसंहारकृत्
तस्मादारभ्य मकरा-
द्ध्यानहोमजपादिकम् ॥१०३॥
परलोकनिमित्ताय
तदनन्तफलं भवेत् ।

पूर्वोक्तानुवादोऽयम् ॥

अत्रैवोत्तरायणे साधकस्य मन्त्रसेवार्थं[1] जपादावान्तरस्थानविशेषात्मकालविशेषाश्रयेणोच्चारमादिशति

पुरश्चर्यानिमित्ताय
मन्त्रग्रहव्रतं च यत् ॥ १०४ ॥
मीनादावारभेत्सर्वं
मन्त्रसिद्ध्यर्थमात्मनः ।

पुरश्चर्या प्रथममेव, मन्त्रग्रहपूर्वं व्रतं नियतजपादिकरणम् । अष्टाङ्गुलात्कण्ठदेशादङ्गुलद्वयं त्यक्त्वा ऊर्ध्वं तालवन्तं षडङ्गुलं मीनस्थानम्, एतदादौ शक्त्यवधिमिथुनस्थानान्ते । अतः प्रभृति ह्यूकारमकारयोगात् परस्य निष्कलस्य मन्त्रत्वमिति पूर्वमुक्तम् ।

---

१ क० ख० पु० मन्त्रपूर्वसेवार्थमिति पाठः ।

'मत्स्यवलनसंयोगात्तालुरन्ध्रे व्यवस्थिता ।'

इति च श्रीत्रिकसारे निरूपितत्वादत्र शक्ते-र्मीनवन्मुखपुच्छाच्छोटनेन तालुबिलाक्रमणा-त्तद्गतरसास्वादनतः साधकसंविदः सरसत्वापा-दनेन भाविफलं प्रति अङ्कुरीभावापादनादेव-मुक्तम् ॥

युक्तं चैतत्, यतोऽत्र

बाह्येऽपि तरवो लोके
ऋतुषट्कसमीरितम् ॥ १०५ ॥
कुसुमानन्दमायान्ति
कुसुमायुधदीपकम् ।

'तरवः' कुरवकाद्या अपि मीनसंचारात्मक-वसन्तात्प्रभृति कुसुमविकासमयमानन्दं प्रा-प्नुवन्ति । तं च ऋतुषट्के समीरितम्, वसन्ते प्रथममुद्भिद्य अन्यत्रापि ऋतौ कुसुमानां प्रस-रात् । 'कुसुमायुधदीपकम्' इत्यनेन कामो-द्दीपनहेतुतामभिदधत्साद्दश्येनान्तरस्यापि वस-न्तस्य कामानां प्रति साधकत्वं ध्वनति । अत एव बहिर्यथा कुसुममेव फलोपादानं, तथा-

१ ख० पु० समरसत्वेति पाठः ।

न्तरपि मीनादौ कर्मारम्भः कुसुमप्रतिमः साधकानामवश्यमीप्सितं फलमभिमुखं करोति,—इति कुसुमशब्दाभिप्रायः ॥

अत एव

मन्त्राः कालानुरूपेण
व्रतचर्यादिनेरिताः ॥ १०६ ॥
ज्ञेयबोधप्रदीप्ताश्च
सिद्धिमुक्तिप्रसाधकाः ।

'कालो' मीनाद्युदयः । 'व्रतम्' आराधननियमः । 'चर्या' साधकोचितसमयाचारः । आदिशब्दात्करणबन्धादिरुच्चारणोपायः । 'ईरिताः' उत्तेजिताः । 'ज्ञेयबोधो' मन्त्रवाच्यदेवताव्याप्तिज्ञानं, तेन 'प्रदीप्ताः' तत्प्रकाशाविभेदिविमर्शसाराः ॥

यत एवं सर्वमन्त्राणां स्थितिरतोऽयमत्रत्यो मन्त्रः पूर्वसेवार्थम्

अध्यात्मशब्दरूपात्मा
षड्रसास्वादनेरितः ॥ १०७ ॥

हंसबोधप्रदीप्तस्तु
गलके मीनमाश्रितः ।

'अध्यात्मशब्दः' अनाहतध्वनिस्तत्परमार्थः।
'शिवो धर्मेण हंसस्तु.....।' (७।२९)
इत्यत्र निर्णीतेन हंसस्य बोधेन व्याप्तिज्ञानेनेच्छः। व्याख्यातमत्स्यवलनव्याप्त्या गले मीनराशिसंचारं प्राप्तः, अथच षष्ठबीजमेवोर्ध्वाधःकलात्मकमुखपुच्छाच्छोटनया प्रोच्छलन्मीनरूपत्वम् 'आश्रितः' आरूढः । तत एव च सर्वेन्द्रियाश्रयप्राणाधिरूढेनात्मना ईरितो लम्बिकारसास्वादाय प्रेरितः, ततः प्रभृति मन्त्रतां प्राप्तः सन्नुच्चार्य इति यावत् ॥

एतदेवोपसंहारभङ्ग्या आदिशति

शब्दसंवेदनं तस्य
स्फुटं तत्र भवेद्यतः ॥ १०८ ॥
तदारभ्य जपात्तस्य
सर्वमेव प्रवर्तते ।
मिथुनान्तं च देवेशि
ततः सिद्धिः प्रजायते ॥१०९॥

'तस्य' अध्यात्मशब्दस्य । स्फुटं 'शब्दसंवेदनं' मन्त्रतत्त्वानुभवनम् । 'तत्र' इति मीनस्थाने । 'तस्य' इति साधकस्य । सर्वं पूर्वसेवार्थं जपपूजाध्यानादि । मिथुनान्तं शक्त्यवस्थाने विश्रान्तिं कृत्वेत्यर्थः । 'सिद्धिः प्रजायते' मन्त्राराधनं निष्पद्यते । तदत्रोत्तरायणचारे प्राणस्यैव मकरादिरूपत्वमुक्तं, तदनुकाराद्बहिः,-इति वर्णयन्ति । तथाहि—हृदयादुद्घाटितवक्त्रप्राणस्य प्रसरणान्मकरत्वं, कण्ठे कुम्भवदवस्थानात्कुम्भत्वं, ततः पूर्वापराच्छोटनेनोच्छलनान्मीनत्वं, ततोऽपि हुडयुद्धवद्भ्रमध्यभेदनान्मेषत्वं, तदनु द्वयरसवर्षणाद्वृषत्वं, अनन्तरं शिवशक्त्युभयात्मकत्वान्मिथुनत्वमिति ॥ १०९ ॥

एवं प्राणे मिथुनान्तमुत्तरायणं निर्णीय, अपाने कर्कटादिधन्व्यन्तं दक्षिणायनं निर्णेतुमाह

सहंसो बिन्दुशक्तिस्थः
सिद्धिद्वारैरधोमुखः ।
कर्कटादौ स वर्षेत्तु
तुलान्तं तालुकान्तरे ॥ ११० ॥

सह हंसेन वर्तते यः प्राणः स 'बिन्दुशक्तिस्थः' इति

'यदा करोति सृष्टिं तु ऊर्ध्वे बिन्दुः प्रवर्तते।'

इत्युक्तदृशा समनापदस्थः, सिद्धिप्रदत्वात्तद्वारैः षडङ्गुलैश्चतुर्भिश्चारैः 'अधोमुखो' ब्रह्मरन्ध्रक्रमेणान्तःप्रविष्टः, 'तालुकान्तरे' तालुमध्ये 'तुलान्तम्' इति कण्ठं षडङ्गुलं वर्षेत्॥

तद्यावत्

कण्ठादधस्ततो देही
हृत्पद्मात्सर्वतो व्रजेत्।

'सर्वतः' सर्वत्र देहे। हृदयस्यापानपूरणेन विकासितत्वात्पद्मत्वम्। 'हृत्पद्मात्' इति तदाश्रित्य॥

यस्मादेवं

तस्मादिहात्मसिद्ध्यर्थं
पुष्ट्यर्थं चैव साधयेत्॥१११॥

इहात्मनः सिद्धिरस्मिन्नेव देहेऽणिमाद्याविर्भावनं, 'पुष्टिः' वलीपलिताद्यभावः॥१११॥

किंच प्राग्वद्बहिरपि

दक्षिणायनजे काले
यस्मात्सृष्टिः प्रजायते ।

'दक्षिणम्' अनुकूलं देहभुवनाप्यायकरम्। ग्रीष्मोष्मशोषितानां तृणलतागुल्मादीनां वर्षासु पुनरङ्कुरोद्भेदो यतो भवति, तस्माद्बाह्याभ्यन्तरैतत्कालैकीकारेण पूर्वोक्ताः सिद्धीर्जपादिना साधयेदिति संबन्धः । ननु जपप्रकरणे

'जपः प्राणसमः कार्यो दिनस्थो मुक्तिकाङ्क्षिभिः ।
संहारः स तु विज्ञेयः शिवधामफलप्रदः ॥
व्योम्नि प्राप्तो यदा नादः पुनरेव निवर्तते ।
शर्वरी सा तु विज्ञेया हृदब्जं यावदागतः ।
सृष्टिरेषा समाख्याता सर्वसिद्धिफलोदया ॥' (२।१४२)

इति पूर्वं प्रविभाग उक्तः, इह तु दिनोदयात्मकमीनोदयतः साधकस्य मन्त्रसिद्ध्यर्थं जपाद्युक्तं, तथा कर्कटादौ 'आत्मसिद्ध्यर्थं साधयेत्' इति प्रतिपादितं; तत्कथमेतत् । उच्यते। द्वितीयपटलप्रतिपादिते जपप्रविभागे स्थित एवमत्र विशेष उक्तः—साधकैर्मीनादिमि-

थुनान्तविश्रान्त्या कल्पोक्तजपादिक्रमेण पूर्वसेवया मन्त्राः साधनीयास्तथा साधितास्तु प्रयोगकाले सिद्ध्यर्थं कर्कटादितुलान्तविश्रान्तिप्राधान्येन प्रयोज्या इति न काचिदत्र विचिकित्सा ॥

अथ कर्कटादिषड्कमङ्गुलविभागेन निरूपयति

शक्त्यधो हृदये हंसः
संक्रमेत्कर्कटे प्रिये ॥ ११२ ॥
षडङ्गुलानि संत्यज्य
सिंहे वै संक्रमेत्पुनः ।
षडङ्गुलैः पुनस्त्यक्तैः
कन्यां संक्रमते पुनः ॥११३॥
नासिकाग्रात्तु तालवन्तं
त्यक्त्वैवं विषुवद्भवेत् ।
तुलासंक्रान्तिरेषोक्ता
दक्षिणं विषुवद्भवेत् ॥ ११४ ॥

'शक्तेः' साधनरूपाया अधो व्यापिनीशक्तिः। ब्रह्मरन्ध्रादिपदे कर्कट इव अधोवक्त्रो हंसः,

ततः सदाशिवपदे नदनप्रधानत्वाशेषविश्वाक्रमणकारित्वाभ्यां सिंहः, ततो भ्रूमध्यादौ बैन्दवप्रकाशप्राधान्याद्दीप्तिकान्तियोगात्सर्वसाधारणप्रसरणरूपगतितश्च कन्याशब्दवाच्यः, ततोऽपि तालुमध्ये समत्वेनावस्थितत्वात् तुलारूपः, साम्यादेव च विषुं व्याप्तिमर्हतीति कृत्वा विषुवच्छब्दाभिधेयः । पुनर्विषुवदिति पूर्वोक्तोत्तरविषुवतोऽन्योऽयं विषुवत्काल इत्यर्थः ॥ ११४ ॥

अन्यत्वादेव च

साधनं यत् कृतं तत्र
इह जन्मनि कामदम् ।

तदित्यर्थात् ॥

अतश्च

मृत्योर्जयं तथा शान्तिं
पुष्टिं तस्मात्समारभेत् ॥११५॥

तस्मात्स षड्साहारो
गलाधः प्रीणयेत्तनुम् ।

एषोत्तमादिरूपा त्रिविधात्र सिद्धिः । स

इति दक्षिणविषुवत्कालस्थस्तुल्यः । अत एवा-त्रैहिकं क्रूरकर्म न फलति इति तत् सर्वरससंहा-रिपौषमासाधिष्ठातृधन्विचारविश्रान्त्या कार्य-मित्यर्थलभ्यमत्र ॥

अथ

षडङ्गुलानि त्यक्त्वा तु
वृश्चिके क्रमते पुनः ॥ ११६ ॥
कण्ठोर्ध्वं द्वयङ्गुलं त्यक्त्वा
कण्ठाधश्चतुरङ्गुलम् ।

तालुतलादष्टाङ्गुलात्कण्ठात्षडङ्गुलानि त्य-क्त्वा यत् प्रवेशापेक्षया ऊर्ध्वं प्राणोल्लासा-पेक्षया त्वधस्तनमङ्गुलद्वयं त्यक्त्वा कण्ठाधः षडङ्गुले क्षेत्रे प्रथममङ्गुलचतुष्टयं, तत्र पूर्वाङ्गु-लद्वयेन सह षडङ्गुले वृश्चिकवन्निश्चलमवस्थाय शनैः शनैः प्रसर्पणाद्वृश्चिकः ॥

अथ

वृश्चिकं तु परित्यज्य
धन्विसंक्रान्तिरुच्यते ॥११७॥

षडङ्गुलादधस्तात्तु
धन्विंस्थश्चरते हृदि ।

'अधस्तात्' इत्यधःस्थं षडङ्गुलमाश्रित्य, हृदि 'चरति' विश्राम्यति । तत्र चायं हंसो बद्धलक्ष्यत्वाद्धन्वीत्युच्यते ॥

तदित्थं

हृत्पद्मान्तं तु वै हंस-
श्चरित्वा ऊर्ध्वगोदयः ॥ ११८ ॥

पुनः प्राणवृत्तिं श्रयतीत्यर्थः ॥ ११८ ॥

उपसंहरति

मकरादिषु संक्रान्तौ
द्वादशैवं चरेत्सदा ।
अमुनोक्तक्रमेणैव
आयुर्वै सर्वदेहिनाम् ॥ ११९ ॥

'संक्रान्तौ' इति जातावेकवचनात् मकरादिषु याः संक्रान्तयः, तासु 'एवं' उक्तक्रमेण 'द्वादश' इति माघादीन्मासान् 'सदा' प्रति-

---

१ ख० पु० धन्विभूः इति पाठः ।

प्राणचारं हंसश्चरेत् । किमवधीत्याह 'आयुर्वै सर्वदेहिनाम्' यावज्जीवमिति[1]त्यर्थः ॥ ११९ ॥

अथ प्रबुद्धस्य नित्यमेव संक्रान्तिदक्षिणायनोत्तरायणादिपुण्यकाललाभात्तत्तत्सिद्धिसमासादनमनायासेन जायते । तदेतदाह

ऐहिकामुष्मिकी सिद्धि-
रधमा मध्यमोत्तमा ।
साधकानामत्रस्थानां भवति ॥

उपसंहरति

अयनद्वयमाख्यातं

अत्र च मकरादिषु द्वादशसु कार्यस्य गर्भत्वं, प्रोद्बुभूषिष्यत्त्वं, प्रोद्बुभूषत्त्वम्, उद्भविष्यत्त्वम्, उद्भवप्रारम्भः, उद्भवत्त्वं, जन्म, सत्ता, परिणतिः, वृद्धिः, ह्रासः, क्षयश्च क्रमाद्भवति । अतोऽत्र जपादिक्रियैतादृगेव फलं सूते,—इति गुरवोऽभ्यधुः ॥

यदा तु प्राणापानयातायातपरिहारेण हृदि द्वादशान्ते च विश्रान्तिः क्रियते, तदा

---

१ ख० पु० यावज्जीवितमिति पाठः ।

मोक्षसिद्धिर्द्वयोज्झिता ॥१२०॥

'द्वयेन' भेदेन 'उज्झिता' अद्वयमयी महासाधकस्य भवतीत्यर्थः ॥ १२० ॥

यतोऽसौ महासाधकः

अयनद्वयपर्यन्त
उन्मन्यन्ते सदा स्थितः ।

यदा यदा अयनद्वयमाश्रयति, तदा तदा 'उन्मन्यन्ते'इति प्राणापानप्रशमपदे द्वादशान्ते हृदि च परतत्त्वानुभवे विश्राम्यति । यद्यपि पूर्वमुन्मन्यन्तता द्वादशान्त एवोक्ता, तथापीहायनद्वयपर्यन्त उन्मन्यन्ते,—इत्यभिदधद्वादशान्ताविभिन्ना हृदि व्याप्तिरस्तीति दर्शयति । अत एव

'द्वादशान्ते च हृदये.....।'

इत्याद्यन्यत्रोक्तम् ॥

अतश्च

तत्रस्थो वै जपध्याना-
न्मोक्षसिद्धिमवाप्नुयात् ॥१२१॥

जपध्यानप्रमुखं यस्तत्र परतत्त्व एव तिष्ठति विश्राम्यति, स मुच्यत इत्यर्थः ॥ १२१ ॥

अत एवेत्थंस्वभावेनैव[1]

मोक्षं गत्वा तु नागच्छे-

त्प्रतिज्ञा भैरवस्य तु ।

प्रतिज्ञा भैरवस्य, नतु श्रीकण्ठोमापत्यादे-रित्यनेन सर्वथा द्वादशान्तहृदययोर्विश्रान्तिः कर्तव्या,—इत्यादिष्टम् ॥

तथा द्वादशवर्षसाध्यमपि कार्यं सुसूक्ष्मतम-स्थित्या प्राण एव द्वादशवत्सरव्याप्तिमवगत्या-प्रयासेनैव साधकः साधयेदिति शिक्षयन्द्वाद-शाब्दोदयमादिशति देवः

अस्मिन्नब्दोदये भूयो

द्वादशाब्दोदयं शृणु ॥१२२॥

तत्र द्वादश चैत्रादयोऽब्दमाससमानस-माख्याः ॥ १२२ ॥

चैत्रसंवत्सरे यस्मा-

न्मासानामुदयो[2] भवेत् ।

तदादि साधकैस्तस्मा-

त्कर्तव्यं मन्त्रसाधनम् ॥१२३॥

---

१ ख० पु० खानुभावेनैवेति पाठः ।

२ ख० पु० मन्त्राणामुदय इति पाठः ।

'तदादि' इति चैत्रनामानं संवत्सरमादिभूतं कृत्वा ॥ १२३ ॥

प्रागुक्तचैत्रादिमासोदयकाल एवात्र चैत्रादिसंवत्सरोदयकालः,—इत्याह

द्वादशाब्दः स विज्ञेय-
श्चैत्रमासाद्वरानने ।

अष्टाङ्गुलात्कण्ठादङ्गुलद्वयं त्यक्त्वा षडङ्गुलं यत्प्राक् चैत्रमासस्योक्तं स्थानं, तदेव चैत्रसंवत्सरस्य ॥

अथ

लक्षणं तस्य वक्ष्यामि
प्राणेऽस्मिन्प्रविभागशः॥१२४॥
तत्र संवत्सरेणैव
अमुनोक्तेन सुव्रते ।
अहोरात्रस्तु यः प्रोक्तो
द्वादशांशं भजेत्प्रिये ॥ १२५॥
द्वादश ते अहोरात्रा
द्वादशाब्दे भवन्ति वै ।

आन्तरेण प्राणसंवत्सरेण य आन्तरोऽहो-रात्रोऽङ्गुलपञ्चमभागपरीमाणस्तस्य द्वादशमंशं द्वादशाब्दोदयेऽहोरात्रो भजते । एवं चाङ्गुलस्य षष्टितमोऽसौ भागो भवति । इत्थमहोरात्रं द्वादशाहोरात्रा भवन्ति । तथाच सत्यङ्गुले षष्टिरहोरात्राणां जातेति ॥

पञ्चभिस्तांस्तु संगुण्य
द्वादशाब्द ऋतुर्भवेत् ॥१२६॥

मासद्वयमित्यर्थः ॥ १२६ ॥

तमेव द्विगुणं कृत्वा
कालस्तु स विधीयते ।

चतुर्मासाख्यः ॥

त्रिगुणेनैतदयने

अङ्गुलत्रयेण त्रिगुणेनर्तुनाद्यमुत्तरायणं, ततोऽन्यत्र त्रये दक्षिणायनम् ॥

तदेवं

वत्सरः षड्गुणेन तु ॥ १२७ ॥

तदित्थं

संक्रान्तयो द्वादशात्र
यद्वदब्दे प्रकीर्तिताः ।
द्वादशाब्दोदये प्राणे
वत्सरास्ते प्रकीर्तिताः ॥१२८॥

यद्वदिति षडङ्गुलकलनया ॥ १२८ ॥

अथ ये

द्वादशाब्दे त्वहोरात्राः

सम्भवन्ति ॥

तेषां सङ्ख्यां निबोध मे ।
सहस्राणि तु चत्वारि
त्रिशती विंशतिस्तथा ॥१२९॥

द्वादशाब्दोदये देवि
प्राणेऽस्मिन्कथिता मया ।

'प्राणे द्वादशाब्दोदये' इति सामानाधिकरण्ये सप्तम्यौ ॥

अथातिसूक्ष्मया व्यवस्थया

षष्ट्यब्दोदयमत्रैव
पुनश्च कथयामि ते ॥ १३० ॥
आनन्दाद्यास्तु ते ज्ञेयाः
षष्ट्यब्दास्तु वरानने ।

'अत्रैव' इत्येकत्र प्राणचारे ॥

तदाह

ते चाध ऊर्ध्वगे प्राणे
एकस्मिन्सुरसुन्दरि ॥ १३१ ॥
चरन्ति प्रविभागेन
तथा ते कथयाम्यहम् ।

अतश्च षष्ट्यब्दसाध्यां सिद्धिं यो वाञ्छति, असावान्तरादानन्दाख्याद्वर्षात्प्रभृति मन्त्राराधनमुपक्रमेत,—इत्याह

आनन्दप्रभृतेर्देवि
मन्त्रमाराधयेत्तु यः ॥ १३२ ॥
तस्यानन्दस्तु देवेशि
मन्त्रेण सह जायते ।

मन्त्रस्य परनिष्कलस्वभावतया अशेषविश्वनिर्भरत्वेन परमानन्दरूपत्वात्तद्भेदविमर्शमयप्राणोच्चारज्ञस्य आनन्दमयतैव भवति । तत्श्चेहाभिहितषष्ट्यब्दोदयस्थित्या सर्वमेव पुरुषायुषं यन्नित्यकर्मावश्यकर्तव्यं, तदेकत्रैव प्राणचारे व्याप्तिज्ञस्य सकृदेव कृतं सर्वदैव कृतं भवति ज्ञानिनः । सिद्धिकामस्य तु षष्टिवर्षसाध्यं, तदीयवत्सरे तत्तत्साध्यं वा कर्म प्राणीयव्याप्तिज्ञानपूर्वकं कुर्वतो न विसंवदतीत्याशयेनेह साधकाधिकारे षष्ट्यब्दोदयादधिकं नोक्तम् । श्रीनन्दिशिखायां तु ज्ञानव्याप्त्यभिप्रायेण विंशत्यधिकशतोदयोऽप्यभिहितः । एवं च ज्ञानयोगिनामेवं प्राणे व्याप्तिज्ञानात्सर्वमयत्वेन सिद्ध्यत्येव । यदुक्तं श्रीमदुत्पलदेवपादैः

"साक्षाद्भवन्मये नाथ सर्वस्मिन्भुवनान्तरे ।
किं न भक्तिमतां क्षेत्रं मन्त्रः कैषां न सिद्ध्यति ॥"

(स्तोत्राव० १।४)

इति ॥

किंच

द्वादशाब्दे त्वहोरात्रं
पञ्चधा भेदयेच्च तम् ॥ १३३ ॥
षष्ट्यब्दे ते त्वहोरात्राः
पञ्चैव परिकीर्तिताः ।

द्वादशाब्दोदयेऽङ्गुलस्य षष्टितमो भागोऽहोरात्रः,—इत्युक्तम् । इदानीं तु तमपि पञ्चधा भेदयेत् । एवं षष्ट्यब्दोदये प्राणाङ्गुलस्य त्रिशततमो भागोऽहोरात्रो भवति ॥

तदनया सुसूक्ष्मया स्थित्या

ते वै षड्गुणितास्तत्र
मास एकः प्रकीर्तितः ॥१३४॥
तैश्च द्वादशभिर्देवि
वर्षमेकं विधीयते ।

'ते' इति द्वादशाब्दोदयेऽहोरात्राः । 'तैः' इति तथाभूतैर्मासैः ॥

एवं च

अङ्गुले तु सपञ्चांशे
मानमेतत्प्रकीर्तितम् ॥ १३५ ॥

अहोरात्रशतत्रयात्मन्यङ्गुले मासदशकम्, अहोरात्रषष्ट्यात्मनि चाङ्गुलपञ्चमांशे मासद्वयम्,—इति कृत्वा सपञ्चांशेऽङ्गुले 'एतत्' इति षष्ट्यब्दोदये वर्षमानमुक्तम् ॥ १३५ ॥

तदित्थं

षडङ्गुलैस्तु पञ्चाब्दाः
षष्ट्यब्द उदयन्ति ते ।

द्वादशाब्दोदयस्थित्या वर्षोदयाश्रयैः षड्भिरङ्गुलैरिह पञ्च वर्षाणि भवन्ति । मासदशकोदयात्मकोऽङ्गुलः,—इति तैः षड्भिः षष्टिमासानां वर्षपञ्चकारम्भिणां निष्पत्तिः ॥

अनया च कलनया

हृत्पद्माद्याव शक्त्यूर्ध्वं
त्रिंशदब्दोदयो भवेत् ॥१३६॥

पुनरपि

शक्त्यधो यावद्धृत्पद्मं
त्रिंशदब्दोदयो भवेत् ।

किंच

षष्ट्यब्दे ये त्वहोरात्राः
सङ्ख्यां तेषु वदाम्यहम् ॥१३७॥
विंशतिस्तु सहस्राणि
सहस्रं षट्शताधिकम् ।
अहोरात्रास्तु षष्ट्यब्दे
सङ्ख्यातास्तु वरानने ॥१३८॥

बाह्याहोरात्रगतप्राणचारसङ्ख्याः ॥ १३८ ॥

उपसंहरति

षष्ट्यब्दोदय आख्यातः
प्राण एकत्र ते मया ।

अत्र षष्ट्यब्दोदयान्ते प्रयोजनमाह

चन्द्रसूर्योपरागे च
पक्षमासायनेषु च ॥ १३९ ॥
युगादिषु युगान्तेषु
यच्च संवत्सरेऽप्यथ ।

वर्षद्वादशके चैव
षष्ट्यब्देऽथ वरानने ॥ १४० ॥
स्नानदानेन यज्ञैश्च
पूजाहोमजपेन च ।
ज्ञानयोगादिभिश्चैव[1]
बाह्ये काले तु यत्कृतम् ॥१४१॥
अमुनोक्ते वरारोहे
तत्फलं लभते महत् ।

'बाह्ये' चन्द्रोपरागादौ षष्ट्यब्दान्ते 'अमुना आन्तरेण प्रकारेण उक्ते तस्मिन्नेव काले स्नानदानादिक्रमेण कृतं 'तत्फलं महत्' अनन्तं साधको लभते ॥ [एवं युगोदयस्थित्या चैत्राषाढाश्वयुजपौषाणां सि····शादीनि चत्वारि साधयति]

प्राणहंसगतिं चारे
ज्ञात्वैकस्मिंस्तु तद्भजेत् ॥१४२॥

---

१ ख० पु० योगतपोभिश्च तथा ग० पु० ध्यानयोगेति पाठः ।

प्राणस्य हंसत्वं प्राग्वत् । 'चारे प्राणापानवाहे षष्ठ्यब्दान्तव्याप्तिके । 'तत्' इति चन्द्रग्रहादिकम् ॥ १४२ ॥

नन्वेवं वस्तुवृत्तेन तद्व्याप्तिवत्त्वं प्राणस्य कथं प्रतिभागोचरतामेतीत्याशङ्क्याह

स्वसंवेद्यो भवेच्चारो
नाडीचारजयात्स्फुटम् ।

नाडिषु 'चारस्य' वाहस्य 'जयात्' अभ्यासेन संचरणस्वातन्त्र्यलाभात् सर्वा प्राणीया व्याप्तिर्मध्यमार्गे व्यक्तीभवति; अतो योगाभ्यासे यत्नः कार्य इति तात्पर्यम् ॥

योगाभ्यासप्रावीण्ये सति

अथवा स जपादेव-
मत्यर्थमुपबृंहितः ॥ १४३ ॥
मन्त्री योगं विजानाति
ज्ञात्वा सर्वज्ञतां व्रजेत् ।

'जपात्' इति पञ्चप्रणवाधिकारोक्तसङ्ख्याकात् 'उपबृंहितो' लब्धोत्कर्षः 'मन्त्री' इति

यथोक्तमन्त्रव्याप्तिज्ञो 'योगं' यथारुचि प्राणसंचारस्वातन्त्र्यं 'सर्वज्ञतां' यथोक्तप्राणीयसर्वव्याप्तिसाक्षात्कर्तृत्वं परमैश्वरतां च। उक्तं हि

'त्रिगुणेन तु जप्येन स्वच्छन्दसदृशो भवेत्।' (६।५४)

इति॥

एतदुपसंहृत्यान्यदवतारयति

पुनरेव प्रवक्ष्यामि
नाडित्रयविभागतः॥ १४४॥
दक्षिणोत्तरसंक्रान्तौ
विषुवच्चारतस्तथा।
यथा चरत्यसौ हंसो
जगत्यस्मिंश्चराचरे॥ १४५॥
अन्तःस्थः कालरूपेण
कलाभिः कलयञ्जगत्।

मध्यमार्गाश्रयेण चारस्थितिरुक्ता। इदानीं दक्षे वामे तदुभयात्मनि च विषुवति यथा हंसो जङ्गमस्थावरात्मनि जगति चरति, जङ्गमेषु चरन्स्थावराण्यपीन्द्रियप्रसरणयुक्त्या

स्पृशति, अत एव 'अन्तःस्थः' इति प्रमातृषु, भूतवर्तमानादिकालरूपेण पदं बध्नञ्जगत्सर्वं क्षणतुटिलवादिरूपाभिः 'कलाभिः कलयन्' जन्मादिविकारषड्करूपतया सृजन्संहरंश्च यथा चरति, तथा प्रवक्ष्यामीति संगतिः। अचरस्यापि च अन्तःसंज्ञस्य दक्षवाममध्यनाडिषु रसयोजनया पुष्पफलपोषान् हंसः करोति,— इति वृक्षायुर्वेदज्ञाः॥

कीदृगसौ चरतीत्याह

नाडित्रयकृताधारो
मार्गत्रयव्यवस्थितः॥ १४६॥
गुणत्रयसमाविष्ट-
स्त्रिधावस्थाव्यवस्थितः।
कारणैः षड्भिराक्रान्तः
शक्तित्रितयसंयुतः॥ १४७॥
इच्छाज्ञानक्रियाविद्धः
सोमसूर्याग्निमध्यगः।

एतत् नाडीत्रयादिक्रमेण व्याचष्टे

दक्षनासापुटे चैव
नाडी वै पिङ्गला स्मृता ॥१४८॥
इडा चैव तु वामेन
सुषुम्ना मध्यतः स्थिता ।

एतन्नाडीत्रयमेव मार्गत्रयमित्याह

दक्षिणे देवमार्गस्तु
पितृमार्गस्तथोत्तरे ॥ १४९ ॥
मध्यमः शिवमार्गस्तु

का तस्य शिवतेत्याह

तत्र गत्वा न जायते ।

'गत्वा' इत्युपलम्भेन विश्रम्य ॥

अत्रैव गुणत्रयमवस्थात्रयं च दर्शयति

दक्षिणे सत्त्वजाग्रत्स्थः
स्वप्नस्थो वामतो रजः ॥१५०॥
मध्ये तमस्तु विज्ञेयं
सुषुप्तावस्थ एव च ।

सत्त्वरूपत्वं ज्ञानप्राधान्यात्, क्रियाशक्तिमयत्वाद्वामे रजः, मध्ये त्विच्छाशक्तिमये भेदोपसंहारमार्गरूपत्वात्तमः, अत एव मध्यम् । अत्रोभयनाडीसमवाहित्वं समानव्याख्या, नतु मध्योर्ध्ववाहित्वं तस्य तुर्यप्रकाशरूपत्वेन सौषुप्ततमोयोगाभावात् ॥

अत्रैव कारणान्याह

ब्रह्मेश्वरश्च दक्षस्थो
वामे विष्णुसदाशिवौ ॥१५१॥
मध्ये रुद्रशिवौ प्रोक्तौ
सर्वातीतः परः शिवः ।

ब्रह्मविष्णुरुद्राणां परव्याख्येश्वरसदाशिवशिवा दक्षवाममध्याधिष्ठातृत्वेन स्थिताः । अत एव जागरादित्रयमयेऽपीश्वराद्यधिष्ठानात्तुर्यव्याप्तिरप्यस्ति,—इति मन्तव्यम् । 'सर्वातीतः' इत्यनेन तु परकारणस्वरूपमुक्तम् ॥

कारणवत्परापरभेदेन शक्तित्रयस्थितिमाह

ज्येष्ठाज्ञाने च दक्षे च
क्रिया वामा तथोत्तरे ॥१५२॥

रौद्री चेच्छा च मध्यस्था

ज्ञानाद्या अपराः, ज्येष्ठाद्यास्तु पराः ॥

कारणानुसारेण परकारणस्वरूपवत्परशक्ति-स्वरूपमप्याह

परा शक्तिः परापरा ।

सर्वमेव परमपरं च व्याप्य स्थितेत्यर्थः ॥

अत्रैव सोमसूर्याग्नीनाह

दक्षिणे तु स्थितः सूर्यो
वामे सोमो विराजते ॥१५३॥
पाके प्रकाशकत्वे च
मध्यस्थश्चैव पावकः ।

'पाके प्रकाशकत्वे च' इति तन्निमित्तं 'पावको'ऽग्निः । सोमसूर्ययोस्तु

'वायति तपति सूर्यः सोमो वर्षति चामृतम्' । (७।१५७) इति कार्यं वक्ष्यति ॥

पाकप्रकाशौ विषयद्वारेण व्याचष्टे

पाचयेत्सर्वपाकं हि
सोमादिगुणसम्भवम् ॥१५४॥

---

१ क० पु० सोनादिगुणेति पाठः ।

प्रकाशयेत्स्वसामर्थ्या-
त्परतत्त्वमनामयम् ।

स्वसामर्थ्यादिति गुणीकृतप्राणादिवृत्तिव-
शोन्मग्नसंवित्स्वभावतया ॥

पूर्वं मध्यमार्गाश्रयदिनोदयानुसारं ग्रहा-
दीनां स्थितिरुक्ता, इदानीं तु दक्षवामतदु-
भयाश्रयेणाप्याह

राशयश्च ग्रहाः सर्वे
ऋक्षयोगादयश्च ये ॥ १५५ ॥
चन्द्रसूर्यपथेनैव
ते चरन्त्यनुपूर्वशः ।
सूर्यसोमौ च ते सर्वे
भुञ्जते क्रमशः प्रिये ॥ १५६ ॥

'ते सर्वे' इति भैरवाष्टकपर्यन्ताः, 'सोम-
सूर्यौ' इति पृथग्वाहे पृथक्, समवाहे तु युगप-
द्भुञ्जतेऽधितिष्ठन्ति ॥ १५६ ॥

इत्थं च

सोमसूर्यात्मकास्ते वै
पथित्रयव्यवस्थिताः ।

दक्षे प्राणसूर्यात्मानो, वामेऽपानसोमात्मकाः, मध्ये तूभयात्मकाः । एतच्च द्वितीयपटले आज्यत्रिपथविभागावसर एव विभक्तम् ॥

सोमसूर्यात्मकत्वे च सति तेऽपि तत्फलप्रदाः,-इत्याह

वायति तपति सूर्यः
सोमो वर्षति चामृतम् ॥ १५७ ॥

सोमसूर्यात्मकं यस्मा-
ज्जगत्स्थावरजङ्गमम् ।

यतः प्रोक्तव्याख्या सूर्यसोमवाहसम्बद्धत्वात्सर्वं जगत्सूर्यसोमात्मकं 'हिममपि दहति, वह्निरपि चाप्याययति स्पर्शनेन' इत्यनेन न्यायेन तत्तत्प्रमातृदेशकालन्यायेन विश्वस्य ह्लादतापकारित्वेनोपलम्भनात्, ततः 'सूर्य' इति दक्षवाहो 'वायति' शोषयति संतापयति च, 'सोम' इति वामवाहस्त्वमृतं वर्षत्याप्याययति । अतः क्रूरसौम्यसिद्धिसाधनपरेण तदौचित्येनैव प्रवर्तनीयमिति परमार्थः ॥

किंच

सौरो दक्षिणमार्गस्तु
उत्तरायणसंज्ञितः ॥ १५८ ॥
वामः सौम्यस्तु यः प्रोक्त-
स्तत्र वै दक्षिणायनम् ।
सोमसूर्यात्म विषुव-
त्पुटद्वयविनिःसृतम् ॥१५९॥

ऊर्ध्वाधोवाहवदत्राप्युत्तरायणादिविभागोऽस्तीत्यर्थः ॥ १५९ ॥

अत्र संक्रान्तिभेदं दर्शयति

उदक्संक्रान्तयः पञ्च
पञ्च वै दक्षिणायने ।
दक्षिणोत्तरयोर्मध्ये
संक्रान्त्या विषुवद्वयम् ॥१६०॥

'अहनि द्वादश प्रोक्ता.....।' (७१६८) इति वक्ष्यमाणस्थित्या बाह्येऽह्नि द्वादश वामदक्षमध्यसंक्रान्तयो नवशतप्राणापानवाहात्मानो भवन्ति ॥ १६० ॥

अत्र फलं दर्शयति

सौरश्च दक्षिणो मार्ग-
स्त्वभिचारप्रसिद्धिदः ।
आप्यायने तथा पुष्टौ
शान्तिके सौम्य उत्तरः॥१६१॥

अथ संक्रान्तिदशके क्रममादिशति

दक्षिणादुत्तरं याति
उत्तराद्दक्षिणं यदा ।
दक्षिणोत्तरसंक्रान्तिः
सा चैवं संविधीयते ॥ १६२॥

बाह्ये दक्षिणविषुवद्दिने वक्ष्यमाणानुसारं प्राक्तरान्तरं दक्षिणविषुवत्कालं समवाहेन स्थित्वा दक्षिणमार्गादुदेत्य उत्तरमार्गं याति, पुनरुत्तराद्दक्षिणं यदा याति तदा सा दक्षिणसंक्रान्तिरुत्तरसंक्रान्तिश्चोच्यते । एवं संविधीयते अनेनैव क्रमेण पुनरुत्तराद्दक्षिणं यातीति संविधीयते निश्चीयते, तेन दक्षिणोत्तरदक्षोत्तरदक्षेषु पञ्च संक्रान्तीर्वहतीत्यर्थः ॥

अथ षष्ठीमुत्तरविषुवत्संक्रान्तिमाह

दक्षिणस्यां यदा नाड्यां
संक्रामेत्तु यदोत्तरम् ।
यावदर्धं तु तत्रस्थं
मध्येनोत्तरतो वहेत् ॥ १६३ ॥
तावत्तद्विषुवत्प्रोक्त-
मुत्तरं तूत्तरायणे ।

दक्षिणनाड्यां पञ्चसंक्रान्त्यात्मिकायां स्थित्वा यदा यदोत्तरं मार्गं संक्रामेत्तदा मध्येनेत्युभाभ्यामुत्तरं विषुवद्भवतीति । उत्तरायण इति दक्षिणवाहात्मकोत्तरायणाश्रयत्वात् । कथमित्याह तत्रेति दक्षिणस्थमर्धं प्राणीयं कृत्वोभाभ्यां पुटाभ्यां वहतीत्यर्थः । यावदुत्तरत इति च यद्व्याख्यातुमवशिष्टं, तस्यायमर्थः—ततोऽनन्तरमुत्तरत उत्तरात्प्रभृति वहेद्यावदुत्तरां पञ्चमीं संक्रान्तिं यावत् । तेनोत्तरदक्षोत्तरदक्षोत्तराः पञ्च संक्रान्तीर्वहेदिति तात्पर्यार्थः । उत्तरेति सौत्रं द्विरावर्तनीयम् । टीकाकारैस्तु दक्षिणोत्तरमि-

त्याद्युत्तरायण इत्यन्तमुत्तरविषुवद्विषयमेव व्याचक्षाणैः संक्रान्तीनां विभागो न दर्शितो, ग्रन्थपौनरुक्त्यं चाश्रितमत्र ॥

अथ दक्षिणविषुवमाह

उत्तराद्दक्षिणायां तु
संक्रामन्स वरानने ॥ १६४ ॥
यावदर्धं वहेत्तत्र
अर्धं दक्षिणतो वहेत् ।
विषुवद्दक्षिणं ताव-
द्दक्षिणायनजं प्रिये ॥ १६५ ॥

पञ्चसंक्रान्तिरूपादुत्तरान्मार्गाद्दक्षिणस्यां नाड्यां संक्रामन्नर्धं प्राणीयं तत्रेत्युत्तरे, अर्धं च दक्षिणे यावद्वहत्युभाभ्यां पुटाभ्यां समं वाहाद्दक्षिणविषुवदेतद्दक्षिणायनकालजातं भवतीत्यर्थः ॥ १६५ ॥

अत्र विषुवद्वये फलमाह

तत्र पूजा जपो होमो
यत्कृतं मुक्तिदं भवेत् ।

तत् ॥

किंच

ध्यानयोगेन दीक्षायां
तत्स्थो वै मोचयेद्गुरुः ॥१६६॥

ध्यानमत्र परतत्त्वविषयम् ॥

तदित्थं

बाह्ये चैव त्वहोरात्रे
अध्यात्मं तु वरानने ।
चतुर्विंशतिसंक्रान्तीः
प्राणहंसस्तु संक्रमेत्[1] ॥ १६७॥

हृदब्जदलाष्टकस्य प्रधाननाडीत्रयस्पर्शादेवमिति व्याप्तिज्ञाः । प्राणहंस इति प्राग्वत् ॥

अत्रायं विभागः

अहनि द्वादश प्रोक्ता
रात्रौ वै द्वादश स्मृताः ।

अत्रापि विषुवत्संक्रान्तीनां विभागमाह

पूर्वाह्णे विषुवत्त्वेकं
मध्याह्ने तु द्वितीयकम् ॥१६८॥

---

१ ख० पु० स व्रजेदिति पाठः ।

तृतीयं चापराह्णे वै
अर्धरात्रे चतुर्थकम् ।
चतुर्धा विषुवत्प्रोक्त-
महोरात्रेण मुक्तिदम् ॥ १६९ ॥

तेन बाह्ये विषुवद्दिने पश्चिमरात्रिशेषघटिका सपादा दिनोदयात् घटिका सपादा,—इत्येकं विषुवत् । ततः पञ्च क्रमेण संक्रान्तयः प्रत्येकमर्धतृतीया घटिका एवेति दिनारम्भात्प्रभृति पादोना एताश्चतुर्दश घटिका भवन्ति । ततो द्वितीयं विषुवदर्धतृतीयघटिकाः, ततोऽपि पञ्च संक्रान्तयस्तथैवेत्येवमियदन्तं पादोना एकान्नत्रिंशन्नालिका भवन्ति । ततोऽपि दिनादवशिष्टात्सपादा घटिका, सपादा च रात्रिप्रारम्भघटिकेति तृतीयं विषुवदित्यनेन क्रमेणार्धरात्रे विषुवच्चतुर्थम् । यथा यथा दिननिशयोर्यो ह्रासो वृद्धिर्वा भवति, तथा संक्रान्तीनामपि स मन्तव्य इति

समुदायार्थः । यदुक्तमस्मद्गुरुभिरशेषागमोपनिषदालोके तन्त्रालोके

"विषुवद्वासरे प्रातः सांशां नालीं स मध्यगः ।
वामेतरोदक्सव्यान्यैर्यावत्संक्रान्तिपञ्चकम् ॥
एवं क्षीणासु पादोनचतुर्दशसु नालिषु ।
मध्याह्ने दक्षविषुवन्नव प्राणशतीर्वहेत् ॥
दक्षोदगन्योदग्दक्षैः पुनः संक्रान्तिपञ्चकम् ।
नवासुशतमेकैकं ततो विषुवदुत्तरम् ॥
पञ्चके पञ्चकेऽतीते संक्रान्तेर्विषुवद्बहिः ।
यद्वत्तथान्तः संक्रान्तिर्नव प्राणशतानि सा ॥
एवं रात्रावपीत्येवं विषुवद्दिवसात्समात् ।
आरभ्याहर्निशावृद्धिह्रासंक्रान्तिगोऽप्यसौ ॥"

(२०४)

इत्यादि कालतत्त्वप्रकाशने षष्ठ आह्निके । यत्तु तत्र मध्याह्ने दक्षविषुवदित्युक्तं, तद्बाह्योत्तरायणविषुवद्दिने प्रातरुत्तरविषुवद्भवतीत्याशयात् । इह तु बाह्यदक्षिणायनविषुवद्दिने प्रातर्दक्षिणविषुवद्भवतीत्याशयादन्यथोक्तम् ॥ १६९ ॥

अथाध्यात्मसंक्रान्तीनां बाह्यकालस्थितिमादिशति

चतुर्विंशतिसंक्रान्त्यः
समधातोः स्वभावतः ।

शतानि नव वै हंस
एकामेकां वहेत्सदा ॥ १७० ॥

समधातोः श्लेष्माद्यनुपहतस्य । अत्र च शुक्लप्रतिपदः प्रभृति दिनत्रयमादौ वामे मार्गे प्रथममर्धतृतीया घटिका हंसो वहति, ततोऽन्यद्दिनत्रयं दक्षिणे, ततोऽप्यन्यद्वामे,—इत्यादिः क्रमः श्रीकालोत्तरादिशास्त्रोक्त उदयज्ञस्यर्थं स्मर्तव्यः । यदुक्तं कालावल्यां

"तत्र तावदयं प्राप्य दर्शप्रतिपदं मरुत् ।
समुदेति विधौ तावदादौ चंद्रदिनत्रयम् ॥
ततः संक्रमते सूर्ये तत्राप्युदयते त्र्यहम् ।
संक्रम्य त्रयमेतस्मात्पुनरेति हिमद्युतौ ॥"

इत्यादि ॥ १७० ॥

उपसंहरति

एतन्मानं समाख्यातं

संक्रान्तीनामिति शेषः ॥

अन्यथाप्रवहनमिष्टेतरसूचकमित्याह

अन्यथा प्रवहेद्यदा ।

इष्टं चैवाप्यनिष्टं च
तदा संसूचयेत्तु सः ॥ १७१ ॥

समधातोरित्येव ॥

यत एवम्

आत्मार्थं वा परार्थं वा
तस्माद्योगी निरूपयेत् ।

'आत्मार्थं निरूपयेत्' आत्मना परीक्षीत । 'परार्थं निरूपयेत् इति परं निरूपणायां परीक्षायां नियुञ्जीत । अत्र निरूपयेदिति द्वौ णिचौ ॥

अथात्र परीक्षाकालमाह

पूर्वोदये तु संप्राप्ते
भास्करस्य वरानने ॥ १७२ ॥
जीवितं मरणं चैव
तदारभ्य विचारयेत् ।

जीवितसंलग्नत्वात्सुखदुःखादिभोगस्य प्रथमं तत्परीक्षैव प्राधान्यादिहोपक्रान्ता । 'भास्करस्य' दक्षिणप्राणस्य 'पूर्वोदये' इति प्रो-

क्तोभयवाहात्मकप्रातस्तनविषुवत्कालानन्तरं यदोदयो भवति, तदा प्रभृति विचारयेत् । अत्र च बाह्योत्तरायणे विषुवद्वासरप्रातस्तनकालात्प्रभृति परीक्षेत,—इति कालावलीकारः । सर्वदैव प्राभातिकप्रोक्तान्तर्विषुवत्कालोत्तरभाविदक्षवाहात्प्रभृति,—इति गुरवः ॥

तत्र

सुसंयतमना योगी
वीरो योगासनस्थितः ॥१७३॥
संस्मरन्नात्मजं प्राणं
सुषुम्नान्तर्गतं प्रिये ।

सुसंयतत्वं मनसो विषयाकलुषितत्वं, 'वीरः' प्राणवाहनिभालनैकाग्रः । 'योगासनं' पद्मासनादि । 'आत्मजं प्राणम्' इति व्याख्यातावरोहक्रमेण चित्स्वरूपादेवोत्थितं सम्यक् स्मरन् दिव्यकरणबन्धक्रमेण पूर्वोक्तानुप्रवेशयुक्त्या परामृशन् ॥

अतश्च

सुप्रशान्तस्तदा तिष्ठे-
त्प्राणैकगतमानसः ॥ १७४ ॥

मध्यप्राणवाहावधानेन प्रत्ययान्तरप्रशमात्सुप्रशान्तः ॥ १७४ ॥

एवं [1]सर्वप्रसरभित्तिभूतनिभालितसुषुम्नामार्गस्य योगिनो यदा

प्राणसंक्रान्तिकालो वै
पिङ्गलैकस्थितो वहेत् ।
प्रवाहे विषुवद्देवि
ज्ञात्वा कालं समादिशेत्॥ १७५॥

ज्ञात्वेत्यतोऽनन्तरं तदेत्यध्याहार्यं, तेनायमर्थः—मध्यपथनिभालनपुरःसरं प्रभातकालमुभयवाहात्मकं निभाल्य, तदनन्तरं पिङ्गले दक्षिणमार्गे एवैकस्मिन् यथोक्तदक्षिणवामक्रमवाहोल्लङ्घनात्स्थितं चिरकालं समवस्थानमुपलक्ष्य तादृशि प्रवाहे 'कालम्' इति स्वस्य परस्य वा मृत्युमादिशेत् ॥ १७५ ॥

एतद्विभजति

एकाब्दं जीवितं ज्ञेय-
महोरात्रेण सुव्रते ।

---

१ ख० पु० सर्वत्रेति पाठः ।

अब्दद्वयं स जीवेत्तु
अहोरात्रद्वयेन तु ॥ १७६ ॥
त्र्यब्दं तु त्रिभिरेवात्र
चतुर्भिश्चतुरब्दकम्।
पञ्चाब्दं पञ्चदिवसैः
षड्भिः षड्वर्षमेव च ॥ १७७ ॥
सप्तभिः सप्त वर्षाणि
जीवेदष्टाष्टभिर्दिनैः।
नवभिर्नववर्षाणि
दशभिर्दश एव च ॥ १७८ ॥
दिनैकादशकेनैव
वर्षैकादशकं प्रिये।
दिनैर्द्वादशभिर्योगी
जीवेद्वर्षाणि द्वादश ॥ १७९ ॥
सप्तयामप्रवाहेण
षण्मासानथ जीवति।

प्रहरान्षड्वहेद्यस्य
मासांस्त्रीन्वै स जीवति ॥१८०॥
पञ्चप्रहरवाहेन
ह्यर्धमासायुरेव सः ।
चतुर्भिः प्रहरैर्देवि
मासमेकं स जीवति ॥ १८१ ॥
प्रहरत्रयवाहेन
मासार्धं चैव जीवति ।
प्रहरद्वयं वहेद्यस्य
दिनान्यष्टौ स जीवति ॥१८२॥
चतुरः प्रहराञ्जीवे-
त्प्रहरं तु वहेद्यदा ।
प्रहरार्धं वहेद्यस्य
स जीवेत्प्रहरद्वयम् ॥ १८३ ॥

अत्र प्रोक्तनवशतप्राणवाहातिरेकेण यदि द्वादशदिवसाद्येकान्तानि दिनानि समधातोः प्राणः पिङ्गलायामेव एकस्यां स्थितो वाममार्गा-

संस्पर्शे वहेत् तत्तावत्संख्यान्येव वर्षाणि जीवितं भवति। सप्तप्रहराद्यर्धप्रहरान्ते तु स्ववाहाभ्यधिके वाहे षट्त्रिंश्यर्धैकमासतदर्धदिनाष्टकचतुर्दिनैकदिनदिनार्धमायुर्भवति। कश्चित्तु नवशतिकाद्वाहादनन्तरं प्राणापानवाहात्मकान्तरदिनस्थित्या दिनविभागं स्वपरपरीक्षार्थं तुटिचतुष्टयात्मकान्तरप्रवहणस्थित्या च प्रहरविभागं स्वपरीक्षार्थमेव व्याकृतवान्, अनुभवबाधं च बाह्यदिनादिवाहे प्रोक्तवान्। सप्तप्रहरादिवाहं तु बाह्यमभ्युपेत्योपेक्ष्यमेतद्यतो यदि बाह्यानि द्वादशापि दिनान्यायातमृत्योः प्राणो वहति, तत्कोऽत्रानुभवबाधः। न तथोपलम्भोऽस्तीत्यनायातमृत्युना अनवधानेन चैतद्वक्तुं शक्यम्। इतरस्य तु तथाचोपलम्भो भवत्येव। तुटिचतुष्टयात्मकप्रहरस्थित्या च सप्तादिप्रहरवाहोऽत्यन्तासंबद्ध एव, नहि कस्यचिदपि जातुचित्प्राणापानवाहः स्वाभाविकीं द्वासप्तत्यङ्गुलतामुत्सृज्य वहति, चतुष्प्रहरवाहे च षट्त्रिंशदङ्गुलान्ते अपानस्याप्र-

वेशे तदैव मरणप्रसङ्गः । किंच तथाविधांशांशिकावाहो योगिना महता प्रयत्नेन साधितस्तत्तत्सिद्धिप्रदः,-इत्यमावस्याप्रयत्नेन घटितः सिद्धिप्रद एव भवेन्नतु जीवितावसानसूचकः। 'पिङ्गलैकस्थितः' इति चात्राश्लिष्टम् । यदि तु योगिभिरत्र पक्षे वाग्भरो दीयते तन्नेयार्थमप्येतत्साध्वेव नास्माकं ग्रहः कश्चित्, तदपि तु दिनवाहः स्वपरीक्षार्थः, यामवाहस्तु स्वपरपरीक्षार्थः,-इत्यत्र न वचनं किंचिदस्ति; प्रहरादिवाहव्यवस्था च बाह्याप्यभ्युपगम्यते,-इति स्फुटमिदं स्वमनीषामात्रकल्पितम्—इत्यलं पूर्वैः सह निर्बन्धेन । विपर्यस्तस्त्वागमार्थावबोधोऽनुष्ठानविपर्यासहेतुर्माभूदित्याशयेनैतदुक्तम् ॥ १८३ ॥

किंच

सद्यो मृत्युर्भवेत्तस्य
यस्य हंसस्त्रिमार्गगः ।

'सद्यः' इति तस्मिन्नेवार्धप्रहरे। त्रयो मार्गाः नासारन्ध्रे मुखं च ॥

अब्दादिजीवितं च तत्परीक्षाकालात्प्रभृति गणयेदित्याह

यदारभ्य निरूप्येत
प्राणे वै कालमीश्वरम् ॥१८४॥
मासः पक्षो दिनं वर्षं
तदहः प्रभृति प्रिये ।
संलक्ष्यैवं प्रयत्नेन
तत्काले निश्चयो भवेत् ॥१८५॥

यतो बाह्यात्कालादारभ्य सकलकालव्यवस्थोत्थापकत्वात्कालं, प्रभविष्णुतया विश्वस्याक्रमणाच्चेश्वरं, प्राणे प्रकृष्टेन निभालनात्मना यत्नेनैवमुक्तयुक्तया निरूपयेत् परीक्षेत, ततः प्रभृति मासपक्षदिनवर्षादि सम्यग्लक्षयित्वा तत्काले निश्चयो भवेदर्थाज्जीवितस्येति संबन्धः॥

उपसंहरति

उत्तरायणजे काले
एवं ते कथितं मया ।

उत्तरायणमत्र दक्षिणनासापुटवाहः, तस्य संहारप्रधानत्वात् ॥

प्रसङ्गात्प्रकारान्तरं मृत्युज्ञानार्थं प्रतिजानीते

अयुक्तस्यापि च प्राणे
मृत्युज्ञानं निबोध मे ॥ १८६ ॥

तदाह

कर्णरन्ध्रकृताङ्गुष्ठो
घोषं न शृणुते यदा ।
मरणं तस्य देवेशि
षण्मासेन विनिर्दिशेत् ॥१८७॥

घोषं द्रुतसरिच्छब्दानुकारं न शृणोति । तदन्तःस्थं चीरवागाख्यप्राणिकार्यचिञ्चिनीतुल्यं शब्दं शृणोत्येव ॥ १८७ ॥

यदा तु तमपि

घोषमध्ये परं शब्दं
चीरवाकिचञ्चिनीरवम् ।
माससमेकं स जीवेत्तु
न शृणोति यदा प्रिये ॥१८८॥

कर्णरन्ध्रकृताङ्गुष्ठ इत्यनुवर्तते ॥ १८८ ॥

प्रसङ्गादन्यदप्याह

उत्पाटं चैव काणं च
मृत्युयोगं च मे शृणु ।

तत्र

संक्रान्तिपञ्चकं प्राणो
मुखरन्ध्रे वहेद्यदा ॥१८९॥
तमुत्पाटं वदेद्योगं

प्राणस्य स्वस्थानान्नासापथादुत्पाटनादयमुत्पाटः ॥ १८९ ॥

यदाह

स्थानात्स्थानान्तरं व्रजेत् ।

अतश्चेदृगरिष्टलक्षणयुक्तोऽपि स्थानात्स्थानान्तरमुद्भ्रान्तपत्रिवद्भ्रमति,—इत्यप्यत्रार्थः ॥

किंच ईदृशोत्पाटवतः

वित्तनाशस्तथोद्वेगो
रोगवृद्धिश्च जायते ॥ १९० ॥

---

१ क० ख० पु० पत्रेवदिति पाठः ।

सुहृद्गृहविनाशश्च
तेजोहानिश्च जायते।

काणमाह

दक्षिणे पुट एकस्मि-
न्दक्षिणायनवर्जिते ॥ १९१ ॥
संक्रान्त्यष्टकवाहेन
काणयोगो भवेद्धि सः।

दक्षिणायनेन वामपुटवाहेन वर्जिते मध्ये तद्रहिते। एवं चाभिदधत् यत्

'.....त्रिंशत्प्राणक्षयोदया।' (२०२)

इति मृत्युयोगे संक्रान्तिस्वरूपं वक्ष्यति, तदिहापि संबन्ध्यमिति सूचयति, दक्षिणायने प्राप्त्यभावाद्वर्जनानुपपत्तेः। अतश्च वामवाहनिमीलनेन दक्षिणैकवाहात्काण इव काणः ॥

अतश्च

भगन्धरोऽनुग्रन्थश्च
नेत्ररोगश्च कामला ॥ १९२ ॥

शूलं विस्फोटिका दुःख-
मुरोदोषा भवन्ति च।

'भगन्धरः' पायुरोगः। 'अनुग्रन्थः' सशूलोऽतीसारः। 'नेत्ररोगः' तिमिरामयः। 'विस्फोटिका' पिटिका। 'उरोदोषाः' उरःक्षताद्याः॥

वामकाणमुक्त्वा दक्षिणकाणमाह

वामनासापुटेनैव
संक्रान्तीश्च त्रयोदश ॥१९३॥

यदि प्राणो वहेत् तदा दक्षिणवाहनिमीलनादयमपि काणः॥ १९३॥

तस्मात्

ज्वरः शिरोऽर्तिः शूलं च
अर्शांसि स्तम्भ एव च।
मूत्रकृच्छ्रं प्रमेहश्च
पाण्डुरोगश्च जायते॥ १९४॥

'प्रमेहः' शुक्रादिप्रस्रावः॥ १९४॥

तदित्थं प्राणः

इडास्थः श्लेष्मणा व्याधिं
प्रकोपयति सुव्रते ।

व्याधिमिति ज्वरादिपाण्डुरोगान्तम् ॥
अस्य व्याधेर्जातस्योदयकालं निरूपयति

यस्मिंश्चारे निरूप्येत
तत्कालदिवसे परे ॥ १९५ ॥

व्याधिभिः पीड्यते सर्वै-
र्वामवामेतरेतरे ।

वामे तदितरस्मिन्दक्षिणे च काणयोगः, इतरत्र च मुखे उत्पाटो यत्र वाहकाले दृश्यते, ततः परत्र दिवसे तत्काल एव प्रोक्त-व्याधिभिः पीड्यत इत्यर्थः ॥ १९५ ॥

एवमुत्पाटकाणौ द्वौ निर्णीय, मृत्युयोगम-व्याकृत्य प्रसङ्गान्नासापुटभागस्पर्शं शुभादि-सूचकं निरूपयति

अथान्यत्स्पर्शविज्ञानं
नासाधस्तात्तथोपरि ॥ १९६ ॥

वक्ष्यामीति शेषः ॥ १९६ ॥

तत्र

ऊर्ध्वेन स्पृशतश्चोर्ध्वं
रुग्दोषाः प्राक्प्रचोदिताः ।

स्युरिति शेषः । 'ऊर्ध्वेन' इति ऊर्ध्ववाहिना प्राणेन । 'ऊर्ध्वम्' इति नासायाः । अत्र च दक्षिणेनोत्तरस्थं संबध्यते ॥

ऊर्ध्वेनोक्त्वा अध आह

वाचाक्रोशाभिभवनं
दक्षिणेन वहेद्यदा ॥ १९७ ॥

दक्षिणेन स्पृशेदिति पाठे पूर्वेण सह एकवाक्यतया व्याख्येयम् ॥ १९७ ॥

किंच

मध्ये मध्यपुटस्पर्शी
पराभिभवतां व्रजेत् ।

'मध्ये' इति सर्वपार्श्वस्पर्शवर्जं 'मध्यपुटो' मध्यवंशस्तत्स्पर्शी च ॥

किंच

इतश्चेतश्च बहुधा
संक्रान्त्येका वहेद्यदा ॥१९८॥
पूजनं बहुसंमानं
लाभस्तस्य भवेत्तदा ।

संक्रान्तिगतानि नव प्राणशतानि 'इतश्चेतश्च' इति वामदक्षिणवाहयोर्यदि पर्यायेण बहुशो वहेत् प्राणस्तदा पूजादिकं भवति । यत्तु कश्चिद्यदा इत्यत्र तदेति पठित्वा पूर्वेण पराभिभवेन फलेन श्लोकार्धं योजितवान्, पूजनं बह्वित्यर्धं चोत्तरश्लोकेन, तदसारत्वादुपेक्ष्यम् ॥ १९८ ॥

किंच

मन्दचारे सुषुम्नायां
प्राणहंसो वहेद्यदा ॥ १९९ ॥
मूलाभो धर्म ऐश्वर्यं
भवेच्चात्र प्रियागमः ।

'सुषुम्नायाम्' इति मध्यमार्गे स्वरसत एव यदा वहेदिति व्याकर्तव्यम्, नतु यथा बृहट्टीकाकारेण व्याकृतं नासापुटमध्य इति ॥

एवं प्रासङ्गिकमुक्त्वावशिष्टं मृत्युयोगं निर्णेतुमाह

द्वादशैव तु संक्रान्ती-
र्वहेद्विषुवतैकतः ॥ २०० ॥
तदैकवत्सरेणैव
मरणं तु समादिशेत् ।
ह्रसेत्संक्रान्तिरेकैका
मास एको ह्रसेत्तदा ॥ २०१ ॥

विषुवतेति 'उद्वतो निवतः' इति प्रयोगदर्शनादर्हार्थवत्यन्तस्यानव्ययत्वात्तृतीया । तेन वामदक्षिणयोर्युगपदवस्थित्या यदि द्वादश संक्रान्तीः समनन्तरवक्ष्यमाणत्रिंशत्प्राणचारात्मकैकसंक्रान्तिकलनया षष्ट्यधिकत्रिशतिकवाहात्मिका नवशतिकं स्वाभाविकं वाहमपास्य 'ए-

---

१ ख० पु० वामपुटेति पाठः ।

कतः' इत्येकप्रघट्टकेन वहेत्, तदा मासेन मरणं सूचयति। एकैका तु संक्रान्तिर्यदि 'हसेत्' इत्येकादशदशादिसंक्रान्तीर्यदा वहेत् तदा तावद्भिर्मासैर्मरणं, यावत्स्वाभाविकनवशतिकविषुवद्वाहोल्लङ्घने यद्येकां त्रिंशत्प्राणचारात्मिकां संक्रान्तिं वहेत् तदा मासेन मरणं निश्चेयम्। पूर्वं 'शतानि नव वै हंस एकामेकां वहेत् सदा।' (७।१७०) इति यत् संक्रान्तेर्मानमुक्तं, तदेवोत्पाट-काण-योगसंक्रान्तीनां 'दक्षिणायनवर्जिते' इत्यभिधानादिति निर्णीतम् ॥ २०१ ॥

मृत्युयोगे त्वन्यथेत्याह

संक्रान्त्येका वरारोहे
त्रिंशत्प्राणक्षयोदया ।

प्राणापानवाहस्य अहोरात्रत्वेन उक्तत्वात् तत्त्रिंशता इह संक्रान्तिर्मन्तव्या,-इत्यर्थः ॥

इत्थमीदृश्येकैव संक्रान्तिर्यदि स्वाभाविकं विषुवद्वाहमपास्य, तत्स्थाने

दिने दिने वहेद्वाह्ये
यावत्त्रिंशद्दिनानि तु ॥ २०२ ॥

तदा

मासान्ते तु भवेन्मृत्युः
सद्य एव वरानने।

तदित्थं

मृत्युयोगः समाख्यातो
मया ते वरवर्णिनि ॥२०३

अत्रापि पूर्ववत्परीक्षाकालात्प्रभृति शुभसूचककालगणना कार्येत्याह

अब्दं मासं तथा
तिथिं च

यत्कालात्तु
तत्कालं तु ...॥२०४॥

यत्कालादभ्यसेद्यदा परीक्षितुमुपक्रमेत, ततः कालादारभ्य वर्षमासादि मरणादिसूचकं क्रमेण स्वात्मनः परस्य वा कथयेदित्यर्थः ॥२०४॥

तदीदृशमेवंविधशुभाशुभसूचकं

इडासुषुम्नामार्गेण
प्राणचारं विदुर्बुधाः।

सावधाना एव योगिनो जानीयुः, न त्वन्य इत्यर्थः । इडासुषुम्ने पिङ्गलां विषुवं चोपलक्षयतः ॥

उपसंहरति

दक्षिणायनजे काले
एवं ते कथितं शुभम् ॥२०५॥

[illegible]णायनजः कालो' वामपुटवाहः । एव[illegible]लक्षणपरमेव ॥ २०५ ॥

[illegible]त्प्रस्तावयति

[illegible]व च ।

ज्ञात्वा य[illegible]॥ जयेन्मृत्यु-
मशुभान्यप्यशेषतः ॥ २०६ ॥

स्वस्य परस्य वा ॥ २०६ ॥

कथमित्याह

ध्यात्वा कालेशस्वच्छन्दं
हंसं वा सकलेश्वरम् ।

कालस्य स्थूलसूक्ष्मादिभेदवतो बाह्यान्तरादिरूपस्य सर्वस्येशं यथारुचि निर्भासकं, हंसं व्याख्यातपरनिष्कलस्वरूपं श्रीस्वच्छन्दं सकलस्य जगतः ईश्वरं ध्यात्वा अनुप्रवेशयुक्त्या स्फुटीकृत्य योगी मृत्युं जयेदिति पूर्वेण संगतिः॥

कुत्रस्थोऽसौ कीदृग्ध्येय इत्याह

नासिकारन्ध्रमार्गस्थः
स सृजेत्संहरेज्जगत् ॥ ८

तत्रस्थः कलयेत्सर्वं
सर्वभूतेष्ववि

यः सर्वभूतेष

'नादाख्यं यत्परं बीज

इति तत्रान्तरोक्तस्थित्या तः, नसते कौटिल्येन गच्छतीति 'नासिका' मध्यशक्तिः, तद्रन्ध्रमार्गे सौषुम्ने धाम्नि स्थितो यथोक्तावरोहक्रमेण प्राणरूपतां श्रित्वा नासायां रन्ध्रमार्गेषु च चक्षुरादिसुषिरभूमिषु स्थितः, स उन्मेषनिमेषयुक्त्या बाह्यान्तररूपं जगत्

सृजेत् संहरेच्च । यतस्तत्रस्थः सन् सर्वं 'कलयेत्' अन्तरवस्थितं बहिः क्षिपेत्, बहिराभासितं चान्तः क्षिपेत्, अथच 'कलयेत्' गणयेत् वैचित्र्येण स्थापयेत् जानीयात् परामृशेच्च; कलतेः क्षेपसंख्यानगतिशब्दार्थत्वात् ॥

तेनेदृशं स्वच्छन्दनाथं कालेश्वरं

तत्स्थं ध्यात्वा जयेन्मृत्युं

[illegible]गान्नः प्रभृति अशेषरन्ध्रव्याप्त्यावस्थितं
[illegible]र्शसारमकालकलितं 'ध्यात्वा'
[illegible] प्रत्यभिज्ञाय तदवष्टम्भे-
न। [illegible]व

य

. कलेत्प्रभुः ॥२०८॥

अकाले कालातीतपरमेश्वरात्मनि यस्तिष्ठति तदभेदेन स्फुरति तं, 'प्रभुः' परमेश्वरो न कलयेत्, स्वात्मनि क्रियावरोधात् ॥ २०८ ॥

यदि चात्रैव पदे योगीन्द्रः सततावहितो भवति, तदास्य

ध्यानयुक्तस्य षण्मासा-
त्सर्वज्ञत्वं प्रवर्तते ।
कालत्रयं विजानाति
कालयुक्तस्तु योगवित् ॥२०९॥

परस्वच्छन्दस्वरूपसमावेशरसेन धीसन्तानोत्तेजनात् षाण्मासिकात् सर्वं कालाग्न्यादिशिवान्तं जानाति, यदा तु तत्समावेशरसाच्छुरित एव काले प्राणचारे युक्तोऽवहितो भवति, तदातीतवर्तमानानागतं सर्वं जानाति योगिवरः ॥ २०९ ॥

किंच

कालहंसं स तु जप-
न्ध्यायन्वापि महेश्वरि
स भवेत्कालरूपी वै
स्वच्छन्दः काल
हतमृत्युर्जरां त्य
रोगैः सर्व
पूर्वनिर्णीतो य

हंसः, स एव निर्णीतहानसमादानधर्मतया विश्वं कलयन् कालहंस इतीह उक्तः । तं जपन्ध्यायन्वेति पञ्चप्रणवाधिकारयोजनिका-ग्रन्थोक्तव्याप्तिचिन्तनया भूयोभूयस्तद्विश्रान्तिपरत्वेन चतुष्कलभट्टारकमन्त्रोच्चारावर्तनेन जपन् कालरूपीत्यशेषविश्वकलनात्मकं कालरूपं प्रशस्तं विद्यते यस्य श्रीस्वच्छन्दभट्टारक एवासौ स्यात् । तद्वदेव च 'विचरेत्' सर्वदैव पञ्चविधकृत्यकारितया प्रसरेत् । रोगैर्हेतुभिः कृतं यद्भयं, तेनोज्झितः ॥

किंचास्य

विज्ञानं श्रवणं दूरा-
न्मननं चावलोकनम् ॥ २११ ॥
[illegible]णावाप्ति-
[illegible]लजयात्सदा ।

[illegible]ोज्यम् । विज्ञानं बुद्धेर्म-
अवलोकनं चक्षुषः ।
[illegible]यापारोपलक्षणपरम् ।

तदेवं सर्वरन्ध्रव्यापकदेशकालातीतस्वच्छन्द-भैरवात्मकहंसस्वरूपात्मताव्याप्तौ शरीरेन्द्रियादिभूम्युत्तरणात् पुनश्च परतत्त्वरसेन तदास्फुरणाज्जरामृत्युरोगमितविषयज्ञानानैश्वर्याद्यभावोऽर्थसिद्ध एव इत्युक्तम् ॥

इदानीं दक्षिणवाममध्यवाहेषु क्रमेण हंसध्याने तदुचितं मृत्युजयमादिशति

दक्षनासापुटे ध्यात्वा
ब्राह्मैश्वर्यमवाप्नुयात् ॥ २१२ ॥
तदायुस्तत्समं वीर्यं
भूतकालं च वेत्त्यतः ।
भविष्यज्ज्ञो भवेद्वामे
विष्णुतुल्यबलश्च
तत्समं चैतदैश्वर्यं
तदायुर्योगिरा
भूतं भव्यं भवि
सर्वं जान

नित्यं वै ध्यानयोगेन
रुद्रस्य समतां व्रजेत् ।
आयुषा बलवीर्येण
रूपैश्वर्येण तत्समः ॥ २१५ ॥
ब्रह्मणः परभावेन
ऐश्वरं पदमाप्नुयात् ।
विष्णोः सदाशिवैश्वर्यं
परभावादवाप्नुयात् ॥ २१६ ॥
रुद्रस्य यः परो भावो
ध्यात्वा तं तु शिवो भवेत् ।

इह

'रौ च दक्षस्थौ वामे विष्णुसदाशिवौ ।
शिवौ प्रोक्तौ.....॥'(७।१५१)

त्रय एव षड्धारणावस्थितिः
क्ता । तेन दक्षवामनाडिषु
रुद्ररूपमपरया व्याख्या
दा तद्बलवीर्यैश्वर्ययोगी

भवति, अतीतभाविवर्तमानरूपत्रैकालिकं विश्वं जानाति । अत्र च ब्रह्मादीननया व्याख्या ईश्वरसदाशिवशिवरूपान् ध्यात्वा, तद्रूपतां लभते ॥

उपसंहरति

एवं मृत्युजयः ख्यातः

अथ

अमृतं ध्यायतो जयः ॥२१७॥

मृत्योरेवेति शेषः ॥ २१७ ॥

कथमित्याह

नाडिभिन्नालरन्ध्रस्थं
हृत्पद्मं षोडशच्छदम् ।
ध्यात्वा सितं सुविकचं
कलाषोडशकान्वितम् ॥२१८॥
संपूर्णावयवं चन्द्रं
कर्णिकाकारविग्रहम् ।
तन्मध्ये चिन्त्यमात्मानं
शुद्धस्फटिकनिर्मलम् ॥२१९॥

क्षीरामृतार्णवावस्थ-
कल्लोलामृतपूरितम् ।
उपरिष्टाद्द्वितीयाब्जं
शाक्तामृतमहोदधौ ॥ २२० ॥
तच्चाधो मुखपद्मं तु
परिपूर्णेन्दुकर्णिकम् ।
तन्मध्ये चिन्तयेद्धंस-
मधो बिन्दुशिखान्वितम्॥२२१
वर्षन्तममृतं दिव्यं
समन्तात्संविचिन्तयेत् ।
आत्मोर्ध्वरन्ध्रमार्गेण
प्रविष्टं तच्च चिन्तयेत् ॥२२२॥
सितं सुबहुलं सान्द्र-
ममृतं मृत्युनाशनम् ।
तेनाप्लावितमात्मानं
पूर्यमाणं विचिन्तयेत् ॥२२३॥

पद्मनालनिबद्धैश्च
नाडीरन्ध्रमुखैः सदा ।
अमृतापूरितं देहं
सर्वमेव विचिन्तयेत् ॥ २२४ ॥

एवं वै नित्ययुक्तात्मा
अमृतेशसमो भवेत् ।
व्याधीन्मृत्युं जरां त्यक्त्वा
क्रीडते त्वणिमादिभिः ॥२२५॥

एवं तस्यामृतध्याना-
त्कालमृत्युजयो भवेत् ।

हृद्वादशान्तोर्ध्वाधःस्थितं श्रीपूर्वाद्युक्तामृता-दिदेवतावाच्यकारादिवर्णषोडशककलितताव-त्पत्रविकसितसितकमलमध्यस्थमधःकमलक-र्णिकापूर्णेन्दुबिम्बनिष्ठमूर्ध्वाब्जकर्णिकापूर्णेन्दु-मध्यस्थाधोमुखसितचतुष्कलबिन्दुप्रकाशप्रस-रत्सुधासारपूरितब्रह्मरन्ध्रविसृतकल्लोलप्लावित-ममृतराशिमध्यगमात्मानं स्फटिकप्रभं वि-

चिन्त्य, तदमृतं तदधःस्थसिताब्जनालरन्ध्र-नानानाडीमुखैरुच्छलत्समस्तदेहव्यापकं यः षण्मासान् सततं चिन्तयति, स गतव्याधि-रजरामरणोऽणिमादिसिद्धिभागमृतेशभैरवतु-ल्यो भवतीति पिण्डार्थः । नाडिरूपतया भि-द्यन्ते नानारूपत्वेन स्फुरन्ति यानि नालर-न्ध्राणि अर्थादधोऽब्जगतानि तत्स्थमिति, तै-र्ग्रन्थिस्थानगतैः संबद्धं, नालमत्र मध्यनाडी-रूपं, क्षीरं क्षीरोदाद्यदुद्भूतममृतं तद्रूपोऽर्णव इति संगतिः । अमृतं चात्र परशक्त्यानन्द-सारम् ॥

एवं सर्वनाडीमार्गत्रयाश्रयहंसध्यानादमृत-ध्यानाच्च मृत्युजयमभिधाय, तात्त्विकमनुत्तर-साररूपमादेष्टुमुपक्रमते

अथवा परतत्त्वस्थः
सर्वकालैर्न बाध्यते ॥ २२६ ॥

अथवेत्यनेनेदं ध्वनति—कतिपयकालशरीर-स्थैर्यादिमृत्युजयप्रकारेभ्योऽयमन्य एवातिवि-रस[ल]महायोगीन्द्रहृदयङ्गमस्तत्प्रकारो, यत्र

देहावस्थित एव श्रीस्वच्छन्दभैरवतां सर्वदैव समाविशति कोऽपि पश्चिमजन्मा जन इति २२६

तत्र यादृक्परं तत्त्वं, यथा च तन्मयीभावस्तदादेष्टुमाह

चिन्तयेत्परमं तत्त्वं
कालचारविवर्जितम् ।
कलाकलङ्कनिर्मुक्तं
निष्कलं परमं पदम् ॥ २२७ ॥

चिन्तयेत्स्वाभेदेन विमृशेत् परं तत्त्वं हृद्वादशान्तस्फुरितं चिदानन्दघनात्मकं, 'कालचारेण' बाह्येनान्तरेण च वर्जितं, 'कलाकलङ्केन' कल्पनामलेन शून्यम्, अत एव चतुष्कलवदकारादिकलायोगाभावात् निष्कलं, परमं पदमनुत्तरं धाम ॥ २२७ ॥

न केवलं परमं धामेदृग्यावत्
निष्कलं चात्मतत्त्वं तु

'आत्मतत्त्वं' समनोपरि शुद्धात्म 'निष्कलं' त्यक्तसमनान्तभेदकलनम् ॥

यतः

कलङ्को देह उच्यते ।
संयुक्तः कारणैः षड्भिः
सर्वतत्त्वसमन्वितः ॥ २२८ ॥
वर्णो बिन्दुस्तथा नादो
व्यापिनीशक्तिसंयुतः ।
समनावधिपर्यन्तः
कलङ्काधार उच्यते ॥ २२९ ॥

एतदुक्तं भवति—यथायं स्थूलस्तत्त्वादिरूपो देहः कलङ्कः, तथा करणाश्रयः प्राणात्मा सूक्ष्मः, समनान्तमातृप्रमेयरूपः परोऽपि देहः कलङ्क एव । परभैरवरूपो हि परव्याख्याय-मात्मनि । यथा स्थूलदृष्ट्या देहप्राणादिरस्य कलङ्कस्तथा परदृष्ट्या समनान्ता प्रमेयमाला कलङ्क एव । वर्णः अकार उकारो मकारश्च । कलङ्करूपश्चासावाधार इति समासः । कलङ्कत्वं चास्य सर्वस्य परशिवाभेदाप्रथनात् ॥ २२९ ॥

यस्य चायमाधारः, सः

आधेयः परमो ह्यात्मा

यः पूर्वं शुद्धविज्ञानकेवलो भेदवादिनां मोक्षभूरित्युक्तः ॥

अथ

तत्पराप्युन्मना स्मृता ।
तस्याश्चान्ते परं तत्त्वं
सकलाकलवर्जितम् ॥ २३० ॥

व्यापकं सर्वतोभद्रं
सर्वान्तः सर्वतोमुखम् ।
पञ्चपञ्चकतत्त्वस्थ-
मष्टादशगुणान्वितम् ॥२३१॥

'सकलः' समनान्तः स्फारः 'अकलः' शुद्धात्मा, ताभ्यां वर्जितं तयोः परस्परावच्छेदेन संकुचितत्वात्; तत्तु व्यापकं दिक्कालासंकुचितं, सर्वतश्च भद्रं चिदानन्दघनं, सर्वस्य चान्तः जीवितभूतत्वेन स्थितं, पूर्वापरमध्य-

कोटिमध्यगतं च, सर्वतः सर्वेण मुखमिव मुखं स्वात्मप्रत्यभिज्ञोपायरूपम् । पञ्चपञ्चकानि तत्त्वानि तथाष्टादश गुणांश्च स्वयमेव व्याख्यास्यति । पञ्चपञ्चकेषु च तत्त्वेषु च स्थितं तदभिन्नमूर्तिं गुणेषु चान्वितं अनुगततया स्थितम् ॥ २३१ ॥

तदित्थंभूतमेतत्

यद्यस्मिंस्तु परं वेत्ति
तदा मुच्येत बन्धनात् ।

'कलङ्को देह उच्यते' (७।२२८) इत्युपक्रान्तत्वादस्मिन्देहप्राणादावेव अवस्थितो यद्युक्तरूपं परं तत्त्वं वेत्ति, तदा बन्धनान्मुच्यत एव; जीवन्नेव स्वानुभवेन परभैरवतामाविशतीत्यर्थः ॥

अथ पञ्चपञ्चकं दर्शयति

कारणानि च मन्त्राश्च
निवृत्त्याद्याः कलास्तथा ॥२३२
बिन्दुश्चैवार्धचन्द्रश्च
निरोधी नाद ऊर्ध्वगः ।

शक्तिश्च व्यापिनी चैव
समनात्मा तथोन्मना ॥ २३३ ॥
पञ्चपञ्चकमेतद्धि
कथितं ते वरानने ।

'कारणानि' ब्रह्मादीनि षट् । 'मन्त्राः' इति अकारोकारमकारा ब्रह्मविष्णुरुद्रवाचकास्त्रयः । बिन्दुनादशक्तीनामीशसदाशिवशिववाचिकानां सर्वमन्त्रसाधारणबिन्द्वाद्युन्मनान्तप्रमेयदशकमध्ये कथनात्, अतो मन्त्रशब्देन साधारणप्रमेयदशकावशिष्टा असाधारणास्त्रय एव उक्ताः । तथा वक्त्राङ्गमन्त्रैकादशिकावर्गश्चतुर्थ इत्येते दश, ब्रह्मादिकारणाधिष्ठिताश्च निवृत्त्याद्याः कलाः पञ्च प्राग्व्याकृताः, तत्त्वं च बिन्द्वादिप्रमेयदशकमित्येतत्पञ्चपञ्चकम् ॥

तत्त्वान्याह

तत्त्वान्येव तु षट्त्रिंशत्
पृथिव्यादीनि षट्त्रिंशत्पूर्वमेवोक्तानि ।

अत्र सर्वत्र परतत्त्वमभेदेन स्थितमिति पूर्वेण संबन्धः ॥

अथ

गुणांश्चैव निबोध मे ॥ २३४ ॥

'गुणाः' परभैरवस्य गृहीतमायाप्रमातृभूमिकस्य परापरदशौचित्येनावस्थिता धर्माः शक्तयः ॥ २३४ ॥

तानाह

अहंकारो धीर्मनश्च
इन्द्रियार्थास्तथैव च ।
ग्रहणं स्पर्श आधारः
शक्तिश्चैवाष्टमी स्मृता ॥२३५॥
एते चाष्टौ गुणाः

अन्तःकरणत्रयमिन्द्रियार्थसहितोऽर्थवर्गश्चतुर्थः, ग्रहणं च तद्विषयज्ञानं, स्पर्श आन्तरसुखाद्युपलम्भः, आधारः शरीरं, शक्तिर्ज्ञानक्रियात्मा प्रयत्नश्चेत्यष्टावपररूपस्यात्मनो धर्माः शक्तयः । यतो यत्किंचित्प्रकाशते विषयशरी-

रादि,तत्प्रकाशरूपाच्चेतनादभिन्नम्,अन्यथास्य प्रकाशनायोगादित्यस्य धर्मरूपमेव सर्वम् ॥

अस्यैव परां व्याप्तिमाविष्टस्य

अष्टौ

भैरवा भैरवाष्टकम् ।

ये पूर्वं कपालीशादयोऽष्टौ भैरवा उक्तास्तदात्मानः परव्याप्त्या भैरवस्य सतोऽष्टकं गुणानामित्यर्थः ॥

किंचास्य

प्राणहंसस्तथा शक्तिः

अपरपरावस्थायाः क्रमेण धर्माः । यथा हि परमेश्वरः स्वस्वातन्त्र्यात् गृहीतात्मभूमिकस्तथा तदीयस्वातन्त्र्यात्मापि शक्तिः संकुचिततया भान्ती प्राणः,—इत्युक्तप्रायम् ॥

तदित्थं

गुणा अष्टादश त्विमे ॥२३६॥

अतश्च

एतेषु तत्परं तत्त्व-

मुच्चारालम्बनादृते ।

'उच्चारः' करणबन्धादिपूर्वं मन्त्रोदीरणम्, 'आलम्बनं' ध्यानाद्याश्रयणं, तद्विना एतेषु सर्वेषु भेदेष्वभेदेन स्थितमिति शेषः । उपायाभिमतानामपि स्वप्रकाशचिद्भित्त्यैक्येन प्रकाशनात् । तदुक्तमस्मत्प्रभुपादैः

'उपायजालं न शिवं प्रकाशये-
दटेन किं भाति सहस्रदीधितिः ।
विवेचयन्नित्थमुदारदर्शनः
स्वयंप्रकाशं शिवमाविशेत्क्षणात् ॥'(तं०सा०२आ०)

इति ॥

तदेव विशिनष्टि

अक्षराक्षरनिर्मुक्तं
परं तत्त्वमनक्षरम् ॥ २३७ ॥

अक्षरेणाविमलेन जीवात्मना रूपेण आ समन्तात् क्षरैः सर्वभूतैश्च निर्मुक्तं परचिन्मात्रमित्यर्थः, अथवाऽक्षरैर्वाचकैरक्षरैश्च तत्संबन्धिभिर्वाच्यैराकारैर्निर्मुक्तमकारोकारादिवाचकमन्त्रकलातद्वाच्यरूपं न भवतीत्यर्थः ॥

युक्तं चैतत् यतः

अक्षरेषु कुतो मोक्ष
आकाशे कुसुमं कुतः।

अत्यन्तासंभाव्यमेतत्—यत्स्थानप्रयत्नादुच्चार्यत्वात् सोपाधिषु मन्त्रावयवरूपेषु 'अक्षरेषु' उच्चरत्सु निरुपाधिचिद्घनतत्त्वसमावेशात्मा 'मोक्षो' भवतीति परतत्त्वस्य वर्णतद्वाच्यरूपत्वाभावात्। उक्तं चैतत्प्राक्

'तस्य रूपं शरीरं च नास्ति वर्णः क्रिया तथा।' (६।१२)

इति। किंच अक्षरेषु भिन्नेषु बहुषु मुक्तात्मसु इष्यमाणेषु कुतो मोक्षः

'त आत्मोपासकाः.....।' (४।३९२)

इत्यभिहितत्वात्॥

अत एव

यावदुच्चार्यते वाचा
यावल्लेख्येऽपि तिष्ठति ॥२३८॥
तावत्स सकलो ज्ञेयो
निष्कलो भेदवर्जितः।

पश्यन्तीपर्यन्ताभिर्वाग्भिरुच्चार्यमाणस्तत्तद्-कारादिकलाबन्धान्मन्त्रः सकल एव भवति, लिपिध्यानक्रमेऽपि आप्यायादि कुर्वन्नपि अम्बा–ज्येष्ठा–रौद्री–वामाख्यलिपिकलायोगा-दपि सकल एव । यस्तु सर्वभेदप्रत्यस्तमयात् स्वप्रकाशानाहतपरामर्शमयः, स निष्कलः । एतच्च वितत्य पञ्चप्रणवाधिकारादौ निर्णीतम् । उक्तं च श्रीविज्ञानभट्टारके

'नहि वर्णविभेदेन देहभेदेन वा भवेत् ।
परत्वं निष्कलत्वेन सकलत्वे न तद्भवेत् ॥' (६ श्लो०)

इति ॥

अतश्चायं

सृष्टिसंहारनिर्मुक्तः
क्रियाकालविवर्जितः ॥ २३९ ॥

नायं मन्त्रान्तरवत् सृज्यते संह्रियते वा, नाप्यस्योच्चारध्यानादिक्रियाकालोऽस्ति।यथोक्तं

'नास्योच्चारयिता कश्चित्..... ।' (७ । ५९)

इत्यादि ॥ २३९ ॥

एतद्व्यनक्ति

अधश्चारे भवेत्सृष्टि-
रूर्ध्वे संहार उच्यते।
अधश्चारेण जातोऽसौ
ऊर्ध्वे चैव मृतो भवेत् ॥ २४० ॥
सूतकं मृतकं त्यक्त्वा
तिष्ठेद्वै तत्त्ववृत्तितः।

अधश्चारोऽपानः, ऊर्ध्वचारस्तु प्राणः, सृष्टि-संहार इति त्रिविधस्य देहप्रमातुः, असाविति देहप्रमाता इत्थं मुहुः सूतकमृतकाशौचमयः। यदा तु देहप्रमातृताभिमानं प्रशमय्य सत्यां चित्प्रमातृतामवलम्बते, तदा दलकल्पदेहप्राणादिपदवर्त्यप्ययं चिदामोदसुन्दरस्तत्त्ववृत्तिस्थित एव,—इति का मृतकसूतकसंभावनापीति इत्थमेतद्व्याकार्यम्, न तु प्राणापानप्रशमपदे सततमवस्थेयमिति योगिनां व्युत्थानदशासंभवेन तत्र सततावस्थानाघटनात्

'एतेषु तत्परं तत्त्वमुच्चारालम्बनाद्ऋते।' (७।१३७)

इत्युक्तेन वक्ष्यमाणेन च ग्रन्थेन विरोधापत्तेः। यदि चामुखे प्राणापानप्रशमपदनिभालनं तत्त्ववृत्त्यनुभवे भवति उपायः, तथापि तदुपायपूर्वं सर्वदा सर्वावस्थासु सर्वत्र चिदानन्दघनपरमशिवतामयत्वज्ञानमेव तत्त्ववृत्त्यवस्थितत्वम्। यद्वक्ष्यति

'सर्वं शिवमयं स्मरेत्।' (७।२४४)

इत्यादि ॥

तदित्थमियं

तत्त्ववृत्तिश्च व्याख्याता
सर्वाध्वोपाधिवर्जिता ॥ २४१ ॥

षड्विधस्याप्यध्वनः पारमार्थिकसत्तया चिन्मय्या परिज्ञातत्वात् नास्त्युपाधित्वं व्यतिरेकाभावात् विशेषेणाख्याता तत्र तत्र शास्त्रे निराचारावधूतनिर्मर्यादस्फुरत्तामहासत्तासमापत्तिसमावेशादिशब्दव्यवहृतत्वात् ॥ २४१ ॥

अतश्च

तत्त्वाध्वधर्मनिर्मुक्तः[1]
कारणैश्च विवर्जितः ।

---

१ ख॰ पु॰ कर्मनिर्मुक्त इति पाठः ।

तत्त्ववृत्तौ स्थितो योगी
सर्वारम्भविवर्जितः ॥ २४२ ॥
रागद्वेषविनिर्मुक्तो
विषादानन्दवर्जितः ।
नाकाङ्क्षेन्नच निन्देत्तु
विषयांश्च कदाचन ॥ २४३ ॥
समः शत्रौ च मित्रे च
ब्राह्मणे श्वपचे समः ।
तुल्यदर्शी भवेन्नित्यं
सर्वं शिवमयं स्मरेत् ॥ २४४ ॥

तत्त्वादिभिः शरीरावस्थितैर्नास्याहन्ताव-च्छिद्यते इत्यर्थः । अत एव चायं चित्समापन्नत्वात् सर्वैरारम्भैर्हेयोपादेयविषयाभिः प्रवृत्तिभिर्विशेषेणाभिनिवेशात्मना वर्जितः; यतस्तत्प्रवृत्तिहेतुभ्यां रागद्वेषदोषाभ्यां रहितः । तद्रहितत्वमपि अस्य विषयसङ्गसंपाद्यविषादानन्दविरहात्; अत एवास्य आकाङ्क्षाद्यभावो यथोपनतमात्रभोगातिवाहकत्वात् नास्य शत्रु-

मित्रब्राह्मणश्वपचेषु अपकार्युपकारिशुभ्रूषाप-विद्वत्तादिधीः; तुल्यत्वेनासौ सर्वं पश्यति केवलं, नतु लोकमध्यस्थो लोकस्य स्थिति-भङ्गमुत्पादयेत्। इदं त्वस्य मुख्यं रूपं—यत्सर्वं शिवत्वेन चिन्तयेत्। यदुक्तं श्रीविज्ञानभैरवे

'यत्र यत्र मनो याति बाह्ये वाभ्यन्तरे प्रिये।
तत्र तत्र शिवावस्था व्यापकत्वात्क यास्यति॥'(११६)

इति। तथा

'सर्वं देहं चिन्मयं हि जगद्वा परिभावयेत्।' (६३)

इति ॥ २४४ ॥

सर्वं शिवमयं स्मरेदित्युक्तं, तत्र सर्वमध्ये यद्यप्यात्मा प्रविष्टस्तथाप्यसौ अनादिशिवा-द्भिन्न इति भेदवादिदृशा भ्रमो मा भूदित्याह

आत्मानं च तथैवैवं
सर्वथैव सदा स्मरेत्।

तथैवैवमिति विश्वात्मकपरमशिवैक्येन ॥

अतश्च

सर्वतत्त्वानि भूतानि
वर्णा मन्त्राश्च ये स्मृताः॥२४५॥

नित्यं तस्य वशास्ते वै
शिवभावनयानया ।

सर्वस्य शिवाभिन्नस्वात्मैक्येन दर्शनात्, भूतानि चतुर्दश, वर्णाः शब्दराशिशरीरस्थाः ॥

ईदृक्त्ववृत्तिनिष्ठत्वादेव

नचासौ कुरुते पुण्यं
नैव पापं च सुव्रते ॥ २४६ ॥

बुद्धिपूर्वं शुभमशुभं वा न किंचित्करोति ॥ २४६ ॥

यतोऽसौ

कृतकृत्यः प्रसन्नात्मा

कृतं निष्पन्नं कृत्यं परमेशात्मस्वात्मसमापत्त्यात्मकं यस्य। प्रसन्नो मलाकलङ्कितः॥

अत एव

कृत्यं चास्य न विद्यते ।

च एवार्थो भिन्नक्रमः। यतोऽस्य कृत्यं नैव विद्यते, तेन कथं पुण्यं पापं वा कुर्यात् ॥

जीवन्नप्यसौ मुक्त इत्याह

इह लोके परस्मिंश्च
परिपूर्णस्तु सर्वदा ॥ २४७ ॥

इहेति व्युत्थानाभिमतावस्थायामित्यर्थः ॥

यदि बुद्धिपूर्वं धर्मादि नाचरति, तत्प्रमादसंपन्नं परोपकारादिकमस्यावारकं नेत्याह

धर्माधर्मविनिर्मुक्तः

अभिसन्धिं विना कर्मणो बन्धकत्वाभावात्

प्राक्शरीरार्जितमप्यस्य पुण्यादिकमावारकं नेत्याह

पुण्यपापविवर्जितः ।

प्रोक्तज्ञानाग्निना तयोर्भस्मीकृतत्वादित्यर्थः॥

अत एवेदृशस्य ज्ञानराशेर्योगिनः

नचास्य भक्ष्याभक्ष्यं हि
न पेयापेयमेव च ॥ २४८ ॥

नापवित्रं हि तस्यास्ति
न पवित्रं हि सुव्रते ।
निरपेक्षो ह्यसौ नित्यं
सर्वापेक्षाविवर्जितः ॥ २४९ ॥

सर्वस्य शिवैक्येन प्रतीतत्वात्। तदुक्तं श्रीविज्ञानभैरवे

'किंचिज्ज्ञैर्या स्मृता शुद्धिः साशुद्धिः शंभुदर्शने।
न शुचिर्ह्यशुचिस्तस्मान्निर्विकल्पो भवेत्सदा॥' (१२३श्लो०)

श्रीमदुच्छुष्मभैरवेऽपि

'यावन्न वेदका एते तावद्वेद्याः कथं प्रिये।
वेदकं वेद्यमेकं तु तत्त्वं नास्त्यशुचि ततः॥'

इति॥ २४९॥

ईदृशस्य च

नास्य क्षेत्रं नास्य तीर्थं
नियमो यम एव च।

'नियमो' जटाभस्मादिपरिग्रहः, परभैरवस्फाररूपस्य नास्य कश्चित्संकोच इत्यर्थः। तदुक्तं श्रीपूर्वशास्त्रे रहस्यप्रतिपादिनि अष्टादशे पटले

'नात्र शुद्धिर्न चाशुद्धिः.....।' (७४)

इत्यादिना महता ग्रन्थेन॥

एवंविधस्य योगिनो लोकोत्तरं क्षेत्रादि निरूपयति

क्षेत्रं तस्य परा शक्ति-
र्यतः सर्वं प्रसूयते॥ २५०॥

सर्वाध्वानो यतो देवि
तत्रस्थाः प्रचरन्ति वै ।
तीर्थं चैव परं शान्तं
नित्यं चानन्दविश्वगम् ॥२५१॥
येन व्याप्तमिदं विश्व-
मनन्तं विश्वशक्तिभिः ।
नित्यं विरक्तिः संसारा-
द्यमोऽयं परिकीर्तितः ॥ २५२॥
नियमो भावना नित्यं
परतत्त्वैकतानता ।

'क्षेत्रं तदुच्यते यत्र देवताचक्रमध्यगः ।
तत्तदभीष्टं प्राप्नोति.....॥'

इत्यतोऽस्य परयोगिनः पराद्वयमयाध्वच-क्रदेवताचक्रमध्यगता परा शक्तिरेव सर्वप्रसव-भूमिः क्षेत्रं, तीर्थं सर्वमलध्वंसकृत्, तच्चास्य प्रशान्तभेदकल्लोलमानन्दरसमयं विश्वव्यापि 'परं शान्तम्' अशेषशक्तिकचितं शक्तिमत्पदं, परतत्त्वैकतानता तदभेदविमर्शमयी भावना, सास्य नियमो व्रतम् ॥

एष च योगी

नात्मनो भावयेज्जातिं

न कुलं नच बान्धवान् ॥२५३॥

देहात्मनो हि जात्यादिकलङ्कयोगो, न चिदात्मनः ॥ २५३ ॥

ईदृशोऽपि च

आचरेत्सर्ववर्णत्वं

सर्वेषां ब्राह्मणादिवर्णानां भावमाचरेत्, यस्य यादृक् स्वरूपमाचारो वा, तस्य तदेव श्लाघेत ॥

नचात्मनि वर्णाश्रमनियमं गृह्णीयादित्याह

नच वर्णेषु वर्तयेत् ।

किंतु

परभावनया नित्यं

परधर्मेण वर्तयेत् ॥ २५४ ॥

वर्तेतेत्यर्थः ॥ २५४ ॥

तामेव परधर्मवृत्तिं सामानाधिकरण्येनास्य दर्शयति

सर्वज्ञः परितृप्तश्च

परिपूर्णः स्वभावतः ।

स्वतन्त्रोऽलुप्तसामर्थ्य-
स्त्वनादिनिधनाश्रितः ॥२५५॥
अनादिबोधो ह्यतुलः
कालवेलाविवर्जितः ।
चारोच्चारविनिर्मुक्त-
स्त्वहोरात्रविवर्जितः ॥ २५६ ॥

'परिपूर्णो'ऽनन्तशक्तिः । सर्वज्ञत्वादय एते गुणाः षट् योजनिकाग्रन्थेऽस्माभिर्व्याकृता एव। 'अतुलः' इति शिवैक्येनास्य स्फुरणात् द्वितीयस्याभावात् । 'कालवेलाविवर्जितः' इति मितयोगिवदस्य प्राणीयतुर्व्यंशांशिकानिभालनानुपयोगात्; अत एव चारस्य प्राणवाहस्य य ऊर्ध्वप्रेरणात्मा उच्चारः, सोऽप्यस्यानुपयुक्तः; अतश्च नित्यमेव शिवैकात्म्यभावनाविष्टत्वात् नास्य मुमुक्षुबुभुक्षुवदहोरात्रोपयोगः कश्चित् ॥ २५६ ॥

नाप्यस्य तत्प्रविभागोऽस्तीत्याह

न दिवा जागरं कुर्या-
न्न च रात्रौ स्वपेत्क्वचित् ।

स्वभावेनैव संतिष्ठे-
द्दिनरात्रिविवर्जितः ॥ २५७ ॥

यथा लौकिको दिवा 'जागर्ति' भेदव्यवहारमेव परिशीलयति, निशायां मायायां स्वपिति न प्रबोधमेति, तथा नायम्, अपितु अभेदनिष्ठ एव तथा मायया नाभिभूयते । जाग्रतः स्वपतोऽपि चास्य न जागरस्वप्नौ स्तः सदा तुरीयप्रकाशावियोगात् । यथोक्तं

'तस्योपलब्धिः सततं त्रिपदाव्यभिचारिणी ।
नित्यं स्यात्सुप्रबुद्धस्य·····॥' (२निः० १का०)

इति श्रीस्पन्दे । तस्य परतत्त्वस्य संबन्धिन्युपलब्धिस्तन्मयः प्रकाशः सुप्रबुद्धस्य त्रिषु जाग्रदादिपदेषु 'सततम्' इत्यादौ मध्येऽन्ते च नित्यमित्यविच्छेदेन भवतीति मयैवेत्थं स्पन्दनिर्णये व्याकृतमेतत् ॥ २५७ ॥

यः
एवं वै वर्तते योगी
सः
परेण समतां व्रजेत् ।

नच तं कलयेत्कालः
कल्पकोटिशतैरपि ॥ २५८ ॥

अकालकलितपरमेश्वरैकरूपत्वात् ॥ २५८ ॥

एतदेव स्पष्टयति

जीवन्नेव विमुक्तोऽसौ
यस्यैषा भावना सदा ।
शिवो हि भावितो नित्यं

ततश्च तं

न कालः कलयेच्छिवम् ॥२५९॥

शिवं शिवैकरूपं महायोगिनं कथं कालः कलयेत् ॥ २५९ ॥

अथास्य महाव्याप्तिज्ञानस्य सकलोपनिषदुपदेशसारतमतामेतत्तन्त्रोपास्यदेवतानामोपपदप्रदर्शनपूर्वं निरूपयति

योगी स्वच्छन्दयोगेन
स्वच्छन्दगतिचारिणा ।
स स्वच्छन्दपदे युक्तः
स्वच्छन्दसमतां व्रजेत् ॥२६०॥

प्रोक्ततत्त्ववृत्त्यवस्थित्यात्मना स्वात्मप्रतिष्ठया स्वच्छन्दगत्या चरत्यवश्यं योऽयं परतत्त्वैक्यप्रतीतिमयत्वात् स्वच्छन्दशब्दवाच्यो महायोगः, तेन श्रीस्वच्छन्दभैरवस्य पदे धाम्नि युक्तोऽभिनिविष्टः सन् तत्साम्यमेति ॥२६०॥

योगप्रकर्षात्तु

स्वच्छन्दश्चैव स्वच्छन्दः
स्वच्छन्दो विचरेत्सदा ।

नित्यमादिमध्यान्तकोटिष्वयं श्रीस्वच्छन्दभैरव एव स्फुरन् स्थितः—इति यावत् ॥

'स्वसंवेद्यो भवेच्चारो नाडीचारजयात्स्फुटम् ।
अथवा स जपादेवमत्यर्थमुपबृंहितः ॥
मन्त्री योगं विजानाति ज्ञात्वा सर्वज्ञतां व्रजेत्'(७।१४४)

इति यदुपक्रान्तं, तत् मध्ये नाडित्रयवाहनिरूपणतदन्यथावाहाद्युत्थारिष्टज्ञानमृत्युजयादिबहुप्रमेयव्यवहितं जातम् । अत एतदुपसंहरन् प्रागुक्तमेवानुबध्नाति

एवं वै मृत्युलिङ्गानि
रिष्टान्यन्यानि यानि च॥२६१॥

योगाज्जानाति योगीन्द्रो
नादजान्तर्गतानि च ।
निर्जित्यैतानि योगेन
एवमुक्तक्रमेण तु ॥ २६२ ॥

एवमिति यथोक्तवाहविपर्ययात्मकानि यान्यन्यानि च

'कर्णरन्ध्रकृताङ्गुष्ठो घोषं न शृणुते' (७।१८७)

इत्यादीनि रिष्टानि नादजान्तर्गतान्युक्तानि च-शब्दात् काणोत्पाटादीनि च, तानि योगात् प्रोक्तरूपाच्चारावधानादेव योगी जानाति, ज्ञात्वा च हंसध्यानामृतध्यानतत्त्ववृत्त्यवस्थानरूपेण परपरापरापरात्मना मृत्युजिता योगेन निर्जित्य पुनरपि नाडीचारजयाभ्यासाद्योगी विजानाति, ज्ञात्वा च सर्वज्ञतां व्रजेदिति संबन्धः ॥ २६२ ॥

अथेदानीम्

अयोगी यानि जानाति
अयुक्तो वापि सुव्रते ।

बहिर्लिङ्गानि तान्यत्र
अङ्गारिष्टानि मे शृणु ॥२६३॥

अयोगीत्यप्राप्तयोगः । 'अयुक्तः' इति योगायाघटमानो वा लौकिक एवेत्यर्थः ॥ २६३ ॥

तान्याह

शुष्कताल्वोष्ठकण्ठश्वे-
दकस्माद्धूसरच्छविः ।
स्कन्धौ च भङ्गमायातः
षण्मासान्मृत्युमाप्नुयात् ॥२६४॥

अकस्मादिति प्रसिद्धं निमित्तं विना, एतच्च सर्वत्र योज्यम् ॥ २६४ ॥

सुनीलं मण्डलं व्योम्नि
यः पश्यति दिने दिने ।
सितं हरितकृष्णं च
वत्सरार्धान्म्रियेत सः ॥ २६५ ॥

अकस्मादित्येव । मण्डलमिति सूर्यबिम्बस्य बाह्यपरिवेशः ॥ २६५ ॥

विरश्मिं पश्यति रविं
सोमं वै लक्ष्मवर्जितम् ।

तारां ज्योत्स्नां च कृष्णां वै
पश्येत्षण्मासजीवितः ॥२६६॥

रविं मण्डलान्तस्थं बिम्बम् ॥ २६६ ॥

हिरण्यवर्णं पुरुषं
पिङ्गलं कृष्णमेव च ।
स्वप्ने संपश्यते यो वै
षण्मासान्सोऽपि जीवति ॥२६७

अकस्मात् पित्तादिप्रकोपाभावादिति स्थितमेव ॥ २६७ ॥

आत्मनो ह्यशिरश्छायां
पश्येत्षण्मासजीवितः ।

छायापुरुषपरीक्षायामित्यर्थात् ॥

तैलाभ्यङ्गं तथा पानं
रक्तस्रगनुलेपनम् ॥ २६८ ॥
रक्ताम्बराणि कृष्णानि
स्वप्ने पश्यति वै यदा ।
प्रेतैः पिशाचैः रक्षोभिः
श्वगोमायुकसूकरैः ॥ २६९ ॥

वृतं यातं गृद्धकाकै-
र्महिषैरुष्ट्रगर्दभैः ।
अङ्गभक्षणमुद्वाहं
नग्नं चातीव विह्वलम् ॥ २७० ॥
स्वप्ने च पश्यते यो वै
वर्षमेकं स जीवति ।

अत्र यथायोगमात्मन आत्मानमिति च योज्यम् । गृद्धादिभिर्यातमिति वाहनरूपैर्नीयमानम् ॥ २७० ॥

शंखावर्ते भुजामध्ये
गुल्फयोर्मर्मसन्धिषु ॥ २७१ ॥
सोऽवश्यं वधमायाति
यस्यैतत्स्पन्दनं न हि ।

शंखावर्तौ ललाटकपालसंधी नेत्रप्रान्तस्थौ, भुजामध्यं मत्स्यस्थानमिति प्रसिद्धं, मर्मसंधयो धमन्यादयः सिराः ॥ २७१ ॥

किंच

सोमार्कमण्डलं देहे
ध्रुवं चैव त्वरुन्धतीम् ॥२७२॥

न पश्यति महायानं
सोऽवश्यं म्रियते नरः ।

एतानि प्रातिलोम्येन व्याचष्टे

तालुरन्ध्रगतो धूमो
महायानं तदुच्यते ॥ २७३ ॥

जिह्वा त्वरुन्धतीत्युक्ता
नासाग्रं ध्रुव उच्यते ।

'तालुरन्ध्रं' ब्रह्मबिलं, पश्चात्कृतसूर्यस्तदुत्थां धूमलेखां छायायां न पश्यति। नासाग्रं त्रिपुटिकाप्रान्तः ॥ २७३ ॥

किंच

नेत्रान्ते करजाक्रान्ते
मण्डलं सोमसूर्ययोः ॥२७४ ॥

वामदक्षिणनेत्रप्रान्ता यदा नखेन पीड्यन्ते तदा ज्योतिर्यदृश्यते, तत्सोमसूर्ययोर्मण्डलम्॥

तदेतत्सर्वं

न पश्येद्दृगनेऽप्येत-
त्सोऽवश्यं म्रियते नरः ।

ऋतुकालादनन्तरमेव बहिर्यानमाकाशगङ्गापथः, अरुन्धती सप्तर्षिमध्यस्था, ध्रुवश्चतुर्दशतारारब्धशरीरः, सोमसूर्ययोर्मण्डलं बिम्बबाह्यः परिवेशः ॥

स्थूलोऽकस्माच्च जायेत
अकस्माद्वै भवेत्कृशः ॥२७५॥
अतिक्रुद्धोऽतिभीतश्च
वर्षमेकं स जीवति ।

पुनः स्वप्नविषयमाह

कृष्णाम्बरधरं कृष्णं
लोहदण्डकरोद्यतम् ॥ २७६ ॥
नरं चाभिमुखं स्वप्ने
दृष्ट्वा मासत्रयायुषम् ।
आत्मानं निश्चिनुयात् ॥ २७६ ॥

हृदयं शुष्यते यस्य
स्नातमात्रस्य तत्क्षणात् ॥२७७॥
गात्रं चैवाप्यनुष्णं च
ऋतुमेकं स जीवति ।

धनुर्निशि दिवा चोल्का
व्यभ्रे विद्युत्प्रदर्शनम् ॥२७८॥

दिग्दाहोऽस्पृष्टदेशोऽपि
मासमेकं स जीवति ।

धनुरैन्द्रम्, अस्पृष्टदेशोऽन्यजनापरिदृश्यदिग्दाहेऽपि यस्य दिग्दाहो भाति, स मासं जीवति, धनुर्निशि, दिवा चोल्कादर्शनम् ॥

चक्षुषी स्रवतो यस्य
शब्दं न शृणुयात् स्फुटम् २७९

नाघ्राति गन्धं

आघ्रातीति ऐशः पाठः ॥

यस्य च

वाग्जाड्यं

अकस्मादिति सर्वत्र संबध्यते ॥

तस्य

मासमेकं गतायुषः ॥

जीवितमिति संबन्धः ॥

अकस्मादेव च

रक्तपद्मोपमं वक्त्रं
जिह्वा कृष्णा च यस्य वै ॥२८०॥
गात्रे वर्णान्यनेकानि
हृदयं यस्य रोदिति ।
तालुकम्पोऽथ नाभेश्च
अर्धमासं स जीवति ॥२८१॥

'रोदिति' निर्निमित्तं पुनः पुनः स्विद्यति; रोदनमनुभवतीत्यन्ये ॥ २८१ ॥

यश्च

प्रत्यक्षकाकनासीरो
दीपधूमं न जिघ्रति ।
पूर्वदृष्टं न जानाति
चतुर्मासं स जीवति ॥२८२॥

असंनिहिता अपि काका नासीराः कङ्काश्च येन प्रत्यक्षाः पुरो दृश्यन्ते ॥ २८२ ॥

बिन्दुं यस्तु न पश्येत्तु
नित्यं वक्त्रानुगं हितम् ।

नित्यं वहति हिक्कां तु
वर्षमेकं स जीवति ॥ २८३ ॥

षडङ्गं करणं कृत्वापि यो बिन्दुं न पश्यति वक्त्रानुगं भ्रूमध्यस्थं, हिक्कां हिध्माम् ॥ २८३ ॥

उपसंहरति

बहिर्लिङ्गानि चैतानि
अङ्गारिष्टानि यानि च ।

उक्तानीति शेषः ॥

अथैतानि

पूजया जपहोमेन
ध्यानधारणया प्रिये ॥२८४॥
कृतरक्षाविधानेन
जीयन्ते नात्र संशयः ।

पूजादिधारणान्तं भगवद्विषयं, रक्षाविधानं वक्ष्यमाणम् ॥ २८४ ॥

तदित्थं रिष्टप्रशमनं कृत्वा प्रकृतो योगाभ्यास एव कार्यः, स च नाडिशुद्धिपूर्वकप्राणजयादेवेति तत्प्रकाशनाशयेन श्रीदेव्युवाच

नाडीनां शोधनं चैव
वायूनां च जयः कथम् ॥२८५॥

तेषां प्राग्विभक्तानां वायूनां
स्थानं रूपं च शब्दं च
कर्म ब्रूहि मम प्रभो ।

एतत्प्रश्नषट्कं निर्णिनीषुः श्रीभैरव उवाच

परमो योगसद्भावो
गुह्याद्गुह्यतरः प्रिये ॥ २८६ ॥
यो न कस्यचिदाख्यात-
स्तं योगं शृणु तत्त्वतः ।

यत्त्वया प्रश्नितं, तद्योगरहस्यं तद्विना योगाभ्यासायोगात् ॥

तत्र तावत्
सुप्रशस्ते भूप्रदेशे
नाग्नितोयसमीपतः ॥ २८७ ॥
वालुकाशर्कराहीने
शुष्कवृक्षविवर्जिते ।

निःशब्दकीटवल्मीके
ईतिभिः परिवर्जिते ॥ २८८ ॥
पुण्ये धर्मिष्ठसंवासे
तत्र योगं समभ्यसेत् ।

'ईतयः' अतिवृष्ट्यादयः । पुण्ये सत्तीर्थादियुक्ते धर्मिष्ठसंवासे पुण्याश्रये ॥

तदासौ
देवदेवं समभ्यर्च्य
भैरवं सविनायकम् ॥ २८९ ॥
पूर्वाचार्यान्नमस्कृत्य
युक्तो ध्यानपरायणः ।

विघ्नप्रशमनाय गणपतिपूजापूर्वमाज्ञाग्रहणाय गुरून् पूजयित्वा, भैरवमभ्यर्च्य ध्यानपरायणो युक्तः स्यादिति संबन्धः ॥

कथमित्याह
आसनं स्वस्तिकं बद्ध्वा
पद्मकं भद्रमेव वा ॥ २९० ॥

सापाश्रयं सार्धचन्द्रं
योगपट्टं यथासुखम्।
दहनोत्पूयने कृत्वा
प्लावयेदमृतेन च ॥ २९१ ॥

सबाह्याभ्यन्तरेणैव
सकलीकरणं ततः।
अन्तर्यागं यथापूर्व-
मुच्चार्य च परं तथा ॥ २९२ ॥

दशधा योगमार्गेण
हंसस्वच्छन्दमभ्यसेत्।

पद्मकमूरुन्यस्तोत्तानपादतलं पद्मासनाख्यं, पर्यङ्कस्थस्य जंघान्यत्यासात् स्वस्तिकं, समपादस्थित्या भद्रं, भित्त्याश्रयात्सापाश्रयमेतच्चार्धचन्द्रविशेषणं भूमिष्ठैकचरणोरुपृष्ठन्यस्तोत्तानद्वितीयचरणमर्धचन्द्रं, योगार्थं पट्टं परिकरबन्धाय बद्ध्वा एतदन्यतममासनम्, अन्यदपि वा यद्यत्सुखं शरीरपरिक्लेशकृन्न भवति। यथोक्तं

'स्थिरसुखमासनम्' (पात० सू० २।४६)

इति । ततः पूर्वोक्तं दहनाद्युच्चारान्तं[1] कृत्वा, दशधा योगमार्गेणेति बाह्याभ्यन्तररेचनादिषड्क-प्रशान्तकुम्भक-प्रत्याहार-धारणा-ध्यानात्मना भाविना अथच भाविप्राणादिवायुदशकजय-पूर्वं पूर्वोक्तं हंसस्वच्छन्दं परं निष्कलभट्टारकमभ्यसेदनुप्रविशेत् ॥

तदनुप्रवेशं पूर्वोक्तोपायानुसारेण[2] स्फुटयति

मन्त्रं बिन्दुमतीतं तु
नादान्तज्योतिराकृतिम्॥२९३॥
संकल्प्य कल्पनालक्ष्यं
ध्यायेद्वै तेन सर्वगम् ।

चतुष्कलनाथमकारादिकलोच्चारपूर्वं बिन्दुमतीतमिति तदुल्लङ्घनात् अर्धचन्द्रनिरोधिकापदमुद्धाट्य, नादनादान्तक्रमेण ज्योतिराकृतिमिति शक्त्यादिप्रकाशरूपं, संकल्प्य विकल्पपूर्वमविकल्पेनासाद्य, कल्पनाभिरलक्ष्यं स्वप्रका-

---

१ ख० ग० पु० दाहादीति पाठः ।

२ ख० पु० सारणेनेति पाठः ।

शचिदानन्दघनं, सर्वगं हंसस्वच्छन्दं ध्याये-दिति समनान्तं विलाप्य अकृतकविमर्शोदयेन समाविशेत् ॥ २९३ ॥

तदेतत् नाडिशुद्धिप्राणजयपूर्वकं सुघटं स्यात्,—इत्याशयेन नाडिजयं तावदाह

अपसव्येन पूर्येत
सव्येनैव विरेचयेत् ॥ २९४ ॥
नाडीसंशोधनं चैत-
न्मोक्षमार्गपथस्य च ।

'सव्येन' दक्षनासापथेन 'रेचयेत्' रेचकं कुर्यात् 'अपसव्येन' वामेन 'पूर्येत' वायुपूरणं कुर्यादित्यर्थः । एवमनवरतं क्रियमाणमेत-न्नाडीनां मोक्षमार्गपथस्य वा मध्यधाम्नः शो-धनं मारुतप्रशमनं भवति ॥

प्राणजयं व्यंक्तुमुपक्रमते

रेचनात्पूरणाद्रोधा-
त्प्राणायामस्त्रिधा स्मृतः ॥ २९५

प्राणस्यायमनं यथास्थितवाहविजयेन स्वाय-त्ततानयनम् ॥ २९५ ॥

त्रय एते प्राणायामाः सर्वसाधारणेन नासिकापथक्रमेण निर्वर्त्यमानाः साधारणा बाह्याश्चेत्याह

सामान्या बहिरेते तु
एतदभ्यासपूर्वमन्तःप्रयुज्यमानैः
पुनश्चाभ्यन्तरे त्रयः ।

तानाह

आभ्यन्तरेण रेच्येत
पूर्येताभ्यन्तरेण तु ॥ २९६ ॥
निष्कम्पं कुम्भकं कृत्वा
कार्याश्चाभ्यन्तरास्त्रयः ।

'आभ्यन्तरेण' मध्यपथेनात्र रेचनं द्वादशान्ते, पूरणं हृदि, निष्कम्पं कुम्भकमिति निरायासं प्रशान्तकुम्भकमित्यर्थः । 'कार्याः' इति निर्वर्तनीया भवन्ति ॥ २९६ ॥

अथ

नाभ्यां हृदयसंचारा-
न्मनश्चेन्द्रियगोचरात् ॥२९७॥

प्राणायामश्चतुर्थस्तु
सुप्रशान्त इति श्रुतः ।

निष्कम्पकुम्भकानन्तरं 'हृदयसंचारात्' इति शनैः शनैर्हृदयादधःसंचारयुक्त्या प्राणं नाभ्यामेव नियम्येत्यर्थात्, तथा मन इन्द्रियगोचरादिति तत्प्रत्याहारयुक्त्या नाभ्यामेव नियम्य, मनोनियमपूर्वकं प्राणं नाभौ नियच्छतः सुप्रशान्तः प्राणायामो भवति ॥२९७॥

तदित्थं

प्राणरोधे तु संपूर्णे
नाभौ नीत्वा[1] समुच्छ्वसन् ॥२९८॥

अनन्तरं

शनैर्विमोचयेद्वायुं
वामनासापुटेन तु ।

निरुद्धवायुप्रकोपापहाराय ॥

एवं चारजयान्तं प्राणायामप्रत्याहारावभिधाय, धारणा निरूपयति

---

१ ख० ग० पु० गत्वेति पाठः ।

वायवी धारणाङ्गुष्ठे
आग्नेयी नाभिमध्यतः ॥२९९॥
माहेयी कण्ठदेशे तु
वारुणी घण्टिकाश्रया ।
आकाशधारणा मूर्ध्नि
सर्वसिद्धिकरी स्मृता ॥३००॥

पाददेशे तिर्यग्गतेः, नाभौ जाठराग्नेः, कण्ठे स्थितिपदे धरण्याः, घण्टिकायां रसस्य, ब्रह्मरन्ध्रे च व्योम्नः सद्भावात्तथैव धारणा उक्ताः । अत्र चोद्घाते दीक्षाप्रस्तावनिर्णीतं वर्णमण्डललाञ्छनाक्षरात्मकत्वं धारणाध्येयम्। तत्र प्रथमं कण्ठे पार्थिवीं धारणां बद्ध्वा हृदयादुद्घातपञ्चकेन पञ्चगुणं पार्थिवं तत्त्वं भिन्द्यात्, ततोऽनेनैव क्रमेण हृदयादेव चतुर्भिरुद्घातैश्चतुर्गुणमप्तत्त्वं, ततो हृदयादेव नाभिक्षेत्रे त्रिभिरुद्घातैस्त्रिगुणमग्निम्, अनन्तरं हृदयादेव द्वाभ्यां पादाङ्गुष्ठगतं द्विगुणं वायुं, ततोऽपि अङ्गुष्ठात्संकोचयुक्त्या प्राणशक्तिमूर्ध्वमुद्बोध्य हृदयादेवैकोद्घातयुक्त्या शरवद्भ-

ह्मरन्ध्रस्थमेकगुणं व्योमग्रन्थिं भित्त्वा, द्वादशान्तस्थस्य सर्वाः सिद्धयो भवन्तीति वाक्यार्थः ॥ ३०० ॥

तदेतदाह

एकद्वित्रिचतुष्पञ्च-
संख्योद्घातैः प्रसिद्ध्यति ।

उद्घातं लक्षयति

संनिरुद्धे तु वै प्राणे
मूर्ध्नि गत्वा निवर्तते ॥३०१॥
स उद्घात इति प्रोक्तो
ज्ञातव्यो योगिभिः सदा ।

'मूर्ध्नि' इत्युपलक्षणपरं कण्ठादिक्षेत्राणाम्। 'ज्ञातव्य' इति तत्तत्स्थानानुसार्यनुभवात्मकोऽयमित्यर्थः । अत एव पूर्वमनुभवप्रधान एवासावुक्तः ॥ ३०१ ॥

अथ प्राणायामादीनां फलमादिशति

रागद्वेषौ प्रहीयेते
प्राणायामैः सुधारितैः ॥३०२॥

धारणाभिर्दहेत्पापं
प्रत्याहारेऽक्षसंयमः ।

पापं दहेदित्यावारकपृथिव्यादिग्रन्थिभेदात् शुभाशुभकर्मबन्धविच्छेदात् ॥

अथ यत्प्राणादिविषयं प्रश्नितं 'स्थानं रूपं च शब्दं च कर्म ब्रूहि' इति, तत्क्रमेण निर्णेतुमाह

हृद्वुदे नाभिकण्ठे च
सर्वसन्धौ तथैव च ॥३०३॥
प्राणाद्याः संस्थिता ह्येते

व्यानान्ताः पञ्चेत्यर्थात् ॥

एषां च

रूपं शब्दं च मे शृणु ।

तत्र

द्रुततारनिभो रक्त
इन्द्रगोपकसंनिभः ॥ ३०४ ॥
क्षीराभः स्फटिकाभश्च
पञ्चानां रूपलक्षणम् ।

'द्रुततारं' गलितं रुप्यम् ॥ ३०४ ॥

घण्टाकंसाब्दमधुरो
गजनादो महाध्वनिः ॥३०५॥
प्राणादीनां तु पञ्चाना-
मयं शब्द उदाहृतः।

'कंसं' कांस्यम्, 'अब्दो' मेघः; 'महाध्वनिः' हुतनदीघोषोपमः ॥ ३०५ ॥

एषां कर्मादिशति, तत्र

जल्पितं हसितं गीतं
नृत्तं युद्धगतिः कलाः ॥३०६॥
शिल्पं च सर्वकर्माणि
प्राणस्यैवं विचेष्टितम्।

कलाश्चित्राद्याः। सर्वकर्माणीत्येतान्येव ३०६

प्रवेशयेदन्नपानं
तन्मलं स्रावयेदधः ॥३०७॥
अन्धत्वं श्रोत्ररोगं च
अपानस्तु करिष्यति।

चशब्दाद्ग्रहणघ्राणादि ॥ ३०७ ॥

अशितं लीढपीतं च
समानः समतां नयेत् ॥३०८॥

नाडीषु संचारयेत् ॥ ३०८ ॥

क्षोभो हिक्का तथा छिक्का
उदानस्य विचेष्टितम् ।

'छिक्का' क्षुतम् ॥

स्वेदश्च रोमहर्षश्च
शूलं दाहोऽङ्गभञ्जनम् ॥३०९॥
व्यानस्यैतानि कर्माणि
स्पर्शं चैव स विन्दति ।

स एव लभते ॥ ३०९ ॥

नागादीनां स्थानान्यादिशति

अङ्गुष्ठजानुहृदये
लोचने मूर्ध्नि संस्थिताः ॥३१०॥
नागाद्याः

क्रमेणेत्यर्थः ॥ ३१० ॥

सर्वेषामेषां शवलरूपता शवलशब्दता च तुल्येत्याह

बहुरूपाश्च

चकाराद्बहुशब्दाः ॥

कर्म त्वेषां निबोध मे ।

तत्राविकृतावस्थायां क्रमेण

आह्लादोद्वेगजनकः
शोषणस्त्रासनस्तथा ॥ ३११ ॥

नागः कूर्मश्च कृकरो
देवदत्तश्च पञ्चमः ।
अतिनिद्राकरश्चान्यो
योजकश्च धनंजयः ॥ ३१२ ॥

अतिनिद्रा तन्द्रा, योजको देहान्तरसंबन्धकृत् ॥ ३१२ ॥

एषां विकृत्यवस्थायां

श्वाससंकोचनच्छेदा
घुर्घुरोत्क्रमणं तथा ।
नागादीनां तु पञ्चानां
मृत्युकाले विचेष्टितम् ॥३१३॥

'उत्क्रमणं' देहविश्लेषः ॥ ३१३ ॥

धनञ्जयकूर्मयोर्विशेषस्त्वयं, यत्
नचैव याति चोत्क्रान्तौ
तनुं त्यक्त्वा धनञ्जयः ।
कंचित्कालं शवशरीरं न मुञ्चति ॥
आकुञ्चयति वै कूर्मः
शोषयेच्च कलेवरम् ॥३१४॥

'आकुञ्चनं' संधिसंकोचः । शोषस्तालवादिस्थानेषु ॥

तदेवं दशधा स्थितं
प्राणमेव जयेत्पूर्वं
जिते प्राणे जितं मनः ।
जिते मनसि शान्तस्य
परं तत्त्वं प्रकाशते ॥३१५॥

तत्र
प्राणापानं गुदे ध्याये-
त्प्राणसमानं नाभितः ।
प्राणोदानं तु कण्ठे तु
प्राणव्यानं तु सर्वगम् ॥३१६॥

प्राणशब्दोऽत्र सामान्यप्राणवाची अपानादीनां विशेषरूपाणां सामानाधिकरण्येन प्रयुक्तः। यस्तु बहिःप्रसरणात्मा विशेषरूपः प्राणस्तं पूर्वोक्तदेशे हृदि ध्यायेत्। यथोक्तवर्णशब्दाद्यात्मानश्चैते ध्याता वशीकृता भवन्ति॥

एवमेव च

नागाद्याः प्राणसंयुक्ताः
सामान्यप्राणसंबद्धाः॥
एतान्यथोक्तरूपान्पूर्वोक्तेषु
स्वस्थानेषु निरोधयेत्।

तदेतस्य दशकस्य यावता कालेन निरोधाज्जितता भवति, तत्कालं वक्तुमाह

निरुद्धस्य च यः कालस्तं वक्ष्यामि निबोध मे॥३१७॥
तालात्प्रभृति तं ध्याये-
द्यावत्पञ्चशतं गतम्।
जितोऽनिलो भवत्येव
संक्रान्त्युत्क्रान्तिकर्मणि॥३१८॥

अङ्गुल्या जानुभ्रमणावधिकालस्तालः। तेषां

यावत्पञ्चशतं गच्छति, तावद्यदि प्राणादीनामविचलं ध्यानं सिध्यति, तदा ते जिता भवन्ति । ततश्च परशरीरसंक्रान्तौ उत्क्रान्तौ च सामर्थ्यं भवति ॥ ३१८ ॥

इदं च तज्ज्ञेयमभिज्ञानं

दिव्या कान्तिः शुभो गन्धः
प्रज्ञा चास्य विवर्धते ।
दिव्या दृष्टिश्च श्रवणं
दिव्या वाक्च प्रजायते ॥३१९॥

वायुवद्विचरेल्लोका-
न्सिद्धान्देवांश्च पश्यति ।
मनसा चिन्तितावाप्तिः
प्रवर्तेत गुणाष्टकम् ॥ ३२० ॥

सर्वकामसुसंपूर्णः
सर्वद्वन्द्वविवर्जितः ।
संसारबन्धनिर्मुक्तः
शिवतुल्यश्च जायते ॥ ३२१ ॥

गुणाष्टकमणिमादिकम् । तदियता ग्रन्थेन

'दशधा योगमार्गेण हंसस्वच्छन्दमभ्यसेत् ।' (७।२९३) इति यदुपक्रान्तमभूत्तन्निर्वाहितम् ॥ ३२१ ॥

अथेदानीं सगर्भप्राणीयधारणाभिर्योगिनां योगोचितजाग्रदाद्यवस्था दर्शयन् दर्शनान्तरोक्तवेधसमावेशस्वरूपज्ञानं शिक्षयति

प्राणापानौ तु संयोज्य
ह्रस्वकोटिसमन्वितौ ।
नाभ्याधारे च योगीन्द्रः
यदा तिष्ठेत्तदास्य
स्वेदः कम्पश्च जायते ॥ ३२२ ॥

हृदये प्रशान्ताशेषतरङ्गानाहतविश्रान्त्यनन्तरं यदा मन्त्रवृद्धेरुन्मिषत्ता भवति तदा, हृदि सामरस्यावस्थितौ प्राणापानौ ह्रस्वकोट्याकारकलाविमर्शनेन युक्तावधःप्रसरणक्रमेण नाभौ संयोज्य, प्रोक्तकालं तिष्ठतः स्वेदकम्पौ भवतः ॥ ३२२ ॥

अथासौ

पुनरेव तु हृत्स्थौ हि
प्राणापानौ निरोधयेत् ।

---

१ ख० पु० वृद्धेरुन्मिमिषेति पाठः ।

दीर्घकोटिसमायोगा-
त्तत्क्षणाच्च पतेद्भुवि ॥३२३॥

नाभिपदविश्रान्त्यनन्तरमूर्ध्वमारुह्य हृत्स्थं कृत्वा दीर्घात्मकमात्राद्वितीयकलाविमर्शनपरो निरोधयेत्,—इति तत्कालोच्चारस्थाने कण्ठान्ते प्रोक्तकालं तिष्ठेत्, तदेकाग्रताप्रकर्षात् भुवि पतेत् ॥ ३२३ ॥

ततोऽपि यद्यसौ
कण्ठस्थं च तथैवेह
प्राणमेव निरोधयेत्।
प्लुतकोटिसमायोगा-
त्स्वप्नवृत्तिस्ततो भवेत् ॥३२४॥

उल्लासे सति अपानप्रशमात्प्राणमितीहोक्तं कालं, प्लुतकोटिः पूर्वोक्तनीत्या तालवन्तोच्चारी मकारकलाविमर्शः, स्वप्नोऽत्र जिज्ञासितवस्तुप्रथनात्मा योग्युचितः। एवमादिशता कम्प-स्वेद-पाता योगिजागरा,—इति निरूपितं भवति ॥ ३२४ ॥

यदा तु

भ्रूमध्ये बिन्दुयोगेन
प्राणरोधं तु कारयेत्।
सुषुप्तं जायते तत्र
क्षणाच्चैव प्रबुध्यते ॥ ३२५ ॥

प्लुतेनैव तालुनो भेदितत्वान्मात्रबिन्दुकलाव्याप्तिविमर्शेन भ्रूमध्ये प्रोक्तकालं तिष्ठतः प्रशान्तमनोवृत्तिः सुषुप्तावस्था उदेति, क्षणाच्च प्रबुध्यत इति न लौकिकवत् तमोवरणेन अभिभूयते। तदुक्तं

'.....तदन्यत्र तु चिन्मयः।' (स्प० २।२)

इति ॥ ३२५ ॥

ततोऽपि

मूर्धद्वारं समाश्रित्य
निष्कलं ध्यानमारभेत्।
एवमभ्यसतस्तस्य
प्रत्ययस्तु तदा भवेत् ॥३२६॥

पिपीलकण्टकावेधो
मूर्ध्वद्वारं विभिन्दतः।

निष्कलमिति वर्णज्योतिर्ध्वनिव्याप्त्युल्लङ्घनात्स्पर्शनानुभवरूपं, 'पिपीलकण्टकावेध' इति संचरत्पिपीलस्पर्शतुल्यकण्टकस्पर्शतुल्यश्च स्पर्श इत्यर्थः ॥ ३२६ ॥

किंच

भित्त्वा क्रमेण सर्वाणि
उन्मन्यन्तानि यानि तु ॥३२७॥
पूर्वोक्तलक्षणैर्देवि

लक्षणैरिति प्रणवाधिकारोक्तैरनुभवैर्युज्यते इति शेषः । तावदन्तात्र तुर्यदशा ॥

अथैतत्सर्वं

त्यक्त्वा स्वच्छन्दतां व्रजेत् ।

गाढगाढोन्मनापदविश्रान्तिपदप्रकर्षात् तुर्यातीतदशालाभात् चिदानन्दघनपरभैरवसमावेशमनुभवति योगीन्द्र इत्यर्थः ॥

न केवलं देहोत्तीर्ण एव पदेऽस्य परसमावेशो घटते, यावत्

जायते उन्मनस्त्वं हि
देहेनानेन साधके ॥ ३२८ ॥

देहावस्थायां व्युत्थानेऽपि साधकस्य समावेशप्रकर्षात्तदानन्दरससंस्काराद्भूर्णमाणतैव भवतीत्यर्थः ॥ ३२८ ॥

किं चायं स्वातन्त्र्यशक्त्युन्मेषात्

संक्रामेत्परदेहेषु
क्षुत्तृष्णाभ्यां न बाध्यते ।
अतीतानागतं चैव
त्रैलोक्ये यत्प्रवर्तते ॥ ३२९ ॥
प्रत्यक्षं तद्भवेत्तस्य
सर्वज्ञत्वं च जायते ।

'यच्च प्रवर्तते' इति यदपि वर्तमानं किंचिदस्ति, तदस्य सर्वं प्रत्यक्षीभवति । 'सर्वज्ञत्वम्' इति क्रमेणाभ्यासप्रकर्षान्मन्त्रमन्त्रेशादितुल्यो भवतीत्यर्थः ॥ ३२९ ॥

पाटलिकं प्रमेयमुपसंहरन् पटलान्तरेण संगतिं दर्शयति

प्रसङ्गेऽध्यात्मकालस्य
ज्ञानं विज्ञानमेव च ॥ ३३० ॥

सर्वमेतत्समाख्यात-
मंशकांश्च निबोध मे ।

अध्यात्मकालकथनप्रसङ्गेन तत्त्ववृत्त्या ज्ञानं मृत्युजययोगिजागरावस्थाद्यात्मकवेधादिरूपं च विज्ञानमेतदुक्तमनुक्तमपि अनुजिघृक्षावेशात्, अतः

'कालांशकं च देवेश कथ यस्य प्रसादतः ।' (७।१)

इति यत्प्रश्नितं, ततः कालस्वरूपं कथितं प्रसङ्गाज्ज्ञानं विज्ञानं चाप्यादिष्टम्, अंशकस्वरूपं तु निर्णेतुमवशिष्टम्; अतोंऽशकान् भाविपटलेन निर्णेष्यमाणान्निबोध जानीहीति पाटलिकी संगतिरिति शिवम् ॥ ३३० ॥

संवित्स्फारव्याप्त्या विश्वं प्राणान्तःस्थं सम्यग्ज्ञात्वा ।
तास्ताः सिद्धीरंशज्ञत्या पूर्णस्थितिं यायात् ॥ १ ॥

इति श्रीस्वच्छन्दोद्द्योते
कालाधिकारः सप्तमः पटलः समाप्तः ॥ ७ ॥